Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतभाषाशिक्षणम्

अइउण् ऋलृक् एओङ् ऐऔच्
हयवरट् लण् ञमङणनम्
झभञ् घढधष् जबगडदश्
खफछठथचटतव् कपय् शषसर् हल्

मध्यप्रदेशसंस्कृतबोर्ड
लोकशिक्षणसंचालनालयः, स्कूलशिक्षाविभागः
मध्यप्रदेशः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वदतु संस्कृतम्

नमस्कारः।	नमस्कार।
नमस्ते/नमो नमः।	नमस्ते।
हरिःओम्।	हॅलो।
श्रीमन्/मान्ये।	सर/मैडम। (सम्बोधन में)
धन्यवादः।	धन्यवाद।
स्वागतम्।	स्वागत।
क्षमां करोतु।	क्षमा कीजिए।
चिन्ता नास्ति।	कोई बात नहीं।
कृपया।	कृपया।
आम् / न।	हाँ / नहीं।
उत्तमम्/बहु उत्तमम्।	अच्छा / बहुत अच्छा।
हार्दिकाः शुभकामनाः।	हार्दिक शुभकामनायें।
अभिनन्दनम्।	अभिनंदन।
पुनः मिलामः	फिर मिलेंगे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''संस्कृतभाषाशिक्षणम्''

भारतशासनस्य
संस्कृतमाध्यमेन संस्कृतकक्षाशिक्षणं
प्रायोजनान्तर्गते मध्यप्रदेशस्य विद्यालयेषु
संस्कृतमाध्यमेन कक्षाशिक्षणाय
सहायकसामग्री

मध्यप्रदेशसंस्कृतबोर्ड
लोकशिक्षणसंचालनालयः, स्कूलशिक्षाविभागः
मध्यप्रदेशः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्पादकाः

डॉ. आजादमिश्रः

एम.ए.,व्याकरणाचार्यः,साहित्याचार्यः,पीएच.डी.

मध्यप्रदेशसंस्कृतबोर्ड
लोकशिक्षणसंचालनालयः, स्कूलशिक्षाविभागः
मध्यप्रदेशः

डॉ. कौशलकिशोरपाण्डेयः

एम.ए.,एम.एड.,पीएच.डी.

सचिवः
मध्यप्रदेशसंस्कृतबोर्ड तथा संयुक्तसंचालकः,
लोकशिक्षणम् मध्यप्रदेशः,भोपालम्

डॉ. लक्ष्मीनिवासपाण्डेयः

व्याकरणाचार्यः,एम.एड.,पीएच.डी

प्रवाचकः, राष्ट्रियसंस्कृतसंस्थानम्,
मानित विश्वविद्यालयः, लखनऊपरिसरम्

डॉ. महेशप्रसादजैनः

एम.ए.,(संस्कृत,हिन्दी,अंग्रेजी), बी.एड.,पीजीसीटीई, पीएच.डीः

सहायकसंचालकः
लोकशिक्षणम् मध्यप्रदेशः,भोपालम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(बल राम जाखड़ः)

राज्यपाल
मध्यप्रदेश

राजभवन
भोपाल——४६२००३
दिनांक २८ अगस्त २००४

सन्देशः

एतद् ज्ञात्वा प्रसन्नता जाता यत् मध्यप्रदेशसंस्कृतबोर्ड द्वारा संस्कृत भाषायाः प्रसारस्य तथा अस्याः ग्राह्यतायाः क्षेत्रं वर्धयितुं "संस्कृत भाषाशिक्षणम्" पुस्तकस्य प्रकाशनं क्रियते।

संस्कृतभाषा सर्वासु भारोपीयभाषासु अग्रगण्याऽस्ति। अस्माकं देशस्य सांस्कृतिकसामाजिकसम्बन्धैः संस्कृतस्य योगः पूर्वतः एवाऽस्ति। विश्वस्य प्राचीनतमं साहित्यं वेदपुराणादयः संस्कृतभाषायामेव निहिताः सन्ति। वेदाः अस्माकं जीवनशैल्याः आधारस्तम्भाः तथा विश्वस्य सांस्कृतिक प्रतिभूतयः सन्ति। संस्कृतभाषायां अनवरतरूपेणसाहित्यसृजनमेव एतस्याः जीवन्ततायाः प्रत्यक्षप्रमाणमस्ति। पुस्तकेऽस्मिन् सरलसंस्कृतस्य माध्यमेन संस्कृतस्याध्यापनाय विविधप्रविधिनां सुनियोजितं विवेचनं कृतमस्ति।

आशासे यत् पुस्तकमिदं अध्यापकेभ्यः, विद्वद्भ्यः, शोधछात्रेभ्यश्च लाभदायकः भविष्यति।

अनंतशुभकामनाः।

(बल राम जाखड़ः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



बाबूलाल गौरः
मुख्यमंत्री

मध्यप्रदेश शासन
भोपाल – ४६२००४
२७ अगस्त २००४

सन्देशः

एतद् ज्ञात्वा अत्यन्तप्रसन्नतां अनुभवामि यत् मध्यप्रदेशसंस्कृतबोर्ड द्वारा प्रदेशस्य उच्च/उच्चतर विद्यालयेषु संस्कृतपाठशालासु च कर्तव्यस्थसंस्कृत शिक्षकान् प्रशिक्षयितुं "संस्कृतभाषाशिक्षणम्" प्रकाशनं क्रियते।

एतद् अत्यन्तस्वाभाविकं आवश्यकं च अस्ति यत् यस्याः भाषायाः प्रशिक्षणं दीयमानः अस्ति पाठ्यसामग्री अपि तस्यां भाषायामेव भवेत। अस्यां दिशायां संस्कृत बोर्ड द्वारा संस्कृतमाध्यमे प्रशिक्षणसामग्र्याः सज्जीकरणं एकं सार्थकं अनुकरणीयप्रयासं च अस्ति।

संस्कृतभाषाशिक्षणस्य माध्यमेन न केवलं शिक्षकाणां ज्ञानात्मकं विकासः भविष्यति अपि च भाषायाः सम्प्रेषणीयतायां गतिः आगमिष्यति।

पुस्तकप्रकाशनाय अस्माकं हार्दिकशुभकामनाः।

(बाबूलाल गौरः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

डॉ. ढालसिंह बिसेनः
मंत्री, स्कूलशिक्षा
तथा
अध्यक्षः मध्यप्रदेशसंस्कृतबोर्ड भोपालम्

बी–११, चार इमली,भोपाल
फोन नं.(०७५५) २४४१७७१
मंत्रालय – २४४१३४७
क्रमांक/ ०८ /मं/२००४
दिनांक ०२. ०६. २००४

सन्देशः

भारतस्य युग–युगेभ्यः अर्जितस्य ज्ञान–विज्ञानस्य निधिः अस्माकं संस्कृतग्रन्थेषु निहिता अस्ति। भारतीयजीवनदर्शनं तथा सभ्यतासंस्कृतिं पूर्णरूपेण अभिज्ञानाय एतेषां ग्रन्थाणां अनुशीलनं परमावश्यकमस्ति। विश्वस्य एतस्याः सर्वप्राचीनतायाः निधेः संरक्षणेन संवर्द्धनेन च भारतीयजीवनमूल्यानां सम्बद्धनं भवितुं अर्हति।

मध्यप्रदेशशासनेन संस्कृतभाषायाः प्रचार–प्रसारं प्रति विशेषध्यानं दत्तम्। सर्वेषु उच्च/उच्चतरमाध्यमिकविद्यालयेषु संस्कृतशिक्षकाणां नियुक्तिः भविष्यति तथा संस्कृत पाठशालासु आधुनिकसुविधाः उपलब्धं कारयित्वा ताः मुख्यधारायां सम्मेलयितुं प्रयासाः क्रियन्ते।

संस्कृतभाषायाः प्रचार–प्रसारे मध्यप्रदेशसंस्कृतबोर्डस्य अत्यन्तमहत्वपूर्णभूमिकाऽस्ति। बोर्डस्य प्रकाशनैः संस्कृतविकासं गतिः प्राप्ता। संस्कृतशिक्षकाणां शिक्षणाय रचितं बोर्डस्य नूतनप्रकाशनं "संस्कृतभाषाशिक्षणम्" माध्यमेन सुधिपाठकाः लाभान्विताः भविष्यन्ति।

हार्दिकशुभकामनाः।

(डॉ.ढालसिंह बिसेनः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



अरविन्दजोशी
सचिवः

मध्यप्रदेश शासन,
भोपाल – ४६२००४

सन्देशः

अयं अत्यन्तप्रसन्नतायाः विषयः अस्ति यत् संस्कृतभाषायाः प्रचार–प्रसारे मध्यप्रदेशसंस्कृतबोर्डद्वारा अतुल्यप्रयासाः क्रियन्ते अस्मिन्नेव क्रमे "संस्कृत भाषाशिक्षणम्" इत्यस्य प्रकाशनं बोर्डस्य श्रेष्ठोपलब्धिः अस्ति।

शिक्षणकार्यस्य गुणवत्तायाः अभिवर्धनाय शिक्षकान् नवीनशिक्षणप्रविधिणां परिचयं अनिवार्यमस्ति। एतद् तदा अत्यन्तमपरिहार्यं भवति यदा भाषाप्रशिक्षणं दीयमानमस्ति। वर्तमाने विद्यालयेसु संस्कृतभाषा प्रायः अनुवादमाध्यमेन पाठ्यते येन बालकान् भाषायाः सम्यक् अवबोधं न भवति। अतः एतदावश्यकमस्ति यत् शिक्षकान् संस्कृतसंभाषणस्य प्रशिक्षणं दद्यात् तथा एतदर्थं शिक्षणसामग्री अपि संस्कृतभाषायामेव भवतु।

निश्चितरूपेण मध्यप्रदेशसंस्कृतबोर्डद्वारा संस्कृतभाषायां शिक्षणसामग्रीं उपलध्धं कारयित्वा प्रशंसनीयं कार्यं क्रतम्अवसरेऽस्मिन् अस्माकं हार्दिकशुभकामनाः।

(अरविन्द जोशी)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोक शिक्षण संचालनालय
मध्यप्रदेश
दिनांक २५ अगस्त २००४

एल.एस.बघेलः
आयुक्तः

सन्देशः

प्रदेशे संस्कृतभाषायाः प्रचार–प्रसारे जनोपयोगीरूपप्रदाने च मध्यप्रदेशसंस्कृतबोर्ड इत्यस्य स्थापना अभवत। बोर्ड द्वारा गतत्रिर्षेषु उल्लेखनीयाः उपलब्ध्यःअर्जिताः। संस्कृतदिवसः, कालिदाससमारोहः, विद्वत्सम्मेलनं, अखिलभारतीयसंस्कृतसम्मेलनं एतैः कार्यक्रमैः सह संस्कृतशिक्षकप्रशिक्षणे संस्कृतबोर्डद्वारा महत्त्वपूर्ण कार्य कृतम्। अल्पसमये एव बोर्डद्वारा त्रिसहस्रसंस्कृतशिक्षकाणां प्रशिक्षणं सम्पादितम्। उल्लेखनीयमस्ति यत् संस्कृतशिक्षकेभ्यः प्रशिक्षितुं पाठ्यसामग्रीरूपे संस्कृतशिक्षणसन्दर्शिकायाः रचना जाता। संदर्शिकायां संस्कृतेन सह हिन्दीभाषायाः प्रयोगः अपि आसीत्। एतस्य मुख्योद्देश्म् प्रारम्भिकस्तरे शिक्षकेभ्यः प्रशिक्षणप्रदानं आसीत्। कालान्तरे एतदनुभूतं यत् लब्धप्रशिक्षणशिक्षकेभ्यः सूक्ष्मज्ञानप्रदातुं उत्तरवर्तीप्रशिक्षणमावश्कम् एतदर्थं पाठ्यसामग्री अपि संस्कृतमाध्यमे एव भवतु।

प्रस्तुतपुस्तकं "संस्कृत भाषाशिक्षणम्" विषयचयनस्य दृष्ट्या अत्यन्तमहत्त्वपूर्णमस्ति। संस्कृतभाषायाः एतिहासिकमहत्त्वं, शिक्षणप्रणाली, भाषाविज्ञानस्य संदर्भे संस्कृतं तथा विषयप्रस्तुतिकरणस्य दृष्ट्या आदर्शपाठयोजनाः एतेषां विषयाणां पुस्तके महत्त्वपूर्ण स्थानं अस्ति। एतदतिरिच्य संस्कृते संभाषणस्य दक्षतायाः अभिवर्धनाय पृथकेन द्वि–अध्याययोः समावेशेन अत्योपयोगी रूपं प्रदत्तम्।

ममापेक्षाऽस्ति यत् पुस्तकमिदं संस्कृतशिक्षकेभ्यः,शिक्षाशास्त्री/बी.एड. कक्षायाः छात्रेभ्यः लाभदायकः भविष्यति।

मध्यप्रदेशसंस्कृतबोर्डस्य एतस्य अनुपम–प्रयासाय अहं हार्दिकशुभकामनाः व्यक्तं करोमि।

(एल.एस.बघेलः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मध्यप्रदेशसंस्कृतबोर्ड
तुलसीनगरं भोपालम्
दिनांक २५ अगस्त २००४

डॉ. कौशलकिशोरः पाण्डेयः
सचिवः

पुरोवाक्

संस्कृतभाषा अस्य विश्वस्य सर्वमान्या प्राचीना भाषा अस्ति। नास्ति अत्र सन्देहः यत् अस्यां भाषायां अस्य देशस्य संस्कृतिः निहिता अस्ति। मध्यप्रदेशसंस्कृतबोर्ड इत्यनेन अल्पसमये एव बहूनि कार्याणि कृतानि। स्कूलशिक्षाविभागे संस्कृतदिवसः, कालिदाससमारोहः, अखिलभारतीयसंस्कृतमहोत्सवः तथा संस्कृतप्रशिक्षणं एतेषां कार्यक्रमाणां महत्त्वपूर्ण स्थानं अस्ति। विद्यालयेषु अपि सर्वेछात्रः शिक्षकाश्च अस्याः भाषायाः महत्त्वं स्वीकुर्वन्ति। छात्रवृत्तिप्रदानेन समस्तविद्यालयेषु संस्कृतपाठशालासु च छात्रणां रूचिः संस्कृतं प्रतिः अधिकमऽस्ति। श्रावणमासे प्रतिविद्यालये एकसप्ताहपर्यन्तं संस्कृतदिवसः आयोज्यते। कालिदाससमारोहः अपि प्रतिविद्यालये, प्रतिविकासखण्डे, प्रतिजनपदे, प्रतिसंभागे तथा राज्यस्तरे आयोज्यते। अखिलभारतीयसंस्कृतमहोत्सवस्य त्रिवारं आयोजनं जातम्। अस्मिन् वर्षे अखिलभारतीयसंस्कृतसम्मेलनस्य आयोजनं सिंहस्थ अवसरे उज्जयिनी नगरे सम्पनं अभवत्।

संस्कृतबोर्ड इत्यस्य शिक्षकाणां प्रशिक्षणस्य एका महत्त्वपूर्णा योजनाऽस्ति। एतद् संसूचयन् मया भूयान् प्रहर्षो अनुभूयते यत् गतवर्षपर्यन्तं त्रिसहस्रशिक्षकाणां प्रशिक्षणं जातम्। भारतसर्वकारस्य केन्द्रीययोजनान्तर्गते आगामिनि वर्षे पंचसहस्रशिक्षकाणां प्रशिक्षणस्य व्यापकयोजना अस्ति। प्रशिक्षणस्य प्रथमचक्रे एवं पाठ्यक्रमस्य समस्या आसीत अतः "संस्कृतशिक्षकसन्दर्शिका" इत्यस्य पुस्तकस्य रचना जाता। अस्मिन् पुस्तके शिक्षकाणां प्रारम्भिकस्तरं मनसि सन्धार्य संस्कृतभाषया सह हिन्दी भाषायाः प्रयोगः अपि कृतः किन्तु उत्तरवतिप्रशिक्षणस्य कृते संस्कृतभाषायामेव काचित् नूतनसामग्री कल्पिता आसीत् यतोहि ते एव प्रशिक्षणार्थिनः भवितु अर्हन्ति ये पूर्वमेव प्रशिक्षणं स्वीकृतवन्तः अतः नूतनप्रशिक्षणसामग्री रूपे भवतां हस्तयोः "संस्कृतभाषाशिक्षणम्" समर्पयामि।

मन्ये यत् पुस्तकमिदं छात्रणां तथा शिक्षकाणां कृते लाभप्रदं भविष्यति।

(डॉ. कौशलकिशोरः पाण्डेयः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुक्रमणिका

विषयाः	पृष्ठसंख्या
☞ संस्कृतभाषायाः परिचयः	1–05
☞ संस्कृतभाषायाः महत्त्वम्	6–16
☞ संस्कृतशिक्षणस्य उद्देश्यानि सिद्धान्ताश्च	17–25
☞ संस्कृतशिक्षणस्य विधयः	26–34
☞ गद्यशिक्षणम्	35–40
☞ संस्कृतगद्यपाठयोजना– 1,2,3	41–53
☞ पद्यशिक्षणम्	54–63
☞ संस्कृतपद्यपाठयोजना– 1,2,3	64–84
☞ व्याकरणशिक्षणम्	85–91
☞ संस्कृतव्याकरणपाठयोजना– 1,2,3	92–104
☞ संस्कृतशिक्षणस्य उपागमाः	105–109
☞ शिक्षणकौशलानां विकासः	110–131
☞ संस्कृतशिक्षणे दृश्यश्रव्योपकरणानां प्रयोगः	132–136
☞ संस्कृतशिक्षणे मूल्यांकनम्	137–142
☞ संस्कृतशिक्षणे पाठ्यसहगामिक्रियाणां महत्त्वम्	143–146
☞ संस्कृतकक्षः संस्कृतशिक्षकश्च	147–152
☞ व्यवहार–संस्कृतम्	153–234

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतभाषायाः परिचयः

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।

(ऋग्वेद ८.१००.११)

अतिप्राचीना संस्कृतभाषा दैवीय प्रेरणया उत्पन्ना इति विख्यातम्। अतएव इयं भाषा देवभाषेति लोके प्रसिद्धा। अथ च प्राचीनकालादेव भारतीयज्ञानविज्ञानस्य दिव्यानि तत्त्वानि अस्यां भाषायां सङ्ग्रथितानि। सम्पूर्णेऽपि विश्वे आदिज्ञानस्य स्रोतः वेद एव इति, तच्च संस्कृतभाषया एव लभ्यते। अतः संस्कृतभाषायाः महत्त्वं न केवलं भारतदेशे अपितु सम्पूर्णे विश्वे दृश्यते।

समस्तेऽपि विश्वे प्राचीनतमा भाषा संस्कृतमस्ति। ब्रह्ममुखादेव एषा निसृता इति भारतीयानां विश्वासः –

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।

–वाक्यपदीयम्।।

भाषामाध्यमेनैव समाजे परस्परम् अभिव्यक्तिः संभवति। काव्यादर्शे आचार्यदण्डी इत्थमेव अभिप्रैति–

"वाचामेव प्रसादेन लोकयात्रा प्रवर्तते"
"इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

भाषा निरन्तरं मानवहृदये प्रवहति–

सम्यक् स्रवन्ति सरितो न धेनो अन्तर्हृदा मनसा पूयमाना (ऋग्वेद ४.५८.६) भाषा एव मानवजीवनस्य सारः रसः वा–

अ. पुरुषस्य वाग् रसः, वाच ऋग् रसः (छान्दोग्यउपनिषद् १-१-२)

ब. जिह्वा देवानाममृतस्य नाभिः (ऋग्वेद ४-५८-१)

एतादृशैः अमृतवचनैः पूर्णा संस्कृतभाषा दिव्या सनातना च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋग्वेदः विश्वस्य प्राचीनतमा रचना अस्ति। मैक्समूलर–महोदयस्य मतानुसारम् ऋग्वेदस्य रचना क्रिस्तोः पूर्वं ४००० वर्षेभ्यः प्राक् जाता। लोकमान्यबालगङ्गाधरतिलक महोदयस्य मतानुसरं क्रिस्तोः ६००० वर्षेभ्यः पूर्वमिति। बहवः पाश्चात्याः भारतीयाश्च विद्वांसः क्रिस्तोः पूर्वं २५०० वर्षेभ्यः प्राक् इति मन्यन्ते। यद्यपि ऋग्वेदस्य कालविषये मतभेदाः सन्ति तथापि अयं विश्वस्य प्राचीनतमः ग्रन्थः इत्यस्मिन् विषये मतभेदः नास्ति। प्राचीनकाले संस्कृतं भारते साधारणजनां व्यवहारिकी भाषा आसीत्।

संस्कृतसाहित्येतिहासे भागद्वयं कर्तुं शक्यते-

१. वैदिकसंस्कृतसाहित्यम्।

२. लौकिकसंस्कृतसाहित्यम्

वैदिकसाहित्ये व्यावहारिकरूपेण भाषायाः विभिन्नरूपाणि दृश्यन्ते। परं लौकिकसंस्कृतं प्रायः पाणनीय–व्याकरणनियमानुसारं भवति।

भाषाणां वर्गीकरणम् :-

भाषाविज्ञानिनः सर्वाः भाषाः विभिन्नपरिवारेषु वर्गीकुर्वन्ति–

१. भारोपीयपरिवारः २. द्रविड़ परिवारः

३. आस्ट्रोएशियाई परिवार ४. तिब्बतवर्मीपरिवारः

एतेषु परिवारेषु भारोपीय परिवारः प्रमुखः विशालश्च। भारतस्य यूरोपमहाद्वीपस्य च सर्वासां भाषाणामत्र गणना भवति। भारते भारोपीयपरिवारस्य द्रविड़परिवारस्य च भाषा भाष्यन्ते। यद्यपि सर्वासां परिवाराणां का मूलभाषा इत्यस्मिन् विषये भाषाविज्ञानिनः मौनं धारयन्ति अथवा या काऽपि काल्पनिकी मूलभाषा इति वदन्ति। परं संस्कृतभाषायाः प्राचीनसमृद्धिं दृष्ट्वा कदाचित् एषा एव सा मूलभाषा अभविष्यत इति भारतीयानां चिन्तनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भारोपीयभाषापरिवारे शतं इति शब्दस्य उच्चारणानुगुणम् इत्थं वर्गीकरणं भवति।



उभयवर्गयोः भाषाभाषिणः जनाः एकस्यैव परिवारस्य आसन्। तेषां स्थानं भारतयूरोपयोः मध्यवर्तीभागः इति कथ्यते। दूरप्रदेशान् प्रति गमनेन आवासभेदेन वर्गाः शाखाः भाषाश्च भिन्नाः जाताः। केण्टुमवर्गे ग्रीक–लैटिन–भाषे, अथ च शतं वर्गे भारत–ईरानीभाषे प्रमुखाः अभवन्। वैदिकसंस्कृतं भारतईरानीशाखायाः भारतीयं रूपम्। आर्यभाषा इति वा तस्य व्यवहारः।

आर्यभाषापरिवारः

आर्यभाषायाः त्रयः कालाः :–

प्राचीनार्यभाषाकालः (क्रिश्तोः पूर्वं ५०० वर्षपर्यन्तम्) प्राचीन आर्यभाषाकालः अतिदीर्घः। अस्मिन् काले आर्याः उत्तरभारते न्यवसन्। अयमेव वैदिककालः। अस्मिन्काले संस्कृतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यवहारभाषा आसीत्। वेदाः उपनिषदः दर्शनानि अस्मिन्नेव काले आसन्। अस्य कालस्य अंतिमभागे पाणिनेः व्याकरणं समागतम्। संस्कृतेन सह प्राकृतमपि जनभाषा अभवत्।

मध्यकालीनार्यभाषाकालः (क्रिश्तोः पूर्वं ५०० वर्षतः १००० ईस्वीपर्यन्तम्) अस्मिन् काले प्राकृतं जनभाषा अभवत्। प्रादेशिकभेदेन प्राकृतस्य अनेकानि रूपाणि अभवन्—मागधी, अर्धमार्गधी, शौरसेनी, महाराष्ट्री, पैशाची इत्यादीनि प्रमुखान्यासन्। प्राकृतभाषाणां विकृतिकारणात् अपभ्रंशः जातः। संस्कृतम् उच्चवर्गस्य व्यवहारिकी भाषा साहित्यिक भाषा च अभवत।

आधुनिकार्यभाषाकालः (क्रिश्तोः १००० वर्षतः वर्तमानं यावत्) अस्मिन् काले अपभ्रंशानामपि विकासः जातः। भाषागत परिवर्तनानन्तरं काश्मीरी, सिन्धी, पंजाबी, मराठी इत्यादयः भाषाः उद्गताः यासु संस्कृतशब्दाः प्रचुराः। संस्कृतम् साहित्यिकभाषारूपेण अवशिष्टा।



संस्कृतभाषा समस्त आर्यभाषाणां जननी अस्ति। द्रविड़वर्गीयाः दक्षिणभारतीयभाषाः तमिल—तेलुगु—कन्नड़—मलयालम्—भाषाः यद्यपि भिन्नपरिवारीयाः तथापि एतासु संस्कृतशब्दानां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रचुरः प्रयोगः दृश्यते। एतासां साहित्यमपि संस्कृतसाहित्येन प्रभावितमस्ति। रामायण–महाभारतग्रन्थौ एतासां साहित्यानां कृतेऽपि उपजीव्यग्रन्थौ। अतः सर्वाः अपि भारतीयाः भाषाः संस्कृताज्जाताः, संस्कृतेन संपुष्टाः वा, संस्कृतभाषया घनिष्ठं सम्बन्धं धारयन्ति। अथ च विश्वस्य समस्तभाषाणां शब्दरूपाणां तुलनात्मकाध्ययनेन अवश्यमेव संस्कृतमेव विश्वस्यमूलभाषा इति निर्धारयितुं शक्यते।

मूलभाषासंस्कृतम्

संस्कृतम्	हिन्दी	फारसी	आंग्ल	जर्मन	फ्रेन्च	ग्रीक	लैटिन
मातृ	माता	मादर	Mother	Mutter	Mere	Meter	Mater
पितृ	पिता	पिदर	Father	Vater	Pere	Pater	Pater
भ्रातृ	भाई	बिरादर	Brother	Bruder	Frere	Phrater	Frater
सप्त	सात	हफ्त	Seven	Sieben		Hepta	Septam
दुहितृ	बेटी		Daughter				Dater
नाम	नाम		Name				Namine
द्वि	दो		Two				Dovo
त्रि	तीन		Three				द्वि
अहि		सफी					
स्तारः	तारा	सितारा	Star				

व्याकरणदोषरहिता भाषा संस्कृतभाषेति कथ्यते। पुरा सर्वे जनाः संस्कृतभाषा एव वदन्ति स्म। अतः समग्रमपि प्राचीनसाहित्यं संस्कृतभाषायामेव उपलभ्यते। सर्वप्राचीनग्रन्थाः चत्वारो वेदाः देवभाषायामेव निबद्धाः सन्ति। संस्कृतभाषायाः काव्यानां माधुर्यं संसारे प्रसिद्धं वर्तते। इयं संस्कृतभाषा सर्वात्कृष्टा साहित्यसंयुक्ता वर्तते।

संस्कृत भाषैव भारतवर्षस्य प्राणभूता भाषा अस्ति। संस्कृतभाषा एव भारतवर्षमेकं सूत्रे बध्नाति। अतः संस्कृतभाषा संजीवनीभाषा, अमृतभाषा, विश्वभाषा, वेदवाणी, देववाण्यश्च अस्ति इति वयं अनुभवामः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतभाषायाः महत्त्वम्

संस्कृतभाषा अतिप्राचीनकालादारभ्य विश्वे भारते वा व्यवह्रियमाणा पठ्यमाना च अस्ति। एषा भाषा अद्यापि प्रासंगिकी अस्ति। अतः संस्कृतभाषा, तस्याः साहित्यं च जगति महत्त्वं भजेते। अतएव **'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'** इति उच्यते। तत्रापि **"संस्कृतिः संस्कृताश्रिता"** इत्युच्यते। भारतीया संस्कृतिः संस्कृतभाषया संग्रथिता प्राचीन संस्कृतग्रन्थेषु संरक्षिता अद्यापि विश्वमानवकल्याणाय पथप्रदर्शिका अस्ति। अतः ''संस्कृतभारतं (संस्कृतप्रकाशेनर तम्) भारतमेव शोभते" इति वक्तुं शक्यते। संस्कृतस्य महत्त्वं विविधकारणैरस्ति। तद्यथा–

१. **ऐतिहासिकं महत्त्वम् :-**

संस्कृतभाषा विश्वस्य अत्यन्तप्राचीना भाषा ऋग्वेदश्च प्राचीनतमः ग्रन्थः इति सर्वैरङ्गीक्रियते। संस्कृतभाषया एव भारतस्य प्राचीनतमस्य रूपस्य परिचयः भवति। संस्कृतभाषायाः आश्रयणेन पंचसहस्रवर्षेभ्योऽपि अधिकस्य ऐतिहासिक– गौरवस्य भावः पुष्टः भवति। अतः भारतीय–ऐतिह्यस्य अस्मितायाश्च केन्द्रभूतस्य संस्कृतस्य ऐतिहासिकं महत्त्वम्।

२. **आध्यात्मिकं महत्त्वम् :-**

आध्यात्मजगति पाश्चात्यदर्शनैः अप्राप्तानामपि गूढ़रहस्यानां दैवीयतत्त्वानां व्याख्यानं विस्तृतरुपेण भारतीयदर्शनग्रन्थेषु कृतमस्ति। अनेनैव महत्त्वपूर्णेन आध्यात्मिकज्ञानेन भारतं जगद्गुरुः आसीत्। अद्यापि बहवः वैदेशिकाः स्व स्वदेशेषु भारतीयदर्शनस्य अध्ययनं कुर्वन्ति अथवा भारतीयदर्शनमध्येतुं भारतम् आगच्छन्ति। यद्यपि अद्य भौतिकवादस्य प्राधान्यं दृश्यते तथापि भौतिकवादेन सर्वासां मानवीयसमस्यानां, निराशाणां, कुण्ठानां वा समाधानं न भवति। समस्तमानवकल्याणार्थं आध्यात्मवादःएव शरणम्। सन्तुलितमानवजीवनस्य कृते समष्टिकल्याणस्य कृते च गूढातिगूढाः सरलातिसरलाश्च बहवः दार्शनिकविचाराः संस्कृतभाषायां प्रतिपादिताः–

"तेन त्यक्तेन भुंजीथाः मा गृधः कस्यस्विद्धनम्" इति सन्तोषेण परस्परं कलहः वैमनस्यं वा न भवेत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातृवत् परदारेषु परद्रव्येषु च लोष्ठवत्।

आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः।।

'आत्मनः प्रतिकूलानि परेषां न समाचरेत्।' इति चिन्तनेन मनुष्यस्य सामाजिकं जीवनं सुखमयं भवति। **"गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।" "कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः"** इति प्रतिक्षणं धर्माचरणेन स्व स्व कर्माचरणेन च शतवर्षाणां सुखमयजीवनस्य कामना क्रियते।

कर्मवैफल्ये सति निराशा न भवेत् इत्येतदर्थं कर्मसिद्धान्तः सम्यक् प्रतिपादितः:– **"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।"**

पुनश्च व्यक्तित्वस्य संतुलितविकासाय–

''सुखदुःखेसमेकृत्वा लाभा- लाभौजयाजयौ।''

दुःखेषु अनुद्विग्नमनः सुखेषु विगतस्पृहः

"विहाय कामान् सर्वान् यः पुमाश्चरति निस्पृहः।

निर्ममो निरहंकारः स शान्तिमधिगच्छति।।"

एवमेव स्थितप्रज्ञस्य भावः जीवन्मुक्तस्य लक्षणानि, आत्मतत्त्वं, अखण्डपिण्डब्रह्माण्डसम्बन्धः, ईश्वरसिद्धिः, मोक्षप्राप्तिः, सृष्टिप्रक्रिया, सत्त्वरजस्तमोगुणाः, जीवात्म परमात्मसम्बन्धः इत्यादयः बहवः दार्शनिकविचाराः वेदेषु उपनिषत्सु दर्शनग्रन्थेषु च सम्यक् प्रतिपादिताः। सर्वेषां साररूपेण सुबोधरूपेण श्रीमद्भगवद्गीतायां सम्यक् व्याख्याताः। एते सर्वेऽपि विचाराः संस्कृतस्य आध्यात्मिकं महत्त्वं प्रतिपादयन्ति।

३. सांस्कृतिकं महत्त्वम् :-

भारतीया संस्कृतिः आत्मसन्तुष्टा, अध्यात्मनिष्ठा, लोककल्याणभूयिष्ठा च अस्ति। अतः भारतीया संस्कृतिः परम्परा च समृद्धा अस्ति–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भारतीया संस्कृतिरेव भारतभूमिं पुण्यभूमिः इति कल्पयति–

गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरुषः सुरत्वात्।।

समृद्धा भारतीया संस्कृतिः विभिन्नघटकैः ज्ञातुं शक्यते–

– सरलग्रामीणजीवनम्।

– कृषिप्रधानः व्यवसायः।

– पशुपालनं पर्यावरणसंरक्षणं च।

– चत्वारः पुरुषार्थाः – धर्मार्थकाममोक्षाः।

– चत्वारः आश्रमाः – ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–सन्यासाश्च।

– चत्वारः वर्णाः–ब्रह्मण–क्षत्रिय–वैश्य–शुद्रश्च। व्यावसायिकं विभाजनमेतत्।

– षोडश संस्काराः – मानवजीवनस्य अनुशासित–समयबद्ध–निर्वाहार्थम्।

– एकपत्नीव्रतः पतिव्रताधर्मश्च–आदर्शदाम्पत्यजीवनार्थम्।

– संयुक्तपरिवारः –परस्परं स्नेह सौहार्द्रसामञ्जस्यार्थम्।

– सत्यं शिवं सुन्दरं इति जीवनदर्शनम्।

– देवभक्तिः–मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव।
इति व्यवहारः– नदीवृक्षादीनां देवरूपेण पूजनेन समादरः।

– पुनर्जन्मविचारः –पुण्यासक्तिः पापभीतिश्च। अनेन अहंकाररहित सरलजीवनविधानं निराशारहित–भविष्यत्–चिन्तनम्।

– स्त्रीसमादरः– परिवारस्य केन्द्रशक्तिः स्त्री, सुखीपरिवाराणां समूहेनैव समाजस्य समृद्धिः।

– सदाचारः

– सर्वजनहिताय चिन्तनम्–वसुधैवकुटुम्बकम् इति भावः ।

एते सर्वेऽपि सांस्कृतिकघटकाः। पुराणग्रन्थेषु धर्मशास्त्रग्रन्थेषु गृह्यसूत्रेषु स्मृतिग्रन्थेषु महाकाव्येषु च सम्यक्रूपेण प्रतिपादिताः। एतेषां ज्ञानेनैव अग्रे सुखमयं समृद्धिमयं च जीवनं यापयितुं शक्यते। एते सर्वेऽपि विचाराः संस्कृतस्य सांस्कृतिकं महत्त्वं प्रतिपादयन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४. **साहित्यकं महत्त्वम् :-**

संस्कृतसाहित्यं सम्पूर्णेऽपि विश्वे अत्यन्तं समृद्धं वैविध्यपूर्णं च अस्ति। ज्ञान विज्ञानस्य भण्डारः संस्कृतसाहित्ये द्रष्टुं शक्यते –

- दर्शनसाहित्यम्–वेदेषु उपनिषत्सु दर्शनशास्त्रग्रन्थेषु च उच्चकोटिदर्शन साहित्यं दृश्यते।
- शास्त्रसाहित्यम्–अष्टादशशास्त्राणि व्याकरण, ज्योतिष, तर्कादीनि।
- ललितसाहित्यम्–संगीत–नृत्य–नाट्य–कामकलाविषयकग्रन्थाः।
- गद्यसाहित्यम्–कादम्बरी, इत्यादयः
- नाटकसाहित्यम्–अभिज्ञानशाकुन्तलम्, रत्नावली, स्वप्नवासवदत्तम्, इत्यादयः
- काव्यसाहित्यम्–रामायणं, महाभारतं, रघुवंशः, कुमारसंभवः इत्यादयः।
- गीतिसाहित्यम्–ऋतुसंहारम्, गीतगोविन्दः इत्यादयः।
- नीति साहित्यम्–चाणक्यनीतिः, विदुरनीतिः, भर्तृहरेः नीतिशतकम् इत्यादयः।
- कथा साहित्यम्–हितोपदेशः पंचतन्त्रः, कथासरित्सागरः इत्यादयः।
- विज्ञान साहित्यम्–योग–चिकित्सा–भौतिक–रसायनादयाः विज्ञानग्रन्थाः।
- स्तोत्रसाहित्यम्–शिवताण्डवस्तोत्रम्, आनंदलहरी, मुकुंदमाला, भजगोविन्दं इत्यादयः।

एवंप्रकारेण संस्कृतस्य वैविध्यपूर्णं सांस्कृतिकं महत्त्वम्।

५. **व्याकरणगतं महत्त्वम् :-**

संस्कृतभाषायाः यादृशं सुदृढं, सुबद्धं व्याकरणमस्ति न तावत् विश्वस्य अन्यस्याः कस्याः अपि भाषायाः। आचार्यपाणिनिना एतादृशं महत्त्वपूर्णं कार्यं साधितम्। पाणिनीय व्याकरणेन पुरातनसाहित्यानाम् अधुनातनसाहित्यानां च अध्ययनं सुकरं भवति।

६. **भाषावैज्ञानिकं महत्त्वम् :-**

संस्कृतभाषायाः प्राचीनत्वात् अस्याः व्याकरणस्य सुदृढत्वात् च भाषावैज्ञानिक क्षेत्र संस्कृतभाषायाः महत्प्राधान्यम् अस्ति। विविधभाषाणां तुलनात्मकस्वरूपविश्लेषणे संस्कृतभाषा आधारभूता। विविधभाषाणाम् अन्यभाषासु अनुवादकाले, सङ्गणकमाध्यमेन यन्त्रानुवादकाले वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतव्याकरणस्य महती आवश्यकता भवति। अतएव प्रसिद्धभाषाविज्ञानी एल.ब्लूमफील्ड महोदयः उक्तवान्–

Astadhyayi is the greatest monument of human intelligence.

—L. Bloomffield.

भाषाविज्ञाने ध्वनिविज्ञानं (Phonetics) शब्दविज्ञानं (Morphology) अर्थविज्ञानं (Semantics) वाक्यविज्ञानं (Syntax) इति चत्वारः भेदाः भवन्ति। एतेषु चतुर्षु अपि परीक्षणे सति संस्कृतभाषा सर्वेषु क्षेत्रेषु समर्था तिष्ठति। अतः भारोपीयभाषापरिवारे तु अस्य प्रमुखं स्थानमस्ति एव, विश्वस्य समस्तभाषासु सम्पूर्णभाषाविज्ञानक्षेत्रे च संस्कृतस्य महत्त्वमस्ति इति नातिशयम्।

७. **वैज्ञानिकं महत्त्वम् :-**

संस्कृतभाषायां भारतीयप्राचीनविज्ञानस्य बहवः ग्रन्थाः लभ्यन्ते–

- भूगोलविज्ञानस्य, खगोलविज्ञानस्य च विद्वांसः आर्यभट्टः भास्कराचार्यः, वराहमिहिरः, प्रख्याताः। एतेषां यद्यपि सर्वे ग्रन्थाः नोपलब्धाः तथापि केचन तु सन्ति एव।
- गणिते भास्कराचार्यमतिरिच्य ब्रह्मगुप्तः, श्रीधरः, महावीरः एवं च श्रीपतिः प्रमुखाः आचार्याः आंसन्।
- चिकित्साविज्ञाने आयुर्वेदविषयकाः बहवः ग्रन्थाः सन्ति। आचार्येषु भारद्वाजः पुनर्वसुः, चरकः, सुश्रुतः, वाग्भट्टः, भावमिश्रश्च प्रमुखाः आसन्।
- भौतिकविज्ञाने कणादस्य महत्त्वपूर्ण योगदानमस्ति। एतैः अणुसिद्धान्तस्य प्रतिपादनं कृतम्। उदयनाचार्यः वाचस्पति मिश्रश्च प्रकाशविषये ऊष्णताविषये च प्रतिपादितवन्तौ। दिशाबोधार्थं मत्स्ययन्त्रस्यापि व्यवहारः आसीत्।
- रसायनविज्ञाने रसरत्नाकरः, रसेन्द्रमंगला, रसार्णवः रसेन्द्रचूणामणिः इत्यादयः ग्रन्थाः आसन्। नागार्जुनः प्रमुखः आचार्यः आसीत्।
- वनस्पतिविज्ञाने, जीवविज्ञाने च ग्रन्थाः उपलभ्यन्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– यन्त्रविज्ञानेऽपि बहूनां यन्त्राणां उल्लेखः दृश्यते। समराङ्गणसूत्रधारः इत्यस्मिन् ग्रन्थे विमानरचनाविधिः प्रोक्तः।

– सामाजिकविज्ञाने, राजनीतिविज्ञाने, अर्थशास्त्रे, विधिविज्ञाने च ग्रन्थाः उपलभ्यन्ते। एते विषयाः गौतमधर्मसूत्राणि, बोधायनधर्मसूत्राणि, आपस्तम्ब धर्मसूत्राणि, वशिष्ठ धर्मसूत्राणि, याज्ञवल्क्यस्मृतिः, मनुस्मृतिः बार्हस्पत्यार्थशास्त्रं, कौटिल्यस्य अर्थशास्त्रमित्यादिषु ग्रन्थेषु उपलभ्यन्ते।

– कामशास्त्रस्यापि वैज्ञानिकं विवेचनं प्रजापतिः, नन्दी, श्वेतकेतुः, दत्तकः चारायणः, स्वर्णनां, कुचुमारः, वात्स्यायनः प्रभृतयः आचार्याः कृतवन्तः।

अद्यापि अन्ताराष्ट्रियस्तरे आयुर्वेदस्य, योगशास्त्रस्य, वास्तुशास्त्रस्य, च प्रयोगाः दृश्यन्ते। प्राचीनभारतीयवैज्ञानिकग्रन्थाः संस्कृते आसन्। तेषां प्रकाशनेन आधुनिक जीवनेन संयोजनेन च लोककल्याणं सिद्ध्यति।

८. राष्ट्रियं महत्त्वम् :-

विविधभाषाभाषिभारते भावात्मक–एकतासम्पादने राष्ट्रिय–एकतासम्पादने संस्कृतं सूत्ररूपेण तिष्ठति। संस्कृतग्रन्थेषु प्राचीनकालादेव अखण्डराष्ट्रस्य कल्पनाकृता आसीत्। प्रान्तभेदं विना संस्कृतं सम्पूर्णेऽपि भारतराष्ट्रे व्यवह्रियमाणा, अधीयमाना च आसीत् अस्ति च।

राष्ट्रैक्यसम्पादनार्थमेव शङ्कराचार्यः चतुर्षु दिक्षु–उत्तरे बद्रीनाथः, पश्चिमे द्वारिका, पूर्वदिशि जगन्नाथपुरी, दक्षिणे श्रृङ्गेरी इति क्षेत्रेषु मठान् स्थापितवान्। सःशंकराचार्यः केरलदेशीयः हिमालये तपस्चरितवान्।

रामायणं, महाभारतं, श्रीमद्भागवतं, श्रीमद्भगवद्गीता च सम्पूर्णेभारते समानरूपेण आद्रियन्ते। एतेषां श्लोकाः उद्धरणानि प्रसंगाश्च प्रवचनेषु उपयुज्यन्ते।

– सम्पूर्णेऽपि भारतराष्ट्रे सांस्कृतिककार्यक्रमेषु संस्कारेषु च संस्कृतभाषा एव प्रयुज्यते। द्वादश ज्योतिर्लिङ्गानि, चत्वारि धामानि, विभिन्नतीर्थस्थानानि च सम्पूर्णे राष्ट्रे व्याप्तानि। तेषां महत्त्वं संस्कृतभाषया कीर्तितम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– महाकविः कालिदासः राष्ट्रस्य वर्णनं कुर्वन् इत्थं लिखति–

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरस्तोयनिधीवगाह्य स्थितः पृथिव्या इव मानदण्डः।।

मेघदूतकाव्ये मेघयात्राप्रसङ्गे, रघुवंशे रघोः दिग्विजययात्राप्रसङ्गे, अन्येषु च काव्येषु विविधप्रसंगेषु कालिदासः भारतस्य विभिन्न भौगोलिकस्थानानां सुन्दरं वर्णनं करोति। स च कालिदासः कश्मीरप्रान्तीयः वा उज्जैन प्रान्तीयः वा अन्यप्रान्तीयः वा इति मतभेदाः दृश्यन्ते परं तस्य काव्यानि सम्पूर्णेऽपि राष्ट्रे समानरुचिना पठ्यन्ते।

– राष्ट्रस्य भिन्नभिन्नप्रान्तीयाः कवयः, लेखकाः संस्कृते ग्रन्थान् रचितवन्तः। सुदूरे उत्तरे कश्मीरे कल्हणः, विल्हणः, रुद्रटः, कैय्यटः, जैय्यटः, मम्मटः प्रसिद्धाः। सुदूरदक्षिणे केरलदेशे भासः, शङ्कराचार्यः प्रसिद्धाः। नैयायिकाः विद्वांसः उदयनाचार्यः रघुनाथशिरोमणिः गदाधरभट्टाचार्यः प्रभृतयः बङ्गदेशीयः मिथिला प्रान्तीयाः वा। सुललितकविः जयदेवः उत्कलीयः। इत्थमेव संस्कृतपण्डिताः न सीमितप्रान्ते आसन् अपितु समस्ते राष्ट्रे आसन्।

– कश्मीरप्रान्तीयस्य भरतस्य नाट्यशास्त्रं भरतनाट्यरूपेण दक्षिणे सुरक्षितम्। रामायणेन काशीरामेश्वरयोः तीर्थाटनं सर्वेषां कृते अनिवार्यं जातम्। उत्तरस्य अवतारपुरूषाणां सम्प्रदायाः दक्षिणस्य आचार्यैः रामानुजः शङ्करवल्लभाचार्यैः संरक्षिताः।

एवं प्रकारेण राष्ट्रैक्यसाधकानि बहूनि तत्त्वानि संस्कृतग्रन्थेषु उपलभ्यन्ते। अद्यापि सर्वासु भाषासु अन्तर्प्रवाहिणी संस्कृतधारा राष्ट्रीय–एकतां द्रढ़यति। राष्ट्रभाषायाः हिन्दीभाषायाः सम्पोषणं संस्कृतेनैव भवति। अतः संस्कृतभाषायाः राष्ट्रव्यापकं महत्त्वमस्ति।

६. **अन्ताराष्ट्रियं महत्त्वम् :-**

संस्कृतभाषा प्राचीनकालादेव अन्येष्वपि देशेषु प्रसिद्धा आसीत्। ह्वेनसांग, फाह्यान इत्यादयः वैदेशिकाः यात्रिणः संस्कृतज्ञानस्य प्रचारं कृतवन्तः। गणिते शून्यसिद्धान्तः भारतीयगणितमाध्यमेनैव प्राप्तम्। अरबदेशेषु संस्कृतगणितस्य प्रचारः आसीत्। यवनेषु ज्योतिषशास्त्रस्य प्रचारः आसीत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म्लेच्छा हि यवनास्तेषु सम्यग्शास्त्रमिदं स्थितम्। ऋषिवत्तेपि पूज्यन्ते।

(बृहत् संहिता २. १४)

– वैदिककालादेव संस्कृतरचनासु समस्तविश्वकल्याणस्य भावः वर्णितः।

"उदारचरितानां तु वसुधैव कुटुम्बकम्"

"कृण्वन्तो विश्वमार्यम्"

"यत्र भवेत विश्वमेकनीडम्"

"आनोभद्राः कृतवः यन्तु विश्वतः''

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।"

"संगच्छध्वं संवद्ध्वं सं वो मनांसि जानताम्।"

इत्यादिभिः उक्तिभिः सर्वमानवकल्याणभावना प्रसारिता।

– बौद्धपण्डितैः संस्कृतस्य प्रचारः भारतात् बहिः अपि कृतः। जावा, सुमात्रा इत्यादिषु एशियादेशेषु कृतः।

– अब्दुर्रहीमखानखाना, दाराशिकोह प्रभृतयः मोहम्मदाः अपि संस्कृतम् अधीतवन्तः प्रसारितवन्तश्च।

– चीनदेशे बौद्धसाहित्ये रामायणस्य प्रसङ्गाः लभ्यन्ते। पृथ्वी कच्छपोपरि तिष्ठता इति तेषां विश्वासः आसीत्। स्वस्तिकचिह्नं बुद्धस्य हृदयमिति स्वीकृतम्। खोतानप्रान्ते संस्कृतस्य प्राचीन–विश्वविद्यालयः आसीत्। गणेशपूजा तत्र प्रचलिता आसीत्। मंगोलदेशे गुरुडस्य पूजा क्रियते स्म। मङ्गोलभाषायां दिवसानां नामानि संस्कृतभाषया प्रभावितानि–आदिया (आदित्यवासरः) सोमिया (सोमवासरः) बुधिया (बुधवासरः) सुकर (शुक्रवासरः) संजीव (शनिवासरः)

– विदेशेषु अनेकस्थलानां नामानि संस्कृतनिष्ठानि– ईरान, आयर्लैण्ड (आर्य), काठमाण्डू (काष्ठमण्डपः), पेशावर (पुरुषपुर), कन्धार (गान्धारः) सिंगापुर (सिंहपुर) सुमात्रा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(स्वर्णद्वीपः) जावा (यवद्वीपः) साईबेरिया (शिविरदेशः) लाओस (लावदेशः)

- आङ्ग्लशासनकाले बहवः आङ्ग्लविद्वांसः संस्कृतस्य अध्ययनं संस्कृतग्रन्थानाम् अनुवादं वा कृतवन्तः।
- १७८५ तमे वर्षे चार्ल्स विल्किन्स महोदयः गीतायाः हितोपदेशस्य च अनुवादं कृतवान्।
- १७८३ तमे वर्षे विलियम जोन्स महोदयः संस्कृतप्रचाराय कलकत्तामध्ये रायलएशियाटिक सोसाइटी इति संस्थानं स्थापितवान्।
- १७८६ मे वर्षे जोन्स महोदयः अभिज्ञानशाकुन्तलस्य अनुवादं कृतवान्।
- १७६१ तमे वर्षे जर्मनविद्वान जार्जफास्टन शाकुन्तलस्य जर्मनभाषायां अनुवादं कृतवान्, यत् पठित्वा तत्रत्यः राष्ट्रकविः गेटे अत्यन्तं प्रफुल्लितः बहुप्रशंसां कृतवान्।
- प्रसिद्धः जर्मन दार्शनिकः शोपेनहार उपनिषदः समं दर्शनसाहित्यं नास्ति इतिप्रशंसितवान्।
- १८१४ तमे वर्षे पेरिस विश्वविद्यालये संस्कृताध्यापनं प्रारब्धम्।
- जर्मनदेशे संस्कृताध्ययनस्य महतीपरम्परा दृश्यते। तत्रत्याः मैक्समूलर, डॉ. धीबो जैकोबी, बीटलिंग, गोल्टसटकर, प्रो.किरलसन, जेम्स वेलेंटाईन, फ्रेड्रिक्स लेगल, वेबर, प्रभृतयः प्रमुखाः आसन्।
- चैकोस्लावियादेशे प्राक् विश्वविद्यालयमतिरिच्य चतुर्षु स्थलेषु संस्कृतस्य पठनपाठनं प्रचलति।
- फिनलैण्डदेशे हेलसिंकी विश्वविद्यालये क्रिश्तोः १८३५ वर्षादेव संस्कृतस्य अध्ययनम् अध्यापनं प्रचलति।
- हंगरीदेशे लीडनविश्वविद्यालये क्रिस्तोः १७५० तः संस्कृताध्ययनं प्रारब्धम्।
- इग्लैण्डदेशे ऑक्सफोर्ड, कैम्ब्रिज, लन्दन, एडिनबरा विश्वविद्यालयेषु संस्कृताध्ययनं निरन्तरं प्रचलति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

- हालैण्डदेशे चतुर्षु विश्वविद्यालयेषु संस्कृताध्यापनं प्रचलति।
- अमेरिकादेशेऽपि संस्कृतस्याध्ययनं प्रारब्धमस्ति। तत्र दशाधिक– विश्वविद्यालयेषु अन्यसंस्थासु च संस्कृताध्ययनं प्रचलति। अमेरिकादेशे नगराणां नामानि संस्कृतनिष्ठानि दृश्यन्ते कालीबाव (कालिग्रीवा), कालमक (कालमुख) चयन्त (जयन्त) इत्यादीनि।
- कनाडादेशे कोलम्बिया, साइमनफ्रेजर, टोरन्टो, पिण्डसर तथा च मैकगिल विश्वविद्यालयेषु संस्कृतस्य पठनपाठनं प्रचलति।
- दक्षिण–अमेरिका तथा पेरुदेशस्य लिपेः पुरातात्त्विक–अन्वेषणेन ज्ञातं यत् सा लिपिः सिन्धुनदी सभ्यताकाले प्रचलितलिप्या साम्यं भजते इति।
- पुराणेषु वर्णितानां कुशद्वीपः (न्यूबिया) शाल्मलिद्वीपः, चन्द्रस्थानं (अफ्रीकायाः पूर्वी भागः) शंखद्वीपः (अबिसीनियातः मैडागास्करपर्यन्तं अफ्रीका भू–भागः) इत्यादीनां स्थानानां आलोचनेन ज्ञायते यत् अफ्रीकादेशोऽपि संस्कृतप्रभावितः अस्ति।
- रूस, स्वीडन्, फ्रान्स्, पोलैण्ड, इत्यादिषु देशेषु अपि संस्कृताध्ययनं प्रचलति। इण्डोनेशिया देशे मॉरीशस, फिलीपाइन्स, मलेशिया, इत्यादिषु देशेष्वपि संस्कृतस्य प्रभावः प्रसारः च दृश्यते।

एवं प्रकारेण प्राचीनकालात् विभिन्नदेशेषु संस्कृतस्य अध्ययनं प्रचलति। अद्यापि बहवः वैदेशिकाः संस्कृताध्ययनाय भारतमागच्छन्ति। पञ्चशीलादि विश्व शान्तिस्थापकसिद्धान्तेषु भारतीय दर्शनस्य प्रभावः दृश्यते। संस्कृतसहाय्येनैव विश्वशान्तिः, समरसता, सामञ्जस्यं च सुलभतया सम्भवति। बहवः भारतीयाः विदेशेषु स्थित्वा स्वमूलेन सम्बन्धं स्थापयितुं तत्र वैदेशिक भाषारूपेण संस्कृतं पठन्ति। अतः संस्कृतस्य अद्यापि अन्ताराष्ट्रियं महत्त्वम् अस्ति।

१०. प्रासंगिक महत्त्वम् :-

संस्कृतभाषा न केवलं प्राचीनकालस्य ऐतिहासिकी भाषा अपितु वर्तमानकालेऽपि नित्यम् अधीयमाना व्यवह्रियमाणा भाषा चास्ति। अद्यापि सम्पूर्णे राष्ट्रे विविधरूपेण संस्कृताध्ययनं प्रचलति।

प्रायः १५० विश्वविद्यालयेषु संस्कृताध्ययनार्थं संस्कृतविभागाः सन्ति। देशस्य षट्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतविश्वविद्यालयेषु संस्कृताध्ययनं प्रचलति। दिल्ली, तिरुपति इति द्वयोः मानित विश्वविद्यालययोः राष्ट्रिय–संस्कृत–संस्थानं मानित् विश्वविद्यालयस्य दश परिसरेषु संस्कृताध्ययनं प्रचलति। बड़ौदा, पुणे, कलकत्ता, चेन्नई, तिरुपति इत्यादिषु स्थितेषु प्राच्यशोधसंस्थानेषु शोधकार्याणि प्रचलन्ति। भारतसर्वकारेण संचाल्यमानेषु आदर्शसंस्कृतविद्यापीठेषु संस्कृताध्ययनं प्रचलति। विभिन्नराज्येषु संस्कृतसंस्थाभिः अकादमी संस्कृतकार्यक्रमाः सञ्चाल्यन्ते। सम्पूर्णेऽपि देशे देवालयेषु सांस्कृतिक–उत्सवेषु पारिवारिकसंस्कारेषु च संस्कृतभाषा प्रयुज्यते। संस्कृतभारती, लोकभाषाप्रचार समितिः, सार्वभौसंस्कृतसंस्थान–प्रभृति–स्वैच्छिकसंस्थाभिः संस्कृतस्य प्रचारकार्यं क्रियते।

अद्यापि प्राचीन–अर्वाचीनविज्ञानयोः तुलनात्मक–अध्ययनार्थं संस्कृतस्य आवश्यकता अस्ति। लोकोपयोगी आयुर्वेदः, योगः, वास्तु, ज्योतिष, शास्त्राणां प्रचारार्थं संस्कृतस्य उपयोगिता अस्ति। आकाशवाणी, दूरदर्शनमाध्यमेन संस्कृतकार्यक्रमाः प्रसार्यन्ते। अद्यापि अभिराजराजेन्द्रः, श्रीनिवासरथः रमाकान्त मिश्र, भास्कराचार्य त्रिपाठी, डॉ. विन्ध्येश्वरीप्रसादमिश्रः विनयः, प्रभृतयः संस्कृतकवयः राष्ट्रियस्तरे संस्कृतकविसम्मेलनेषु स्वीयमधुरकाव्यैः रसिकान् आनन्दयन्ति। बहवः लेखकाः इदानीमपि संस्कृते ग्रन्थान् प्रणयन्ति। संस्कृतभाषया बह्व्यः पत्रिकाः निरंतरप्रकाश्यन्ते। अतः संस्कृतभाषा न केवलं श्रेण्यभाषा अपितु प्राचीनकालात् अद्यावधिभारते प्रयुज्यमाना अमृतभाषा अस्ति। अतः वर्तमानकाले तु अस्य प्रासङ्गिकता अस्ति एव भविष्यत् कालेऽपि संस्कृतं सदा प्रासङ्गिकं भविष्यत्येव।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणस्य उद्देश्यानि सिद्धान्ताश्च

अस्माकं देशे संस्कृतशिक्षणं द्विविधं प्रचलति–

१. **पारम्परिक-धारा-**

संस्कृतपाठशालासु पारम्परिकरूपेण संस्कृतमाध्यमेन संस्कृतशिक्षणं प्रचलति। प्राथमिकविद्यानन्तरम् क्रमशः प्रथमा, मध्यमा (पूर्वमध्यमा, उत्तरमध्यमा च) शास्त्री, आचार्येति कक्षाः प्रचलन्ति। एतासु संस्कृतपाठशालासु गहनरूपेण संस्कृताध्ययनं भवति। क्वचित् गौणरूपेण आधुनिकभाषाणां विषयाणां वा समावेशः दृश्यते।

२. **आधुनिक-धारा-**

सामान्यविद्यालयेषु महाविद्यालयेषु च संस्कृतं विषयेषु अन्यतमं भवति। यद्यपि संस्कृताध्ययनस्य प्रारम्भः विविधराज्येषु भिन्न–भिन्न–कक्षातः दृश्यते, तथापि प्रायः षष्ठीकक्षातः आरम्भः भवति। ततः परं माध्यमिकस्तरे, उच्चतरमाध्यमिक स्तरे, स्नातकस्तरे च विषयरूपेण पठ्यते। विश्वविद्यालयेषु स्नातकोत्तरस्तरे केवलं संस्कृतं पठ्यते परं ऐतेषु सर्वेष्वपि स्थलेषु मातृभाषामाध्यमेन, आंग्लमाध्यमेन वा संस्कृतशिक्षणं प्रचलति। अत्र संस्कृतस्य सामान्यमध्ययनं भवति।

संस्कृतपाठशालासु यत्र गहनरूपेण संस्कृतशिक्षणं भवति तत्र छात्राः विरलाः। सामान्यसंस्थासु छात्राणां बाहुल्यं परमत्र गहनाध्ययनं न भवति। एवं हि प्रभावीसंस्कृतशिक्षणं न सम्भवति।

संस्कृतशिक्षणस्य उद्देश्यानि :-

शिक्षाक्षेत्रे पाठ्यविषयाणाम् उद्देश्यानि निश्चितानि भवन्ति। पूर्वनिश्चितोद्देश्यानुगुणं शिक्षणेन शिक्षणस्य मूल्याङ्कनं सुकरं भवति। भाषाशिक्षणस्य उद्देश्यानि विषयशिक्षणस्य उद्देश्योभ्यो भिन्नानि भवन्ति। भाषाशिक्षणेऽपि मातृभाषाशिक्षणस्य उद्देश्येभ्यः अन्यभाषाशिक्षणस्य उद्देश्यानि भिन्नानि भवन्ति। अत्र संस्कृतस्य स्थितिः विचित्रा भवति। यद्यपि भाषा अस्ति संस्कृतं तथापि विषयरूपेण अस्याः महत्त्वमस्ति। भाषारुपेण व्यवहाराभावेऽपि मातृभाषास्वरूपेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साम्यं भजते। संस्कृतं भारतीयसंस्कृतेः आधारः माध्यमं च भवति। अतः सत्स्वपि विभिन्नावास्थासु संस्कृतशिक्षणस्य उद्देश्यानि महत्त्वपूर्णानि भवन्ति।

सामान्य-उद्देश्यानि :-

संस्कृत शिक्षणस्य सामान्योद्देश्यानि अधोनिर्दिष्टानि–

१. **ग्रहणात्मकम् उद्देश्यम् :-** भाषायाः ग्रहणात्मकपक्षो नाम (१)मौखिकविचारान् श्रुत्वा अर्थग्रहणम्, (२) लिखितविचारान् पठित्वा अर्थग्रहणम्। छात्राः संस्कृते मौखिकरूपेण लिखितरूपेण च अभिव्यक्तान् विचारान् ज्ञातुं समर्थाः भवेयुः।

२. **अभिव्यक्त्यात्मकम् उद्देश्यम् :-** भावाभिव्यक्तिः द्विधा भवति मौखिकरूपेण लिखितरूपेण च। अतः छात्राः सरलसंस्कृते शुद्धतया भाषितुं समर्थाः स्युः तथा च सरलसंस्कृते स्वीयविचारान् लिखितरूपेण प्रकटयितुं समर्थाः स्युः। प्रायः संस्कृतशिक्षणे अध्यापकैः ग्रहणात्मक–पक्षस्यैव महत्त्वं दीयते। संस्कृतभाषायाः समाजे परिवारे वा दैनंदिनव्यवहाराभावात् संस्कृतभाषया अभिप्रायप्रकटनं दुष्करमेव भवति। तथापि नियमिताभ्यासेन अभिव्यक्तिकौशलेऽपि छात्राः दक्षाः भवितुम् अर्हन्ति।

३. **सांस्कृतिकम् उद्देश्यम् :-** संस्कृतभाषायाः रक्षणेनैव भारतीयसंस्कृतिः सुरक्षिता भवति। भारतस्य गौरवरक्षार्थं संस्कृतेः संरक्षणम् आवश्यकम्।

अतः संस्कृतशिक्षणे सांस्कृतिकमुद्देश्यम् आवश्यकं भवति। प्राचीनसंस्कृतग्रन्थानां माध्यमेन अथवा तेभ्यः सङ्कलितानां पाठानां माध्यमेन भारतीयसंस्कृतेः परिचयः प्राप्तुं शक्यते।

४. **आध्यत्मिकम् उद्देश्यम् :-** संस्कृतभाषायां बहवः गम्भीराः आध्यात्मिक– विचाराः सरलातिसरलरूपेण प्रतिपादिताः सन्ति। आध्यात्मिकजीवनेन सामाजिक व्यवहारः संतुलितः भवति अतः बाल्यादेव छात्राणां अध्यात्मज्ञानस्य अभिवृद्धियर्थम् एतद् उद्देश्यम् अपेक्षितम्।

५. **नैतिकम् उद्देश्यम् :-** जीवनमूल्यानां ज्ञानं शिक्षायाः परमुद्देश्यम् अस्ति। संस्कृते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पंचतंत्र–हितोपदेशादयः बहवः नीतिकथाः चाणक्यनीतिः विदुरनीतिः सुभाषितानि इति बहवः नीतिश्लोकाश्च उपलभ्यन्ते। मूल्याधारितशिक्षा– विधानार्थं पाठ्यक्रमे एतेषां नैतिकांशानां समावेशः अनिवार्यः। प्रारम्भकालादेव नैतिकोद्देश्यस्य स्वीकरणेन छात्राणां सच्चरित्रतायाः व्यक्तित्वस्य च विकासः भवति।

६. **मनोविनोदात्मकम् उद्देश्यम् :-** संस्कृतसाहित्ये काव्यानां नाटकानां च माध्यमेन रसानुभतिः प्राप्तुं शक्यते। विभिन्नगीतैः प्रहेलिकाभिः कथाभिश्च छात्राणां मनोविनोदोऽपि भवति। संस्कृतभाषायाम् अधिकारं प्राप्य छात्राः संस्कृतसाहित्यस्य स्वाध्यायेन तस्य सौन्दर्यानुभूतिं प्राप्तुं शक्नुवन्ति अतः आनन्देन संस्कृतशिक्षाणार्थम् अस्य उद्देश्यस्य आवश्यकता भवति।

७. **ज्ञानात्मकम् उद्देश्यम् :-** छात्राः संस्कृतभाषायाः स्वरूपस्य व्याकरणनियमानां भाषिकसंरचनानां च सम्यक्ज्ञानं प्राप्नुयुः। संस्कृतग्रन्थेषु निगूढ़ानां विषयाणामपि ज्ञानं प्राप्नुयुः। एवं प्रकारेण संस्कृतभाषायाः साहित्यस्य च अक्षुण्णं ज्ञानं चरमुद्देश्यम् अस्ति।

८. **स्तरानुगुणम् उद्देश्यानि-**

संस्कृतशिक्षणे द्वैविध्यम् अस्ति एव। स्तरानुगुणमपि उभयत्र प्रारंभिक माध्यमिक–उच्चेति त्रयः स्तराः सन्ति। तर्हि धारानुगुणं स्तरानुगुणं च पृथक्–पृथक् उद्देश्यानि भवन्ति।

पारम्परिक धारा	**आधुनिकधारा**
१. **प्रारंभिकस्तरः (प्रथमा)**	१. **षष्ठीतः अष्टमी कक्षापर्यन्तम् (६ तः ८)**
	– सरलगद्यांशानां पद्यांशानां च वाचनक्षमता
– सरलसंस्कृते भाषणक्षमता	– भाषितानां लिखितानां च सरलसंस्कृत वाक्यानां अर्थग्रहणस्य क्षमता।
– सरलश्लोकानां व्याख्यान कौशलम्।	– श्रुत्वा दृष्ट्वा च संस्कृतवाक्यानां लेखन क्षमता।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– अलंकाराणां वृत्तानां च सामान्यज्ञानम्।	– सरलसंस्कृतवाक्यानां प्रयोगकौशलम्
– शब्दरूपाणां, धातुरूपाणां, सन्धि समास–कारक–उपसर्ग–प्रत्यया–दीनां व्याकरणांशानां ज्ञानम्	– सरलसंस्कृतश्लोकानां कण्ठस्थी करणम्।
– सरलसंस्कृतवाक्यानां लेखनकौशलम्	
२. **माध्यमिकस्तरः (पूर्वमध्यमा,उत्तरमध्यमा)**	२. **माध्यमिकस्तरः (६ तः १२)**
– संस्कृतगद्यभागानाम् अर्थबोधस्यक्षमता।	– संस्कृतगद्यभागानां शुद्धतया स्पष्टतया वाचनकौशलम्
– संस्कृतपद्यभागानां अर्थबोधस्यक्षमता।	– संस्कृतश्लोकानां संस्कृत पद्यानां पाठकौशलम्।
– संस्कृतभाषया भाषणस्य लेखनस्य च सामर्थ्यम्।	– संस्कृतगद्यानां पद्यानां च अर्थग्रहणकौशलम्।
– व्याकरणप्रक्रियायाः ज्ञानम्	– संस्कृतवाक्यानां श्लोकानां च सारकथनसामर्थ्यम्
– अलंकाराणां वृत्तानां च सम्यक्ज्ञानम्।	– संस्कृतनिबन्ध रचनासामर्थ्यम्
– संस्कृते पत्राणां निबन्धानां च लेखनक्षमता।	– सरलसंस्कृते भाषणसामर्थ्यम्
३. **उच्चस्तरः (शास्त्री, आचार्यः)**	३. **उच्चस्तरः (बी.ए.,एम.ए)**
– संस्कृते गद्यपद्यरचनासामर्थ्यम्	– काव्यानां तालयानुगुण सस्वरपाठसामर्थ्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– मौखिकरूपेण लिखितरूपेण च संस्कृते विचाराभिव्यक्तेः सामर्थ्यम्।	– प्रौढकाव्यानां गद्यभागानां च अर्थबोधक्षमता।
– संस्कृते विस्तृतव्याख्यानस्य सामर्थ्यम।	– मौखिकरूपेण संस्कृते भावाभिव्यक्तेः क्षमता।
– संस्कृते दीर्घानुच्छेदानां सारलेखनम्।	– संस्कृतग्रन्थानां समीक्षणस्य सामर्थ्यम्।
– संस्कृतग्रन्थानां समीक्षात्मक विमर्शसामर्थ्यम्।	– संस्कृते पत्रलेखनसामर्थ्यम्।
– शास्त्रार्थ–सामर्थ्यम्	– संस्कृते पद्यरचना सामर्थ्यम्।
– अनुसन्धानकार्ये प्रवृत्तिः	– संस्कृतभाषायां अनुसंधानस्य सामर्थ्यम्।

भिन्नस्तरेषु संस्कृतशिक्षणोद्देश्यानि भिन्नानि भवन्ति। परं मूलरूपेण श्रवणभाषणपठनलेखनमिति चतुर्विधभाषाकौशलानां विकासः, साहित्यस्य रसास्वादनं च आधारभूते। अनुवादमाध्यमेन भाषाशिक्षणं १५० वर्षेभ्यः प्राक् एव पाश्चात्यदेशेषु त्यक्तम्। भाषान्तरसहयोगं विना प्रत्यक्षं पाठ्यभाषायाः शिक्षणं मनोवैज्ञानिकं भवति। अतः उपरोक्तेषु उद्देश्येषु अनुवादस्य ग्रहणं न कृतम्। प्रत्यक्षं संस्कृतमाध्यमेन संस्कृतशिक्षणस्य प्रयासः विधेयः। संस्कृतं भाषारूपेण पाठ्नीयम् विषयरूपेण वा इति मतभेदः निरर्थकः। मूलरूपेण संस्कृतं भाषा अस्ति। अतः संस्कृतभाषायाः ज्ञानं विषयावगाहने सहायकं भवति न तु विरोधाय। अतः भाषाज्ञानं प्रथमं सोपानं, ततः परं विषयबोधः इति अवधेयम्। यदि भाषा एव कठिना प्रतीयते तर्हि विषयबोधे कथं सारल्यं भवितुं शक्नोति? संस्कृतभाषायाम् अधिकारं प्राप्य संस्कृतविषयाणां बोधः सारल्येन भवति।

संस्कृतशिक्षणस्य सामान्यसिद्धान्ताः :–

भाषा भावाभिव्यक्तेः सर्वोत्तमं साधनमस्ति। भाषार्जितसम्पत्तिरस्ति। अतः अनुकरणेन अभ्यासेन च भाषाज्ञानं संभवति। भाषाशिक्षणार्थं निर्धारिताः सिद्धान्ताः मनोविज्ञानाधारेण भवन्ति। ते एव संस्कृतभाषाशिक्षणस्यापि सामान्यसिद्धान्ताः भवन्ति। तद्यथा–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१. **स्वाभाविकता-सिद्धान्तः :-**

भाषा जन्मजाता प्रवृतिरस्ति। भाषाज्ञानार्थं मनुष्याणां स्वाभाविकी प्रवृत्तिः भवति। बाल्ये शिशवः सहजरूपेण स्वाभाविकरूपेण च गृहे मातृभाषां शिक्ष्यन्ते। अनायासेन च तेषां भाषाज्ञानं भवति। तद्वत् स्वाभाविकरूपेण संस्कृतशिक्षणस्य प्रयासाः विधेयाः। संस्कृतभाषायाः सामान्यव्यवहाराभावात्, यद्यपि एतत् कठिनं तथापि संस्कृताध्यापकः प्रारंभिककक्षातः एव छात्राणां पुरतः संस्कृतश्लोकोच्चारणेन, सरलसंस्कृतसम्भाषणेन संस्कृतभाषाशिक्षणानुकूलं संस्कृतमयं वातावरणं निर्मातुं शक्नोति। तादृशे कृत्रिमेऽपि संस्कृतवातावरणेऽपि स्वाभाविकरूपेण संस्कृतभाषां प्रति छात्राः आकृष्टाः भवेयुः।

२. **अभ्यासस्य सिद्धान्तः :-**

भाषा काचित् कौशलं भवति। यथा अभ्यासेन कौशलं वर्धते तथैव अभ्यासेन भाषाकौशलमपि वर्धते। संस्कृतभाषा मातृभाषा व्यवहारभाषा वा नास्ति, अतः संस्कृतभाषाज्ञानार्थं अभ्यासस्य महती आवश्यकता अस्ति। अभ्यासः द्विविधः भवति मौखिकः लिखतश्च। अभ्यासकाले अधोलिखिताः अंशाः अवधेयाः–

- कठिनवर्णानाम् उच्चारणाभ्यासः –क्ष, त्र, ज्ञ, ऋ, इत्यादयः
- संयुक्तवर्णानाम् उच्चारणाभ्यासः
- कठिनशब्दानाम् उच्चारणाभ्यासः
- वाक्यानां सुष्टुरूपेण कथनाभ्यासः
- सुभाषितानां श्लोकानां च सुष्टुरूपेण कथनाभ्यासः
- अक्षरविन्यास–दोषाणां निवारणम्
- व्याकरणगत दोषाणां निवारणम्

३. **रुचेः सिद्धान्तः :-**

रुचिपूर्णे वातावरणे छात्राः उल्लासेन उत्साहेन च शिक्षन्ते। अतः छात्रेषु संस्कृताध्ययनं प्रति अनुरागः उत्पादनीयः। तदर्थं दृश्यश्रव्योपकरणानां प्रयोगः करणीयः। संस्कृतपाठ्यपुस्तकानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रोचकानि आकर्षकानि च भवेयुः। श्लोकानां गानं मधुरं स्यात्। भाषाक्रीडानां प्रयोगः करणीयः। छात्रैः सह स्नेहपूर्वकः व्यवहारः करणीयः।

४. **सक्रियता-सिद्धान्तः :-**

सक्रियता–शिक्षणप्रक्रियायां भवति। यदि छात्राः निष्क्रियाः भवन्ति तर्हि तेषां शिक्षणगतिः मन्दा भवति, अतः संस्कृतशिक्षकः छात्रान् सक्रियान कृत्वा पाठयेत्। येन ते तीव्रगत्या ग्रहणे समर्था भवेयुः। छात्रेभ्योऽपि कथनस्य, भाषणस्य, अभिप्रायप्रकटनस्य पर्याप्तः अवकाशः देयः।

५. **मौखिककार्यस्य सिद्धान्तः :-**

भाषाध्ययनं श्रवणेन्द्रियेण भाषणेन च प्रारभ्यते अतः प्रथमं लिखितकार्यस्यापेक्षया मौखिककार्यस्य प्राधान्यम्। अतः संस्कृतभाषा श्रवणस्य भाषणस्य च युगपत अभ्यासेन छात्राः सक्रियाः अपि भवन्ति, उच्चारणे शुद्धताऽपि आयाति। पूर्व–अभ्यस्तेन मौखिककार्यस्याधारेण लिखितकार्यस्याभ्यासोऽपि सुकरः भवेत्।

६. **अनुकरणस्य स्वयं संशोधनस्य च सिद्धान्तः :-**

अनुकरणेन अभ्यासः भवति। अनुकरणेनैव छात्राः स्वकीयान् दोषान् स्वयं संशोध्य शुद्धोच्चारणे समर्थाः भवन्ति। स्वयं संशोधनेन शुद्धरूपस्य संस्कारः दृढः भवति।

७. **अनुपातस्य क्रमस्य च सिद्धान्तः :-**

बहूनि उद्देश्यानि सन्ति, बहूनि कौशलानि सन्ति, सर्वेषां युगपत् आश्रयेण छात्राः दिग्भ्रमिताः न भवेयुः अतः तार्किकाधारेण मनोवैज्ञानिकाधारेण च सर्वेषां अनुपातः क्रमश्च निर्धारणीयः। विविधसन्दर्भानुगुणं स्तरानुगुणं च प्राथमिकतानिर्धारणं करणीयम्। महत्त्वानुगुणं पूर्वापरनिर्धारणम् च करणीयम्।

८. **स्वतन्त्रतायाः वैयक्तिक-भिन्नतायाश्च सिद्धान्तः :-**

स्वतंत्रवातावरणे छात्राः भाषाग्रहणे आत्मप्रकाशने च उन्मुखाः भवन्ति। स्वतंत्रवातावरणे एव छात्राणां वैयक्तिकभिन्नतानां विषये अवधानं दातुं शक्यते। योग्यता, रूचिः प्रवृत्तिः, अभिवृत्तिः संवेगः, शारीरिकक्षमता इत्यादीनाम् आधारेण छात्रेषु भिन्नता दृश्यते। एतादृशेन वैयक्तिभेदाधारेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहणे अभिव्यक्तौ च भेदः भवति। सर्वेषां छात्राणां भाषायोग्यता समाना न भवति अतः स्वतन्त्रवातावरणे वैयक्तिक–भेदानुगुणं छात्राः सम्यक् प्रोत्साहनीयाः शिक्षणीयाश्च।

शिक्षणसूत्राणि :-

विभिन्नविषयाणां अध्यापने उपयुज्यमानानि कानिचन शिक्षणसूत्राणि सन्ति। एतानि सूत्राणि मनोवैज्ञानिकानि सन्ति। प्रसिद्धः शिक्षाविद् हरबर्ट स्पेंसर महोदयोऽपि एतेषां समर्थनं करोति। संस्कृतशिक्षणेऽपि एतानिसूत्राणि प्रयोक्तुं शक्यन्ते :–

१. **ज्ञातात् अज्ञातं प्रति :-**

पूर्वज्ञानस्य पूर्वानुभवस्य च आधारेण क्रमशः नवीनपाठस्य अज्ञातविषयस्य वा अध्यापनम्।

२. **सरलात् कठिनं प्रति :-**

प्रथमं सरलविषयः बोधनीयः ततः परं क्रमशः कठिनविषयः। यथा प्रथमं दीर्घसन्धि ततः परमेव क्रमशः गुण–यण–अयादि।

३. **स्थूलात् सूक्ष्मं प्रति :-**

प्रथमं स्थूलवस्तुभिः उदाहरणैः विषयः प्रस्तोतव्यः अनन्तरमेव तत्र गूढः सूक्ष्मः नियमः बोधनीयः।

४. **पूर्णात् अंशं प्रति :-**

मनोवैज्ञानिक दृष्ट्या विवेचनीयस्य विषयस्य समग्रं रुपं प्रथम् उपस्थाप्य क्रमशः अवयवानाम् विश्लेषणम् करणीयम्।

५. **अनुभवात् तर्कं प्रति :-**

अनुभूतविषयाणाम् आधारेण लब्धं ज्ञानं स्पष्टं स्थिरं च भवति। अनुभवानां स्मरणानन्तरं तेषां तार्किकविश्लेषणं करणीयम्।

६. **विशेषात् सामान्यं प्रति :-**

एतदेव उदाहरणेभ्यः नियमं प्रति इत्यपि वक्तुं शक्यते। प्रथमं उदाहरणानि प्रस्तूयन्ते ततः परम् सामान्यनियमः बोध्यते। व्याकरणशिक्षणे अस्य विशेषः उपयोगः भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७. **विश्लेषणात् संश्लेषणं प्रति :-** अत्र प्रथमं विश्लिष्टांशाः पृथक्–पृथक् बोध्यन्ते, ततः परं तेषां संश्लेषणेन समग्रं स्वरूपं प्रस्तूयते। सन्धि–समास–प्रकृतिप्रत्यायादिबोधने अस्य उपयोगः कर्तुं शक्यते।

८. **अनिश्चतात् निश्चितं प्रति :-**

प्रारम्भे छात्राणां विभिन्नवस्तूनां ज्ञानम् अस्पष्टम् अनिश्चतं च भवति। तत्स्पष्टं निश्चितं च कर्तुं एतत् सूत्रमस्ति। छात्राः प्रथमं रामशब्द इव हनुमान शब्दस्यापि रूपाणां प्रयोगं कुर्वन्ति। अध्यापकः तत्र भेदं स्पष्टीकुर्यात् शब्द इव निश्चितज्ञानं च दद्यात्–अकारान्तः, नकारान्तः इति वा।

९. **ज्ञानेन्द्रिय-आकर्षणम् :-**

ज्ञानेन्द्रियाणाम् आकर्षणेन, तन्माध्यमेन शिक्षणं मनोवैज्ञानिकं भवति।

१०. **प्रकृतेः अनुसरणं :-**

प्राकृतिकवातावरणे प्रकृतेः स्वरूपज्ञानं सुकरं भवति। अतः तदनुगुणमेव शिक्षणं सहजं स्वाभाविकं च भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।। संस्कृतशिक्षणस्य विधयः ।।

संस्कृतभाषा कठिना इति अद्यत्वे छात्राः अनुभवन्ति। भाषा तु प्राचीनकालादारभ्य तथैव अस्ति। पुरा अनया संस्कृत भाषया समाजे व्यवहारः प्रचलति स्म। विविधग्रन्थाश्च ज्ञानविज्ञानस्य प्रणीताः। कदाचित् संस्कृतभाषाशिक्षणे आश्रियमाणाः विधयः कारणानि भवेयुः कठिनताविषये। यावत् श्रवण–भाषण–पठन–लेखनेति–चतुर्विध भाषाकौशलानां विकासः न भवति तावत् यः कोऽपि विधिः संस्कृत भाषायाः सम्पूर्णरूपेण शिक्षणे न समर्थः भवति। संस्कृत शिक्षणे प्रयुज्यमानानां विधीनां चर्चा अस्मिन् अध्याये करिष्यामः।

संस्कृतशिक्षणे अधोनिर्दिष्टाः विधयः प्रयुज्यन्ते-

(क) पारम्परिकविधिः पाठशाला विधिर्वा

(ख) भण्डारकरविधिः

(ग) पाठ्यपुस्तकविधिः

(घ) प्रत्यक्षविधिः

(ङ.) समाहारविधिः

(क) पारम्परिक विधिः :-

पारम्परिक संस्कृत पाठशालासु आश्रमेषु गुरुकुलेषु मठेषु च संस्कृतशिक्षणाय एष विधिः विख्यातः :–

– अस्मिन् विधौ उपनयनसंस्कारेण शिक्षारम्भः भवति स्म।

– छात्राः गुरुकुले नित्यकर्मादिभिः निवृत्ताः गुरोः सुश्रूषां कुर्वन्तः तस्य आज्ञया विद्याग्रहणं कुर्वन्ति स्म।

– गुरुशिष्ययोर्मध्ये पितापुत्रयोरिव प्रगाढसम्बन्धः भवति स्म।

– छात्राः पूर्णरुपेण ब्रह्मचर्यव्रतमाचरन्ति स्म।

– पाठ्यक्रमे द्वादशवर्षाणां वेदाध्ययनमनिवार्यमासीत् ततः परं षड्वेदाङ्गानां षड्दर्शनानां चाध्ययनम्, कालान्तरे धर्मशास्त्रस्य, अर्थशास्त्रस्य, अन्य व्यावहारिककलानां काव्यनाटकादीनां वा अध्ययनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– शिक्षणं मौखिकं भवति स्म, अथ च कण्ठस्थीकरणाय महत्त्वं प्रदत्तम् यतोहि –

पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्।।

पारम्परिकविधौ अधोनिर्दिष्टाः शिक्षणविधयः प्रयुक्ताः।

१.	मौखिकविधिः	२.	पारायणविधिः	३.	सूत्रविधिः
४.	प्रश्नोत्तरविधिः	५.	वाद–विवादविधिः	६.	कथाकथनविधिः
७.	कक्षानायकविधिः	८.	भाषणविधिः	६.	व्याख्याविधिः
१०.	व्याकरणविधिः				

१. मौखिकविधिः :-

गुरुः स्वयं वेदमन्त्राणामुच्चारणं करोति स्म अथवा शास्त्रीयविषयान् मौखिकरूपेण कथयति स्म। छात्राः तस्यैव अनुकरणं कृत्वा तान् विषयान् कण्ठस्थं कुर्वन्ति स्म। छात्राणाम् उच्चारणदोषान् गुरुः व्यक्तिगतरूपेण संशोधयति स्म।

२. पारायणविधिः :-

अर्थावबोधनविनाऽपि वैदिकमन्त्राणां सस्वरपाठः पारायणम् इत्युच्यते। अनेन क्रमेण श्रुतिपरम्परया वेदमन्त्राणां कण्ठस्थीकरणं बहुवारं पारायणेन भवति स्म।

३. सूत्रविधिः :-

व्याकरणदर्शनादिगम्भीरविषयाणाम् अध्ययनार्थं सूत्रविधिः प्रयुज्यते स्म। सूत्रमाध्यमेन विषयाणां ग्रहणे धारणे च सौविध्यं भवति। यतोहि –

"अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

सूत्राणामर्थबोधार्थं भाष्यं टीका वा अनुश्रियते स्म

४. प्रश्नोत्तर विधिः :-

प्रश्नोत्तरमाध्यमेन सरलरीत्या रुचिपूर्णरीत्या च छात्राणां विषयावबोधः जायते। अस्मिन् विधौ छात्राः सदा सक्रियाः चिन्तनशीलाः दत्तावधानाश्च भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५. **वाद-विवादविधिः :-**

ज्ञानप्रदर्शनाय परस्परं छात्रेषु वाद–विवादस्य शास्त्रार्थस्य वा आयोजनं भवति स्म।

६. **कथाकथनविधिः :-**

रोचकरूपेण विषयाणां स्पष्टीकरणार्थमुपनिषदः हितोपदेशस्य पञ्चतन्त्रस्य वा कथाः मध्ये–मध्ये श्रावयित्वा तन्माध्यमेन व्याख्यानम्।

७. **कक्षानायकविधिः :-**

मेधाविनः छात्राः अध्यापनकार्ये सहकुर्वन्ति स्म। गुरोः अस्वस्थे सति अनुपस्थितौ अथवा गुरोः आदेशेन एते मेधाविनः छात्राः अन्यान् छात्रान् पाठयन्ति स्म। परं गुरोरिव अन्यछात्रैः सेवासुश्रुषायाम् एते अधिकारिणः नासन्। अनेन विधिना मेधाविछात्राणां ज्ञानं परिपुष्टं भवति, ते शिक्षक–प्रशिक्षणं प्राप्नुवन्ति, तेषु आत्मविश्वासः दृढ़ीभवति, गुरोः कार्यभारश्च न्यूनः भवति।

८. **भाषणविधिः :-**

भाषणविधौ विषयाणां स्पष्टावबोधार्थं गुरवः उदाहरण प्रत्युदाहरण–अन्तर्कथादीनां माध्यमेन विस्तृतं व्याख्यानं यच्छन्ति स्म।

९. **व्याख्याविधिः :-**

छात्राणां शंकासमाधानार्थं व्याख्याविधिः आश्रियते। व्याख्या षड्विधं भवति–

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम्।।

१०. **व्याकरणविधिः :-**

भाषायाः प्राणतत्त्वं भवति व्याकरणम् अतः पारम्परिकविधौ भाषाशुद्ध्यर्थं आदौ व्याकरणाध्ययनम् अनिवार्यमासीत्। व्याकरणमुखेनैव शास्त्राणां काव्यानां नाटकानां वा अध्ययनेन भाषाज्ञानं दृढं भवति, तत्प्रयोगे च आत्मविश्वासः दृढ़ः भवति।

पारम्परिकविधेः गुणाः :-

– अयं विधिः संस्कृतभाषादक्षतायामत्यन्तोपयोगी।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– अयं विधिः संस्कृतवाङ्मयस्य संरक्षणे भारतीय–संस्कृतेः च संरक्षणे उपयोगी।

– छात्रेषु स्वाध्यायप्रवृत्तिः दृढा भवति।

– छात्राणां स्मरणशक्तेः विकासः भवति।

– छात्रेषु आध्यात्मिकभावस्य विकासे अयं विधिः सहयोगी भवति।

– छात्रेषु अनुशासनप्रवृत्तेः विकासे नैतिकमूल्यानां च विकासे अयं विधिः सहकरोति।

पारम्परिकविधेः न्यूनताः :-

– छात्राणां सर्जनात्मकशक्तेः विकासः न भवति।

– कण्ठस्थीकरणस्य उपरि बलप्रदानेन मौलिक–चिन्तन – प्रक्रिया अवरुद्धा भवति।

– व्याकरणप्रधानत्वात् अयं विधिः नीरसः भवति।

– अयं विधिः मन्दबुद्धिछात्राणां कृते उपयोगी न भवति।

– वर्तमानकाले सीमितसमये विविध विषयैः सह संस्कृत – शिक्षणे अस्य विधेः प्रयोगः दुष्करः।

– अस्मिन् विधौ साहित्यस्य सर्वे अङ्गाः न पाठ्यन्ते।

निष्कर्षः :-

यद्यपि वर्तमानकाले अस्य विधेः व्यापकप्रयोगः न संभवति तथापि गम्भीरशास्त्राणाम् अध्यापने संस्कृत – पण्डितानां निर्माणे च अयमेव विधिः समर्थः।

(ख) भण्डारकरविधिः :-

अयं विधिः व्याकरणानुवादविधिः इत्यपि उच्यते। आंग्लशासनकाले अस्य विधेः संस्कृत – शिक्षणे प्रयोगः प्रारब्धः। इंग्लैंडदेशे ग्रीकलैटिन् इति विदेशी भाषयोः अध्यापने व्याकरणानुवादविधिः आश्रितः। तद्वत् आंग्लभाषाविज्ञानां कृते संस्कृतभाषाशिक्षणार्थं व्याकरणानुवादविधिः सहायकः अभूत्। भारतदेशे सर्वप्रथमं डॉ. रामकृष्णगोपाल भण्डारकरमहोदयः संस्कृतशिक्षणे अमुं विधिम् आश्रितवान्। अतएव तस्य नाम्ना भण्डारकरविधिः इति प्रसिद्धः। भण्डारकरमहोदयः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणाय द्वे पुस्तके रचितवान्

A Book of Sanskrit / Part - I

A Book of Sanskrit / Part - II

अत्र पाठ्यांशाः चतुर्धा विभक्ताः

क. व्याकरणाधारितपाठाः

ख. अभ्यासः

ग. संस्कृतभाषातः मातृभाषायामनुवादः

घ. मातृभाषातः संस्कृते अनुवादः

अन्ते शब्दकोषोऽपि दत्तः।

कीलहार्न मोनियर विलियम, मैक्डोनल प्रभृतयः पाश्चात्यविद्वांसः आंग्लमाध्यमेन संस्कृतशिक्षणार्थं व्याकरणविधिमाश्रितवन्तः। वामनशिवरामआप्टे महोदयः उच्चकक्षाछात्राणां कृते रचिते The students guide to sanskrit composition इति पुस्तके अमुमेव विधिमाश्रितवान्।

भण्डारकरविधेः गुणाः :-

– प्रत्येकोऽपि पाठः स्वयं स्वतंत्रः। अन्वितिः भवति। अतः पुस्तकं तु स्वयमेव पथप्रदर्शकं भवति।

– व्याकरणनियमानां मनोवैज्ञानिकरूपेण प्रस्तुतिः भवति।

– छात्रेषु स्वाध्यायप्रवृत्तेः विकासः भवति।

– सामूहिकशिक्षणे अस्य विधेः प्रयोगेण अल्पेनैव कालेन अल्प श्रमेण अल्प धनेन च अधिकाधिकछात्राणां शिक्षणं संभवति।

भण्डारकरविधेः न्यूनताः :-

– एष विधिः प्रारम्भिकस्तरे आश्रययोग्याः नास्ति।

– एष विधिः नीरसः एकांगी च भवति यतोहि व्याकरणानुवादयोरेव अत्र स्थानम् अस्ति।

– भाषायाः विविधपक्षाः–उच्चारणं मौखिककार्यं पद्यानां रसानुभूतिः गद्यनाटकादीनां शिक्षणम् इत्यादयः उपेक्षिताः भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निष्कर्षः :-

न्यूनतासु सत्सु अपि स्वतंत्ररूपेण स्वाध्यायमाध्यमेन संस्कृतशिक्षणार्थमयं विधिः आश्रयितुं योग्यः।

(ग). पाठ्यपुस्तकविधिः :-

विभिन्नकक्षास्तरानुगुणं स्तरित पाठ्यपुस्तकानां माध्यमेन संस्कृत भाषाशिक्षणार्थं पाठ्यपुस्तकविधिः प्रवृत्तः। अस्य विधेः समर्थकस्य डॉ. वेस्ट महोदयस्य मतानुसारं पाठ्यपुस्तकानि तथा सुनियोजितरूपेण रचनीयानि येन छात्राः यदा विद्यालयं त्यजन्ति तदा पठितांशस्य ज्ञानम् अवश्यं तेषु दृढं भवेत्।

- पठितांशेन अधिकाधिक ज्ञानार्जनं अस्य विधेः महत्वपूर्णः अंशः एतदेव तत्तद् पाठ्यपुस्तकस्य प्रत्यर्पणमूल्यं (Surrender Value) भवति।
- विविधकक्षापाठ्यपुस्तकानां पूर्वनियोजितरूपेण स्तराद्यङ्कनं भवति।
- स्तराणां आधारेण शब्दावली, पाठ्यांशाः, व्याकरणांशाश्च वर्गीकृताः भवन्ति।
- गद्य–पद्य–नाटकादीनां समानानुपातेन पाठ्यांशाः चिताः भवन्ति।
- पाठ्यांशानां रोचकतावर्धनार्थं चित्राणाम् अपि प्रयोगः भवति।
- अस्मिन् विधौ पाठ्यपुस्तकस्य पाठाः एव सम्पूर्णाध्ययनस्य केन्द्रबिन्दवः। अतः छात्राः अध्यापकाश्च निश्चित पाठ्यांशस्य अध्ययनम्–अध्यापनम् कुर्वन्ति।
- अत्र पाठाः न केवलं प्राचीनग्रन्थेभ्यः स्वीक्रियन्ते अपितु छात्राणां जीवन–सम्बद्ध–सामाजिकवातावरणाधारिताः पाठाः अपि स्थाप्यन्ते।

पाठ्यपुस्तकविधेः गुणाः :-

अयं विधिः अत्यन्त मनोवैज्ञानिकः।

- संस्कृतभाषां प्रति रुच्युत्पादने एष विधिः लाभदायकः।
- अस्मिन् विधौ वाचनकौशलस्य विकासाय पर्याप्तावकाशः विद्यते।
- छात्राणां श्रवणभाषणपठनलेखनेति चतुर्विधभाषाकौशालानां विकासे अयं विधिः समर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– अनेन विधिना संस्कृतशिक्षणे नियमितता समरूपता च संभवति।

– अयं विधिः छात्रेषु संस्कृतभाषाविषये जिज्ञासोत्पादकः।

पाठ्यपुस्तकविधेः न्यूनताः :-

– अस्मिन् विधौ मौखिकलिखिताभिव्यक्तयोः पर्याप्तावकाशः न भवति।

– व्याकरणस्य क्रमबद्धज्ञानं न भवति।

– छात्राणाम् अध्यापकानां च दृष्टिः पाठ्यपुस्तकपर्यन्तमेव सीमिता भवति।

– छात्रेषु समीक्षात्मकदृष्टिकोणस्य विकासः न भवति।

निष्कर्षः :-

कुशलाध्यापकः पाठ्यपुस्तकाधारेण संस्कृतवाङ्मयस्य विविधानाम् अंशानां अध्ययनाय छात्रान् प्रेरयितुं शक्नोति। सीमिते काले संस्कृतशिक्षणाय अयं विधिः समर्थः।

(घ). प्रत्यक्षविधिः :-

व्याकरणानुवादविधेः अमनोवैज्ञानिकत्वात् स्वाभाविकरूपेण भाषाशिक्षणार्थं प्रत्यक्षविधिः प्रवृत्तः। प्रायः १५० वर्षेभ्यः प्राक् इंग्लैंडदेशे विदेशीयभाषाणां अध्यापने एष विधिः प्रारब्धः।

– भाषान्तरसहयोगेन विना साक्षात् शिक्ष्यमाणभाषया एव अध्यापनं प्रत्यक्षविधौ भवति।

– अयं विधिः Mothers Method (मातृविधिः) इत्यपि उच्यते, यतोहि मातृभाषावत् स्वाभाविकरूपेण अनुवादेन विना भाषाशिक्षणं अस्मिन् विधौ संभवति।

– अस्मिन् विधौ मौखिककार्यस्य प्राधान्यम् अस्ति।

– अस्मिन् विधौ पदपदार्थयोः मध्ये साक्षात् सम्बन्धं स्थाप्य अध्यापनं भवति।

– संस्कृतशिक्षणे अस्य विधेः प्रयोगः सर्वप्रथमं प्रो. वी.पी. बोकिल महोदयः मुम्बईनगरस्य अलफिन् स्टोन हाईस्कूलमध्ये (Alphinstone) कृतवान्।

– A new approach to Sanskrit by Bokil & Parsnis इत्यस्मिन् पुस्तके संस्कृतशिक्षणे अस्य विषयस्य उपयोगिता सम्यक् प्रतिपादिता।

– अस्मिन् विधौ भाषान्तरसहयोगेन विना संस्कृतशिक्षणं स्वतंत्ररूपेण क्रियते। अनेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभ्यस्ताः छात्राः संस्कृतभाषया चिन्तयेयुः स्वाभिप्रायान् च संस्कृतेन एव प्रकटयेयुः।

– सम्यक् अभ्यासेन छात्राः मातृभाषावत् संस्कृते व्यवहारेऽपि दक्षाः भवेयुः।

प्रत्यक्षविधेः गुणाः :-

– अयं विधिः संस्कृतभाषाशिक्षणार्थं सर्वोत्तमः यतोहि संस्कृत–माध्यमेनैव संस्कृताध्ययनं भवति।

– अस्मिन् विधौ श्रवणभाषणपठनलेखनेति चतुर्विधभाषाकौशलानां विकासाय पर्याप्तावकाशः लभ्यते।

– अस्मिन् विधौ छात्राः अध्यापकाः च सर्वेऽपि सक्रियाः भवन्ति।

– संस्कृतशिक्षणे रोचकता भवति।

– छात्राः संस्कृतभाषायाः व्यवहारे दक्षाः भवन्ति।

प्रत्यक्षविधेः न्यूनताः :-

– प्रत्यक्षविधिना संस्कृतशिक्षणार्थं समर्थानां शिक्षकाणाम् अभावः।

– अनेन विधिना गम्भीरविषयाणाम् अध्यापनं दुष्करम्।

– अयं विधिः प्रतिभाशालि–छात्राणां कृते लाभदायकः।

– अयं विधिः श्रमसाध्यः समयसाध्यश्च परन्तु विद्यालयेषु संस्कृताध्यापनाय कालांशाः सीमिताः भवन्ति।

– अस्मिन् विधौ छात्रेषु व्यक्तिगतावधानम् अपेक्षितमम् अतः सामूहिककक्षाशिक्षणे काठिन्यं भवति।

– संस्कृतं व्यवहारभाषा नास्ति। अतः अनेन विधिना संस्कृतशिक्षणस्य गतिः मन्दायते।

निष्कर्षः :-

सरलरूपेण स्वाभाविकरूपेण च संस्कृतशिक्षणार्थं प्रत्यक्षविधिः समाश्रयणीयः। 'भाष्यते इति भाषा' सर्वाः भाषाः तत्तत् भाषामाध्यमेनैव पाठ्यन्ते अतः संस्कृतमाध्यमेन संस्कृतशिक्षणार्थं अयमेव विधिः सूपयुक्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(ड.) **समाहारविधिः :-**

सर्वेषां विधीनां विमर्शणेन दृष्टं यत् न कोऽपि विधिः सर्वांगपूर्णः अस्ति। परञ्च सर्वेष्वपि विधिषु केचन् समाश्रयणीयाः गुणाः अवश्यं सन्ति। अथ च तेषां न्यूनताः दूरीकृत्य संयुक्तरूपेण सर्वेषां गुणानां योगेन संस्कृतशिक्षणाय कश्चन समाहार– विधिः आश्रयणीयः।

– संस्कृतशिक्षणे कण्ठस्थीकरणस्य महत्त्वम् अस्ति। धातुरूपाणां शब्दरूपाणां कण्ठस्थीकरणेन संस्कृतव्यवहारे महद् उपकारः भवति।

– व्याकरणांशानां सम्यक् ज्ञानेन भाषाशुद्धिर्भवति।

– पाठ्यपुस्तकानां माध्यमेन शिक्षणे विविधता भवति। निर्धारित–पाठ्यदिशा सुनिश्चिता भवति, व्यापकज्ञानार्थं जिज्ञासा अपि उत्पद्यते एव।

– साक्षात् संस्कृतमाध्यमेनैव शिक्षणेन संस्कृतभाषायाः मौलिकरूपं सुरक्षितं भवति। स्वाभाविकरूपेण च संस्कृतव्यवहारः संभवति।

अतएव उपर्युक्तानां अंशानाम् आधारेण संयुक्तरूपेण सम्प्रेषणाधारित–संस्कृत–शिक्षणम् अपेक्षितम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गद्यशिक्षणम्

संस्कृतगद्यस्य महत्त्वम् :– संस्कृतवाङ्मये गद्यसाहित्यस्य रचना वैदिक– ग्रन्थादेव प्रारब्धा। यजुर्वेदे सर्वप्रथमं गद्यरूपस्य दर्शनं भवति। तैत्तरीयसंहितायां गद्यस्य विशिष्टं रूपं दृश्यते। ब्राह्मणग्रन्थानां स्वरूपं गद्यमयमेव। उपनिषद्ग्रन्थेष्वपि गद्यभागस्य प्राधान्यमस्ति। आरण्यकग्रन्थेष्वपि गद्यभागस्य बाहुल्यम्। दर्शनादिशास्त्रेषु प्रयुक्तं गद्यरूपं प्रौढ़म् अस्ति। महर्षिपतञ्जलेः महाभाष्ये तु गद्यस्य रमणीयं सरलं च रूपं कथोपकथनशैल्यां दृश्यते।

गद्यशब्दः 'गद्' धातोः व्युत्पन्नः, यस्य अर्थः भवति 'स्पष्टकथनम्'। पद्येऽलंकाराणां प्रयोगेण व्यंजनादीनां प्रयोगेण च भावः प्रकाशितः न भवति परं गद्यरूपेषु सरलविधिना भावाः स्पष्टाः भवन्ति। "वृत्तबन्धरहितं गद्यम्" इति साहित्यदर्पणकारस्य विश्वनाथस्य मतम्। तन्नाम गद्ये छन्दसां बन्धनं न भवति 'अथादः पदसन्धानो गद्यम्'। इति आचार्यः दण्डी अभिप्रैति अर्थात् स्पष्टरूपेण अनलंकृतभाषया सुबन्त–तिङन्त– पदसमुदाययुक्त–वाक्ययोजनारूपं गद्यमिति। अतएव प्रभावपूर्णगद्यरचना दुष्करा इति कृत्वा–"गद्यं कवीनां निकषं वदन्ति" इत्युच्यते। बाणभट्टरचितं 'कादम्बरी' इति गद्यकाव्यं संस्कृतसाहित्यस्य अत्यन्तं रमणीयं सर्वोत्कृष्टं गद्यकाव्यम् अस्ति। अत्र समासभूयिष्ठानि अत्यन्तविस्तृतवाक्यान्यपि सन्ति, सरलातिसरलानि सुबोधानि वाक्यान्यपि सन्ति। मनोहारि वर्णनमपि अस्ति। हृदयस्पन्दरहस्यमपि निगूढमस्ति। अतएव 'बाणोच्छिष्टं जगत् सर्वम्' इति प्रसिद्धम्।

प्रमुखानि संस्कृत गद्य काव्यानि :-

लेखकाः	**पुस्तकानि**
बाणभट्टः	कादम्बरी, हर्षचरितम्
दण्डी	दशकुमारचरितम्
सुबन्धुः	वासवदत्ता
धनपालः (१०वीं शताब्दी)	तिलकमञ्जरी
वादीभसिंहः	गद्यचिन्तामणिः
मेरुतुङ्गाचार्यः (१४वीं शताब्दी)	प्रबन्धचिन्तामणिः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राजशेखरः (१४वीं शताब्दी)	प्रबन्धकोषः
वामनभट्टः (१५वीं शताब्दी)	वेमभूपालचरितम्
बल्लासेनः (१६वीं शताब्दी)	भोजप्रबन्धः
वरददेशिकः (१६वीं शताब्दी)	गद्यरामायणम्
विश्वेश्वर पाण्डेयः (१८वीं शताब्दी)	भारतीविलासः, कावेरीगद्यम्, श्रीकृष्णाभ्युदयः
तिम्मकविः	सृजनमनः, कुमुदचन्द्रिका
कृष्णमाचार्यः	पातिव्रत्यम्, पाणिग्रहणम्, वररुचिः, सुशीला (उपन्यासः)
पं. अंबिकादत्तव्यासः	शिवराजविजयः

विंशतिशताब्दौ बहवः लेखकाः विभिन्नभाषासु रचितानां गद्यानां उपन्यासानां च संस्कृते अनुवादं कृतवन्तः। तेषु पंडित ऋषिकेश शास्त्री भट्टाचार्यः, पंडित क्षमारावः, श्रीममाद्शास्त्री हरसूरकर, श्रीमती राजम्मा, श्री व्यवसाय शास्त्री, पंडित गिरधर चतुर्वेदी, भट्टमथुरानाथ शास्त्री, डॉ. रेवाप्रसाद द्विवेदी, श्री कल्याणराम शास्त्री, श्री हरिचरण भट्टाचार्यः, आचार्य श्री शैलः सुप्रसिद्धाः। अन्येषु आधुनिकलेखकेषु श्री गणेश शर्मा, श्रीनिवास शास्त्री, डॉ. रामजी उपाध्यायः, चारुदेव शास्त्री, डॉ. शिवप्रसाद भारद्वाज, डॉ. कपिलदेव द्विवेदी प्रमुखाः सन्ति।

संस्कृतगद्यस्य विशेषताः :-

- समासबाहुल्यं संस्कृतगद्यस्य प्रमुखा विशेषता। समासानां प्रयोगेण संक्षेपः भवति। भाषा प्रौढ़ा ओजपूर्णा च भवति।
- संस्कृतगद्येषु पद्यानामपि मिश्रणं भवति।
- संस्कृतगद्यस्य माध्यमेन उपसर्गः, प्रत्ययः, सन्धिः, समासः, इत्यादीनां भाषिकतत्त्वानां सरलतया ज्ञानं भवति।
- विचारविनिमयस्य सिद्धान्तप्रतिपादनस्य च उत्तमं माध्यमं भवति गद्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गद्यशिक्षणस्य उद्देश्यानि :- उद्देश्यानि द्विविधानि

क. सामान्योद्देश्यानि

ख. विशिष्टोद्देश्यानि

सामान्योद्देश्यानिः-

विभिन्नगद्यविषयाणां पाठने सामान्यरूपेण यानि उद्देश्यानि निर्धार्यन्ते तानि सामान्योद्देश्यानि। तद्यथा–

१. छात्रेषु संस्कृतगद्यसाहित्यं प्रति रुच्युत्पादनम्।

२. छात्राणां संस्कृतशब्दभण्डारस्य अभिवर्धनम्।

३. संस्कृतवाक्यानां शुद्धं स्पष्टं च वाचनम्।

४. गद्यांशानाम् अर्थग्रहणम्।

५. संस्कृतभाषायाः व्यावहारिकरूपस्य ज्ञानम्।

६. संस्कृते भाषणकौशलस्य लेखनकौशलस्य च विकासः।

७. संस्कृतगद्यानां विचार – विश्लेषणशक्तेः कल्पनाशक्तेश्च विकासः।

८. नैतिक सांस्कृतिक–दार्शनिकज्ञानस्य विकासः।

एतानि उद्देश्यानि प्रारंभिक–माध्यमिक–उन्नतस्तरेषु स्तरानुगुणं किञ्चित् भिद्यन्ते।

विशिष्टोद्देश्यानिः-

विशिष्टोद्देश्यानि गद्यप्रकारानुगुणं प्रतिपाठं भिद्यन्ते। तथापि तेषां मौलिकं रूपं अधोनिर्दिष्टक्रमेण सूचयितुं शक्यते –

	गद्यप्रकाराः	**विशिष्टोद्देश्यानां स्वरूपम्**
१.	कथा	कथावस्तुज्ञानम्, चरित्रनिर्माणम्, कल्पनाशक्तेः विकासः।
२.	वर्णनम्	वर्ण्यसामग्रीज्ञानम्, वर्णनशैल्याः परिचयः, कल्पनाशक्तेः विकासः, रचनाशक्तेः विकासः।
३.	नाटकम्	सम्भाषणशैल्याः ज्ञानम्, दृश्यावलोकनेन स्पष्टावबोधः, अभिनयकलायाः परिचयः, रसानुभूतिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४.	निबन्धः	विषयज्ञानं, जिज्ञासायाः विस्तारः, बौद्धिकशक्तेः विकासः, विश्लेषणशक्तेः विकासः।
५.	आत्मकथा	महापुरुषाणां जीवनवृत्तान्तस्य परिचयः, आदर्शसिद्धान्तानां ज्ञानम्, व्यक्तित्वविकासः।

गद्यशिक्षणस्य अङ्गानि :- गद्यशिक्षणस्य प्रमुखानि अंङ्गानि अधोनिर्दिष्टानि –

अङ्गानि

वाचनम्	**व्याख्या**	**विचार विश्लेषणम्**
१. आदर्शवाचनम् (अध्यापकेन)	१. कठिनशब्दानाम्	१. समग्रभावस्यसूक्तीनाम्
२. अनुवाचनम् (छात्रैः)	२. वाक्यखण्डानाम्	२. अन्तर्कथानाम्
३. मौनवाचनम् (छात्रैः)	३. वाक्यानाम्	३. प्रमुखविचाराणाम्

गद्यशिक्षणस्य सोपानानि :-

१. प्रस्तावना :-

गद्यपाठस्य प्रारम्भात्पूर्वं छात्राणां पूर्वज्ञानस्य परीक्षणाय नूतनपाठं प्रति अभिप्रेरणाय च प्रस्तावना प्रश्नकरणेन, चित्रप्रदर्शनेन, श्लोकवर्णनेन, कथावर्णनेन वा क्रियते। प्रस्तावनाप्रश्नैः नूतनपाठ्यांशस्य भूमिका निर्मीयते।

२. उद्देश्यकथनम्:-

प्रस्तावनानन्तरं नूतनपाठस्य मुख्योद्देश्यस्य स्पष्टीकरणं, पाठस्य शीर्षकप्रकटनं च अस्मिन् सोपाने भवति। अनेन छात्राणां मनसि, अध्येतव्यस्य विषयस्य निश्चयः भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **प्रस्तुतीकरणम् :-**

अध्यापकः अधोनिर्दिष्टैः उपसोपानैः गद्यांशं प्रस्तौति।

१ **आदर्शवाचनम् :-**

अध्यापकः कक्षोचितस्वरेण विरामादिचिह्नानि अनुसरन् भावानुगुणं गद्यांशस्य प्रभावपूर्ण वाचनं प्रस्तौति। तस्य वाचनम् अनुकरणयोग्यं भवेत्। तस्य श्रवणेन छात्राः वर्णानां शुद्धोच्चारणं गद्यवाचनरीतिं च जानीयुः। अनेन छात्राणां श्रवणकौशलस्य विकासः भवति।

२ **अनुवाचनम् :-**

अध्यापकः कतिपयैः छात्रैः क्रमशः गद्यांशस्य अनुकरणवाचनं कारयति अनुवाचने छात्राणाम् अशुद्धोच्चारितवर्णान् संशोधयति च। अनेन छात्राः वाचनकौशले दक्षाः भवेयुः।

३ **काठिन्यनिवारणम्:-**

गद्यांशे विद्यमानानां कठिनशब्दानां वाक्यांशानां च स्पष्टीकरणं विविध–विधि–प्रविधीनां माध्यमेन क्रियते, येन छात्राः शब्दार्थज्ञाने सफलाः भवेयुः ।

काठिन्यनिवारणविधयः

उद्बोधन विधयः	**प्रवचनविधयः**	**स्पष्टीकरणविधयः**
१. प्रत्यक्षविधिः	१. अनुवादविधिः	१. व्युत्पत्तिः
२. प्रतिकृतिः	२. कोषविधिः	(प्रकृतिः–प्रत्ययः)
३. अभिनयप्रदर्शनम्	३. परिभाषा	(उपसर्गः)
४. क्रियाप्रदर्शनम्	४. टीका	(सुबन्ताः, तिङन्ताः)
५. चित्रं, रेखाचित्रं, मानचित्रं		(सन्धिविच्छेदाः, समासविग्रहाः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२. तुलनाविधिः

३. पर्यायज्ञापनम्

४. विलोमज्ञापनम्

५. वाक्यप्रयोगः

६. अन्तर्कथाः

७. प्रसंगः

८. उदाहरणम्

९. व्याख्या

उद्बोधनविधयः :-

उद्बोधनविधौ अध्यापकः अधिकम् अनुक्त्वा विविधप्रदर्शनैः छात्रान् उद्बोधयति।

प्रवचनविधयः :-

यत्र शब्दार्थज्ञापनं कठिनं तथा च गम्भीरसिद्धान्ताः भवन्ति तत्र अध्यापकः स्वयमेव प्रवचनमाध्यनेन सर्वं बोधयति। उन्नतस्तरे अस्य उपयोगः भवति।

स्पष्टीकरणविधयः :-

शब्दानाम् अर्थबोधार्थम् अध्यापकः विविधस्पष्टीकरणविध्यनुगुणं, मौखिकरूपेण लिखितरूपेण वा स्पष्टीकरोति।

विश्वभाषास्वेकरूपाऽनेकशः प्रतिबिम्बिता
सर्वलाकाराचिता सर्वत्रा या सम्मानिता
वैदिकी वा लौकिकीं वा श्रुतिमधुरसंवादिनी
सर्वमङ्गलभावना-सम्भावनामनुशासती
जयति संस्कृतभारती

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतगद्यपाठयोजना-१

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालयः

कक्षा	–	अष्टमी	वर्ग	–	अ
कालांशः	–	चतुर्थः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (गद्यम्)	**प्रकरणम्**	–	**कण्टकं कण्टकेनैव**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतभाषां प्रति अनुरागोत्पादनम्।

२. छात्रेषु संस्कृतगद्यं प्रति अभिरुचिजागरणम्।

३. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।

४. छात्रेषु संस्कृतगद्यांशस्य अर्थग्रहणक्षमतायाः विकासः।

५. छात्रेषु गद्यगतभावानाम् अवबोधनक्षमतायाः विकासः।

६. छात्राणां वर्णन–विश्लेषण–रचनादि–बौद्धिकशक्तीनाम् अभिवर्धनम्।

७. छात्रेभ्यः गद्यगतादर्शानुगुणं स्वकीयजीवने आचरणाय प्रेरणाप्रदानम्।

विशिष्टोद्देश्यानि-

१. छात्राः पूर्वपुरुषोपार्जिता, निक्षेपभूताम्, ईदृगेवायम्, पितृव्यः, प्रहृष्टमनाः इत्येषां कठिनशब्दानाम् अर्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भवेयुः।

२. छात्राः कण्टकं कण्टकेनैव, शठे शाठ्यं समाचरेत् इत्यादिषु निहितान् विशषार्थान् अवबुध्य गद्यस्य विचारविश्लेषणे समर्थाः भवेयुः।

३. अस्य पाठस्य माध्यमेन दैनिकजीवने कथं व्यवहारः करणीयः, इत्यस्मिन् विषये छात्रेषु सकारात्मक–अभिवृत्तेः जागरणम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, संकेतिका, आकुञ्चनश्यामपट्टः, चित्रम्।

पूर्वज्ञानम् -

छात्राः पञ्चतन्त्रस्य कथानां विषये सामान्यरूपेण जानन्ति।

प्रस्तावना -

अध्यापकः **'ज्ञातात् अज्ञातं प्रति'** इति शिक्षणसूत्रमनुसरन् छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१. यः अस्माभिः सह सद्व्यवहारं करोति तेन सह वयं कथं व्यवहारं कुर्मः?	१. यः अस्माभिः सह सद्व्यवहारं करोति तेन सह वयं सद्व्यवहारं कुर्मः।
२. यः अस्माभिः सह दुर्व्यवहारं करोति तेन सह वयं कथं व्यवहारं कुर्मः ?	२. यः अस्माभि सह दुर्व्यवहारं करोति तेन सह वयं दुर्व्यवहारं कुर्मः।
३. अनयोः अर्थः कः?	३. यः यथा व्यवहरति तेन सह तथा व्यवहारः करणीयः।
४. किमर्थम् एवं प्रकारेण व्यवहरणीयम्?	(समस्यात्मकः प्रश्नः)।

उद्देश्यकथनम् -

अस्मिन् सन्दर्भे अद्य वयं 'कण्टकं कण्टकेनैव' इति कथां पठामः। इत्युक्त्वा श्यामपट्टस्योपरि प्रकरणस्य शीर्षकं लिखति अध्यापकः।

प्रस्तुतीकरणम् -

'शुभम' तृतीयः भागः पाठ्यपुस्तकं, पृष्ठसङ्ख्या–१६, अस्ति कस्मिश्चिदधिष्ठाने..... तुलाशिशुप्रदानेन सन्तोषितो–इति गद्यांशः।

आदर्शवाचनम् -

अध्यापकः कक्षोचितस्वरेण विरामादिचिह्नपुरस्सरं भावानुगुणं समुचितप्रवाहेण शुद्धतया स्पष्टतया च गद्यांशस्य आदर्शवाचनं करोति। सर्वे छात्राः सावधानतया शृण्वन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुवाचनम् -

अध्यापकः कतिपयछात्रान् गद्यांशस्य अनुवाचनं कर्तुं निर्दिशति। निर्दिष्टाः छात्राः क्रमशः अनुवाचनं कुर्वन्ति। अन्ये छात्राः सावधानतया श्रृण्वन्ति।

अशुद्धिसंशोधनम् -

अध्यापकः छात्रैः अनुवाचने पठितानाम् अशुद्धशब्दनां श्यामपट्टोपरि लेखनेन छात्राणां सहयोगेन च संशोधनं करोति।

काठिन्यनिवारणम् -

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
पूर्वपुरुषोपार्जिता	समासज्ञापनम्	पूर्वैः पुरुषैः उपार्जिता	पूर्वजानां द्वारा अर्जिता	भवतां गृहे पूर्वोपार्जितं किं–किम् अस्ति?
निक्षेपभूताम्	विश्लेषणम्	प्रतिप्राप्तये न्यस्तं यत् तद् निक्षिप्तं, तथा भूताम्	न्यस्ताम्	अस्य शब्दस्य वाक्ये प्रयोगं कुर्वन्तु।
ईदृगेवायम्	सन्धि–ज्ञापनम्	ईदृक्+एव+अयम्	एषः एतादृशः' एव अस्ति	ईदृगिव' इति शब्दस्य सन्धिविच्छेदं कुर्वन्तु
पितृव्यः	वाक्यप्रयोगः	लवस्य पितृव्यः लक्ष्मणः आसीत्	पितुः भ्राता	स्वपितृव्यस्यनाम वदतु
प्रहृष्टमनः	समास–ज्ञापनम्	प्रहृष्टं मनः यस्य सः	प्रसन्नचित्तः	'विशिष्टमनः' इत्यस्य समासविग्रहं कुर्वन्तु

श्यामपट्टकार्यम् -

अध्यापकः छात्रान् श्यामपट्टोपरि लिखितांशान् स्व–स्व–अभ्यासपुस्तिकासु लेखितुं निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

बोधप्रश्नाः -

१. लौहतुला कस्य समीपे आसीत्?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२. लौहतुला कैः भक्षिता?

३. श्रेष्ठिनः पुत्रस्य नाम किम्?

४. जीर्णधनः श्रेष्ठिपुत्रं कुत्र प्रस्थापयत्?

५. नदीतटात् श्रेष्ठिपुत्रं कः हृतवान्?

अध्यापककथनम् -

अध्यापकः अधोनिर्दिष्टक्रमेण पाठस्य सारं कथयति–

जीर्णधननामकः कश्चन् वणिक्पुत्रः आसीत्। तस्य समीपे तस्य पूर्वजानाम् एका लौहनिर्मिता तुला आसीत्। धनमार्जयितुं ग्रामान्तरं गच्छन् सः तां तुलां कस्यचित् श्रेष्ठिनः समीपे न्यासरूपेण स्थापयति। धनोपार्जनं कृत्वा प्रत्यागत्य सः स्वकीयां तुलाम् अयाचत्। किन्तु लोभकारणात् श्रेष्ठी तुलां मूषकाः अभक्षयन् इति उक्त्वा तुलां न प्रत्यर्पयत्। तदा वाणिकपुत्रः ज्ञातवान् यदयं धूर्तः। अनेन विधिना एव अनेन सह व्यवहारः करणीयः इति विचिन्त्य, वणिक्पुत्रः श्रेष्ठिपुत्रेण सह नदीतटं गच्छति, तत्र गुहायां तं स्थापयति च। पुनरागत्य वदति यत् भवतः पुत्रः श्येनेन हृतः। एवं द्वयोर्कलहे जाते सति द्वावपि न्यायालयं गच्छतः। न्यायाधीशस्य पुरतः वाणिक्पुत्रः सर्वं वृत्तान्तं निवेदयति। न्यायाधीशश्च वणिक्पुत्राय लौहतुलां श्रेष्ठिने च तत्पुत्रं प्रदापयति।

अस्याः कथायाः तात्पर्यमिदम् यत् यः यथा व्यवहरति तेन सह तथैव व्यवहारः करणीयः। यः दुष्टः अस्ति सः दुष्टतायाः एव अधिकारी। यतोऽहि कण्टकं तु कण्टकेन एव निष्कास्यते। उक्तञ्च 'शठे शाठ्यं समाचरेत्'।

विचार-विश्लेषणप्रश्ना :-

१. जीर्णधनः लौहतुलां किमर्थं न्यस्तवान्?

२. जीर्णधनः धनदेवं गुहायां किमर्थं स्थापितवान्?

३. अस्याः कथायाः कः आशयः?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मौनवाचनम् :-

अध्यापकः सर्वान् छात्रान् मौनवाचनाय निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

पुनरावृत्त्यात्मकप्रश्नाः :-

अध्यापकः पाठ्यांशस्य पुनरावृत्यर्थं समग्रपाठ्यांशमाधृत्य अधोलिखितान् प्रश्नान् पृच्छति–

१. लौहतुला कस्य समीपे आसीत्?

२. जीर्णधनः श्रेष्ठिपुत्रं कुत्र प्रस्थापयत्?

३. श्रेष्ठी वाणिक्पुत्रश्च किमर्थं राजकुलं गतवन्तौ?

४. धर्माधिकारिणः पुरतः जीर्णधनः किम् उक्तवान्?

५. अस्याः कथायाः आशयः कः ?

गृहकार्यम् :-

अध्यापकः श्यामपट्टोपरि गृहकार्यायप्रश्नान् लिखति–

१. अस्याः कथायाः सारांशं लिखन्तु।

२. एतादृशीम् अन्यां कथाम् अन्विष्य पठन्तु।

मुनिवर विकसित-कविवर विलसित
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा
अयि मातस्तव पोषणक्षमता
मम वचनातीता, सुन्दरसुरभाषा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतगद्यपाठयोजना-२

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालय

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	द्वितीयः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (गद्यम्)	**प्रकरणम्**	-	**ऊर्जायाः महत्त्वम्**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतभाषां प्रति अनुरागोत्पादनम्।

२. छात्रेषु संस्कृतगद्यं प्रति अभिरुचिजागरणम्।

३. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।

४. छात्रेषु संस्कृतगद्यांशस्य अर्थग्रहणक्षमतायाः विकासः।

५. छात्रेषु गद्यगतभावानाम् अवबोधनक्षमतायाः विकासः।

६. छात्राणां वर्णन–विश्लेषण–रचनादि–बौद्धिकशक्तीनाम् अभिवर्द्धनम्।

७. छात्रेभ्यः गद्यगतादर्शानुगुणं स्वकीयजीवने आचरणाय प्रेरणा दानम्।

विशिष्टोद्देश्यानि -

१. छात्राः कृष्णाङ्.गारः, अन्वेष्टुम्, परिमितम् इत्येतेषां कठिनशब्दानाम् अर्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भवेयुः।

२. छात्राः ऊर्जायाः महत्वं, प्रदूषणरहितं पर्यावरणम् इत्यादिषु सम्प्रत्ययेषु निहितान् भावान् अवबुध्य गद्यांशस्य विचार–विश्लेषणे समर्थाः भवेयुः।

३. ऊर्जायाः सदुपयोगाय संरक्षणाय च प्रेरणाप्रदानम्।

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टः, चित्रम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वज्ञानम्-

छात्राः ऊर्जायाः विषये सामान्यरुपेण जानन्ति।

प्रस्तावना-

अध्यापकः 'ज्ञातादज्ञातं प्रति' इति शिक्षणसूत्रमनुसरन् छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**सम्भावितोत्तराणि**
१. सूर्यात् वयं किं प्राप्नुमः?	१. सूर्यात् वयं प्रकाशम्, ऊर्जां च प्राप्नुमः।
२. सूर्यं विहाय वयम् अन्यस्मात् कस्मात् ऊर्जा प्राप्नुमः?	२. वयं भोजनात्, विद्युतः च ऊर्जा प्राप्नुमः।
३. मानवजीवने ऊर्जायाः महत्व–विषये विशेषरूपेण भवन्तः किं किं जानन्ति?	(समस्यात्मक–प्रश्नः)

उद्देश्यकथनम् -

अद्य वयं ऊर्जायाः महत्वविषये पठामः' इत्युक्त्वा श्यामपट्टोपरि पाठस्य शीर्षकं लिखति अध्यापकः।

प्रस्तुतीकरणम् -

'शुभम्' पाठ्यपुस्तकं तृतीयो भागः, पृष्ठसङ्ख्या–२५

''अस्मिन् औद्योगिक काले .....अनुसन्धानं कुर्वन्ति'' इति गद्यांशः।

आदर्शवाचनम् -

अध्यापकः कक्षोचितस्वरेण विरामादिचिन्हपुरस्सरं भावानुगुणं समुचितप्रवाहेण शुद्धतया स्पष्टतया च गद्यांशस्य आदर्शवाचनं करोति। सर्वे छात्राः सावधानतया शृण्वन्ति।

अनुवाचनम् -

अध्यापकः कतिपयछात्रान् गद्यांशस्य अनुवाचनं कर्तुं निर्दिशति। क्रमशः निर्दिष्टाः छात्राः अनुवाचनं कुर्वन्ति। अन्ये छात्राः सावधानतया शृण्वन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशुद्धिसंशोधनम्-

अध्यापकः छात्रैः अनुवाचने पठितानाम् अशुद्धशब्दानां संशोधनं श्यामपट्टोपरि लेखनैत् छात्राणां सहयोगेन च करोति।

काठिन्यनिवारणम् -

शब्दाः	**विधयः**	**प्रयोगाः**	**अर्थाः**	**मूल्याङ्कनम्**
कृष्णाङ्गारः	सन्धिज्ञापनम्	यथा–शुष्काङ्कुर = शुष्क + अङ्कुरः	कृष्णाङ्गारः	कृष्णाङ्गारेण किं किं क्रियते?
अन्वेष्टुम्	वाक्यप्रयोगः	हनुमान सीताम् अन्वेष्टुं लङ्कां गतवान्।	अन्वेषणं कर्तुम्	वाक्यप्रयोगं कुर्वन्तु।
परिमितम्	विलोम–ज्ञापनम्	अपरिमितम्, असीमितम्	सीमितम्	पर्यायशब्दान् वदन्तु।

श्यामपट्टकार्यम् :-

छात्राध्यापकः छात्रान् श्यामपट्टोपरि लिखितांशान् स्व–स्व अभ्यासपुस्तिकासु लेखनार्थं निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

बोधप्रश्नाः -

१. शरीरं कस्मात् ऊर्जां प्राप्नोति ?

२. ऊर्जा का अस्ति ?

३. ग्रामेषु ऊर्जायै कस्य प्रयोगः क्रियते?

४. साम्प्रतम् ऊर्जा कथं प्राप्ता भवति?

५. वृक्षाः कीदृशं वायुं मुञ्चन्ति?

अध्यापककथनम् -

अध्यापकः अधोनिर्दिष्टक्रमेण पाठ्यांशस्य सारं कथयति-

अस्माकं जीवने ऊर्जायाः अत्यधिकं महत्त्वं वर्तते। ऊर्जया विना न किमपि कर्तुं शक्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शरीरस्य कृते भोजनस्य आवश्यकता भवति। भोजननिर्माणार्थम् ईन्धनस्य आवश्यकता। प्रकाशाय तैलस्य विद्युतः वा आवश्यकता भवति। अर्थात् सर्वेषु अपि क्षेत्रेषु ऊर्जायाः आवश्यकता अनुभूयते। प्राचीनकाले ऊर्जाप्राप्तये काष्ठेन्धनस्य प्रयोगः भवति स्म। तेन वृक्षाः नष्टाः। तस्माच्च कारणात् पर्यावरणं प्रदूषितम् जातम्। सम्प्रति ऊर्जायाः कृते खनिजतैलस्य प्रयोगः भवति। किन्तु खनिजतैलस्य भण्डारोऽपि सीमितः एव। अथ च अनेनापि वातावरणं प्रदूषितं भवति। अतः वैज्ञानिकाः परमाणुशक्तेः प्राकृतिकशक्तेः च ऊर्जाप्राप्तये प्रयत्नरताः सन्ति। इदानीं सूर्यात् वायोः च ऊर्जा प्राप्तुं शक्या।

विचारविश्लेषणप्रश्नाः -

१. मानवजीवने ऊर्जायाः किं महत्वम्?

२. सौर–ऊर्जायाः उपयोगः कथं भवति?

३. प्रदूषणरहित–वातावरणेन कः लाभः?

मौनवाचनम् -

अध्यापकः छात्रान् गद्यांशस्य मौनरूपेण वाचनाय निर्दिशति, स्वयं च कक्षायाः निरीक्षणं करोति।

पुनरावृत्त्यात्मकप्रश्नाः -

१. सर्वाणि कार्याणि किम् अपेक्षन्ते?

२. वैज्ञानिकाः काष्ठेन्धनात् भिन्नं साधनम् अन्वेष्टुं किमर्थं प्रयतितवन्तः?

३. किं स्रोतः परिमितः अस्ति?

४. अधुना वैज्ञानिकाः कस्मात् ऊर्जाप्राप्तये प्रयत्नं कुर्वन्ति?

५. जनाः सूर्यात् प्राप्तायाः ऊष्मायाः उपयोगं किमर्थं कुर्वन्ति?

गृहकार्यम् -

१. अस्माकं जीवने ऊर्जायाः महत्त्वविषये स्वविचारान् लिखन्तु।

२. सौरऊर्जायाः विषये सूचनाः एकत्रीकुर्वन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतगद्यपाठयोजना-३

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालयः

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	द्वितीयः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (गद्यम्)	**प्रकरणम्**	–	**किमर्थं लेखनीद्वयम्**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतभाषां प्रति अनुरागोत्पादनम्।

२. छात्रेषु संस्कृतगद्यं प्रति अभिरुचिजागरणम्।

३. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।

४. छात्रेषु संस्कृतगद्यांशस्य अर्थग्रहणक्षमतायाः विकासः।

५. छात्रेषु गद्यगतभावानामवबोधनक्षमतायाः विकासः।

६. छात्राणां वर्णन–विश्लेषण–रचनादिबौद्धिकशक्तीनाम् अभिवर्द्धनम्।

७. छात्रेभ्यः गद्यगतादर्शनुगुणं स्वकीयजीवने आचरणाय प्रेरणाप्रदानम्।

८. छात्राणां संस्कृत–श्रवण–भाषण–पठन–लेखनादि–कौशलानामभिवर्द्धनम्।

विशिष्टाद्देश्यानि -

१. छात्राः सुलभम्, तूष्णीम्, निर्धनतानिवारणाय, निरामयाः इत्येतेषां कठिनशब्दानाम् अर्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भवेयुः।

२. छात्राः 'समाजवादः', 'सर्वे भवन्तु सुखिन': इत्यादीन् विचारान् अवबुध्य गद्यांशस्य विचार–विश्लषणे समर्थाः भवेयुः।

३. छात्रेभ्यः समानताभावस्य आचरणाय प्रेरणाप्रदानम्।

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टः, चित्रम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वज्ञानम् -

छात्राः भारतस्य प्रथमप्रधानमन्त्रिणः जवाहरलालनेहरोः विषये सामान्यरूपेण जानन्ति।

प्रस्तावना -

छात्राध्यापकः 'ज्ञातादज्ञातं प्रति' इति शिक्षणसूत्रमनुसरन् छात्राः पाठोन्मुखाकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१. अस्माकं देशस्य नाम किम् ?	१. अस्माकं देशस्य नाम भारतम्।
२. भारतस्य प्रथमप्रधानमन्त्री कः?	२. भारतस्य प्रथमप्रधानमन्त्री पं. जवाहर–लालनेहरूः आसीत्।
३. जवाहरलालनेहरूमहोदयस्य बाल्य–कालस्य विषये किं किं जानन्ति? (समस्यात्मक–प्रश्नः)	

उद्देश्यकथनम् -

अद्य वयं 'किमर्थं लेखनीद्वयम्' इति पाठ माध्यमेन जवाहरलालनेहरूमहोदस्य बाल्यकालविषये ज्ञास्यामः, इत्युक्त्वा श्यामपट्टोपरि पाठस्य शीर्षकं लिखति अध्यापकः।

प्रस्तुतीकरणम् -

'शुभम्' पाठ्यपुस्तकं तृतीयो भागः, पृष्ठसङ्ख्या–२८,

बाल्यकाले एकदा जवाहरलालनेहरूः .....दुःखभाग् भवेत्–इति गद्यांशः।

आदर्शवाचनम् -

अध्यापकः कक्षोचितस्वरेण विरामादिचिन्हपुरस्सरं भावानुगुणं समुचितप्रवाहेण शुद्धतया स्पष्टतया च गद्यांशस्य आदर्शवाचनं करोति। सर्वे छात्राः सावधानतया शृण्वन्ति।

अनुवाचनम् -

अध्यापकः कतिपय छात्रान्ः गद्यांशस्य अनुवाचनं कर्तुं निर्दिशति। क्रमशः निर्दिष्टाः छात्राः अनुवाचनं कुर्वन्ति। अन्य छात्राः सावधानतया शृण्वन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशुद्धिसंशोधनम् -

अध्यापकः छात्रैः अनुवाचने पठितानाम् अशुद्धशब्दानां संशोधनं श्यामपट्टोपरि लेखनेन छात्राणां सहयोगेन च करोति।

काठिन्यनिवारणम् -

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
सुलभम्	विलोम–ज्ञापनम्	–दुर्लभम्	सहज–प्राप्यम्	वाक्यप्रयोगं कुर्वन्तु।
तूष्णीम्	वाक्यप्रयोगः	छात्राःतूष्णीं तिष्ठन्ति।	मौनम्	वाक्यप्रयोगं कुर्वन्तु।
निर्धनतानिवारणाय	समासःज्ञापनम्	निर्धनतायाः निवारणाय	निर्धनता दूरी कर्तुम्	मानवता प्रचाराय इत्यस्य विग्रहं कुर्वन्तु।
निरामयाः	सन्धिः ज्ञापनम्	यथा निरायासः= निर्+आमयाः	रोगरहिताः	निराकारः इत्यस्य विच्छेदं कुर्वन्तु।

श्यामपट्टकार्यम् -

अध्यापकः छात्रान् श्यामपट्टोपरि लिखितांशान् स्व–स्व–अभ्यासपुस्तिकासु लेखनार्थं निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

बोधप्रश्नाः -

१. जवाहरलालनेहरोः पितुः नाम किम् आसीत्?
२. लेखनीद्वयं कस्य कक्षे आसीत्?
३. एकां लेखनीं कः अगृह्णात्?
४. पितुः प्रश्नं श्रुत्वा जवाहरः किम् अकरोत्?
५. मोतीलालः किमर्थं जवाहरम् अदण्डयत्?

अध्यापककथनम् -

अध्यापकः अधोनिर्दिष्टक्रमेण पाठ्यांशस्य सारं कथयति–

पं. जवाहरलालनेहरुः बाल्यकालादेव देशभक्तः आसीत्। बाल्यावस्थायाम् एकवारं सः पितुः कक्षे द्वे लेखन्यौ अपश्यत्। तदा सः अचिन्तयत्–यत् लेखनार्थं तु एकस्याः एव लेखन्याः आवश्यकता भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तर्हि अत्र किमर्थं द्वे लेखन्यौ स्तः। बहवः तादृशाः स्युः, येषां समीपे लेखनार्थं लेखनी न स्यात्। किन्तु अत्र एकस्य एव समीपे द्वे लेखन्यौ स्तः, इति विचिन्त्य बालकः जवाहरः लेखनीमेकाम् अगृहणात्। यदा श्री मोतीलालः लेखनीं न दृष्टवान् तदा सः जवाहरं पृष्टवान्। किन्तु जवाहरलालः तूष्णीमेव अतिष्ठत्। अयमेवापराधी इति मत्वा सः तं सम्यक् दण्डितवान्। जवाहरलालः स्वविचारेषु दृढ़ः निर्भीकश्चासीत्। सः सहर्षं दण्डं स्वीकृतवान्। भारतं यदा स्वतन्त्रमभवत् तदा अयं विचारशीलः निर्भीकः भारतस्य प्रधानमन्त्री अभवत्। आजीवनम् अयं भारतस्य निर्धनतानिवारणाय राष्ट्रकल्याणाय च प्रयत्नमकरोत्। 'सर्वे भवन्तु सुखिनः' इति भावनया कार्यरतः पं. जवाहरलाल नेहरुः सर्वदैव समाजवादस्य प्रतिष्ठापनाय प्रयतितवान्।

विचारविश्लेषण-प्रश्नाः

१. जवाहरलालनेहरुः किमर्थम् एकां लेखनीम् अगृह्णात्?
२. प्रधानमन्त्रिरूपेण नेहरुः किं किं कृतवान्?
३. समाजवादः भारतस्य कृते कथं लाभदायकः?

मौनवाचनम् -

अध्यापकः छात्रान् गद्यांशस्य मौनरूपेण वाचनाय निर्दिशति, स्वयं च कक्षायाः निरीक्षणं करोति।

पुनरावृत्त्यात्मकप्रश्नाः -

१. जवाहरलालनेहरुः बाल्यकालात् कीदृशः आसीत्।
२. का विपत् अस्ति?
३. श्री मोतीलालः जवाहरं किम् अपृच्छत्?
४. जवाहरः स्वविचारेषु कीदृशः आसीत्?
५. के सुखिनः भवन्तु?

गृहकार्यम् -

१. एतस्य पाठस्य का शिक्षा? स्वविचारान् लिखन्तु।
२. जवाहरलालनेहरुमहोदयस्य बाल्यकालस्य कामपि घटनां पठित्वा आगच्छन्तु, कक्षायां च श्रावयन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पद्यशिक्षणम्

संस्कृतभाषायाः आदिसाहित्यं पद्यमयमेव । पद्यकाव्येन रसानुभूतिः भवति सौन्दर्यानुभूतिश्च भवति। मानवजीवने उभयोः प्राधान्यम्। 'रसो वै सः' इति रसानुभूत्या ब्रह्मानन्दस्य प्राप्तिर्भवति। मनुष्यः सर्वदा सौन्दर्येण आकृष्टः भवति। सौन्दर्य तु परिवर्तनशीलम्–"क्षणे–क्षणे यन्नवतामुपैति तदेवरूपं रमणीयतायाः" (कालिदासः)। यद्यपि परिवर्तनशीलं तथापि तच्चिरन्तनं भवति। शुभकरं, वास्तविकं, सत्यं च भवति। अतएव सत्यं शिवं सुन्दरम् इति अस्माकं जीवनदृष्टिः। सौन्दर्यं सहृदयानन्ददायकं भवति। आह्लाददायकं तत् सौन्दर्य कुत्रास्ति? प्रकृतौ वस्तुनि व्यक्तौ वा? एवं चेत् सौन्दर्य समानरूपेण सर्वे पश्येयुः। परं लोके तथा न भवति। अतः सौन्दर्य दृष्टौ भवति, आत्मनि वा भवति इति अवधेयम्। तादृशम् आत्मगतं दृष्टिगतं च आन्तरिकं सौन्दर्यमेव चिरन्तनं सर्वदा आह्लाददायकम्। तादृशं आह्लाददायकसौन्दर्यमेव काव्ये भवति। यथा तीक्ष्णरूपेण पद्यकाव्यं मानवहृदयं स्पृशति न तथा साहित्यस्य अन्यविधः। कविहृद्यात् प्रस्फुटिता कविता साक्षात् पाठकस्य हृदयं स्पृशति। नूतनसर्जनात्मकं कविकर्म एव काव्यम्–

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।

यदि वा कविहृदयं कयाऽपि घटनया रसातिरेकेणाप्लावितं भवति तदा तत् काव्यरूपेण प्रस्फुटति। अतएव करूणातिरेकेण महर्षिः आदिकविः वाल्मीकिः ब्रूते–

मा निषाद! प्रतिष्ठां, त्वमगमः शाश्वतीः समः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतद् उद्दिश्य ध्वन्यालोके आनन्दवर्धनाचार्यः वर्णयति–

काव्यस्यात्मा स एवार्था तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्व वियोगात्यः शोकः श्लोकत्वमागतः।।

कालिदासोऽपि भावातिरेकेण काव्यमाध्यमेन जननान्तरसौहार्द्रमपि स्मारयति अभिज्ञानशाकुन्तले–

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः।
तच्चेतस स्मरति नूनमबोधपूर्व
भावस्थिराणि जननान्तर-सौहृदानि।।
अयं श्लोकः रसनिष्पतिसिद्धान्तमपि सूचयति।

काव्यस्य स्वरूपम् :-

काव्यस्य लक्षणानि आलंकारिकैः आचार्यैः विविधरूपेण व्याख्यातानि–तद्यथा।

संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलंकारं गुणवद्दोषवर्जितम्।। अग्निपुराणम्।।

दण्डी अपि उपरोक्तक्रमेणैव वर्णयति–**इष्टार्थव्यवच्छिन्नापदावलीकाव्यमिति। वाक्यं रसात्मकं काव्यमिति** कविराजविश्वनाथकथनेन काव्ये रसस्य महत्वं प्रतिपादितम्। **रमणीयार्थप्रतिपादकः शब्दः काव्यमिति** पण्डितराजजगन्नाथकथनेन चमत्कारस्य प्राधान्यम्। आनन्दवर्धनाचार्यः **काव्यस्यात्मा ध्वनिः** इति प्रतिपादयति। आचार्यः वामनः **'रीतिरात्माकाव्यस्य इति'** प्रतिपादयति। आचार्यः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुन्तकः **वक्रोक्तिः काव्यजीवितमिति** अभिप्रैति। रुद्रटः **ननुशब्दार्थौ काव्यम् इति।** भामह **शब्दार्थौ सहितौ काव्यमिति।** अभिनवभरतः **''कौतूहलाविरलत्वं काव्यसारस्यम् इति।** भोजराजः व्यापकं काव्यलक्षणमित्थं वर्णयति –

"निर्दोषं गुणवत् काव्यमलंकारैरलयङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दते।।"

आचार्य मम्मटस्य विख्यातं काव्यलक्षणम्–

"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।"

कवीनां वर्गीकरणम् :-

राजशेखरः विस्तृतरूपेण कवीनां वर्गीकरणं प्रस्तौति।

सामान्यरीत्या ते त्रिप्रकारका :–

१. **सारस्वतः** - जन्मान्तरसंस्कारेण काव्ये प्रवृत्तः।

२. **आभ्यासिकः** - अभ्यासेन काव्ये प्रवृत्तः।

३. **औपदेशकः** -उपदेशेन मन्दबुद्धिरपि काव्ये प्रवृत्तः।

प्रतिभादृष्ट्या कवयः त्रिप्रकारकाः –

१. **शास्त्रकविः** -एतेऽपि त्रिप्रकारकाः
   - क. शास्त्रस्य विधानं करोति
   - ख. शास्त्रे काव्यस्य विधानं करोति
   - ग. काव्ये शास्त्रार्थस्य विधानं करोति

२. **काव्यकविः**

३. **उभयकविः** एते उत्तरोत्तरं श्रेष्ठाः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्यकवेः अष्टप्रकाराः सन्ति–रचनाकविः, शब्दकविः, अर्थकविः, अलंकारकविः, उक्तिकविः, रसकविः, मार्गकविः, शास्त्रार्थकविः। यस्मिन् कवौ उपर्युक्तेषु द्वित्रिगुणाः भवन्ति सः साधारणकविः, पञ्चगुणाः भवन्ति चेत् मध्यमकविः, सर्वे अष्टगुणाः भवन्ति चेत् सः महाकविः भवति।

काव्यप्रयोजनम् :-

काव्यं चतुर्वर्गफलप्राप्तेः साधनमस्ति येन मानवजीवनं सार्थकं भवति। आचार्य– कुन्तकः चतुर्वर्ग प्राप्त्याशः, व्याधिनाशः, अज्ञाननाशः अथ च अमृतवत् आनन्दप्राप्तिः काव्यस्य प्रयोजनानि इति अभिप्रैति–

चतुर्वर्ग फलस्वादमप्यतिक्रम्य तद्विदाम्
काव्यामृतरसेनान्तरचमत्कारो वितन्यते।
कटुकौषधवच्छास्त्रमविद्याव्याधिनाशकम्।
आद्यमृतवत्काव्यमविवेकगवापहम्।।

आचार्य भामहः काव्यालङ्कारे काव्यप्रयोजनम् इत्थं वर्णयति–

धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च।
करोति प्रीतिं कीर्तिं च साधुकाव्यनिबन्धनम्।।

आचार्यमम्मटोऽपि काव्यप्रयोजनं सुष्टुः प्रतिपादयति :–

काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कान्तासमम् उपदेशत्वात् कविताकामिन्याः उपदेशः आह्लादपूर्वकं अनुपालनीयः भवति जनानां कृते। अयं च उपदेशः अत्यन्तं मनोवैज्ञानिकः।

काव्यशिक्षणम् :-

प्रतिभासम्पन्नकवेः भावातिरेके रचितस्य काव्यस्य शिक्षणं न सामान्यम्। सर्वेऽपि पाठकाः काव्यरसास्वादने समर्थाः न भवन्ति। सहृदयैक–आह्लादजन्यं काव्यरसं भवति। अतः उक्तम् "अरसिकेषु कवित्वनिवेदनं मा कुरु मा कुरु मा कुरु।"

पाश्चात्यशिक्षाविद् **ए.एस. हैडो** अपि इत्थमभिप्रैति –

"Poetry teaching is like love making, it happens".

Poetry is caught not taught.

काव्यरसं गृह्यते न तु शिक्ष्यते। सहृदयः अध्यापकः कक्षायां स्वकीयेन प्रभावपूर्णव्याख्यानेन सौन्दर्यबोधने च काव्यमयवातावरणस्य निर्माणं करोति, यस्मिन् सहृदयाः छात्राः कविभावनाभिः तादात्म्यमनुभवन्ति। अतः न सर्वे अध्यापकाः काव्यशिक्षणे सफलाः भवन्ति। तथापि प्रयासस्तु विधेयः एव।

पद्यपाठाः त्रिप्रकारकाः भवन्ति :-

(१) सूचनात्मकः (२) सूक्त्यात्मकः (३) रसात्मकः

सूचनामक–सूक्त्यात्मक–पद्यपाठानां बोधने सारल्यं भवति। अत्र भावविश्लेषणं प्रधानम्। रसात्मकपद्यपाठानां शिक्षणे अध्यापकेन विशेषश्रमः करणीयः। काव्यस्य सौन्दर्यबोधेन सह समभाव–विषमभाव–कविताभिः तुलनात्मकसौन्दर्यबोधस्यापि प्रयासः विधेयः।

संस्कृतकाव्यपरम्परा :-

संस्कृतकाव्येषु रामायणं, महाभारतं, श्रीमद्भागवतं, पुराणानि च उपजीव्यकाव्यानि सन्ति। आदिकाव्यं रामायणं न केवलं संस्कृतस्य अपितु विश्वसाहित्यस्य आदिकाव्यम् अस्ति। अस्मिन् काव्ये चतुर्विंशतिसहस्रश्लोकाः (२४,०००) सन्ति। अस्य रचनाकालः प्रायः क्रिश्तोः पूर्वं ५०० शताब्दी इति मन्यते। विशालकाये महाभारते अष्टादश (१८) पर्वाणि सन्ति येषु आहत्य प्रायः एकलक्षश्लोकाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सन्ति (६५८२६)। अष्टादशपुराणेषु आहत्य प्रायः चतुर्लक्ष (४,००,०००) श्लोकाः सन्ति। श्रीमद्भागवतस्यापि संस्कृतसाहित्ये विशिष्टं स्थानमस्ति।

महाकाव्यपरम्परायाम् एते प्रसिद्धाः :-

अश्वघोषः	–	बुद्धचरितं (सौन्दरानन्दः)
कालिदासः	–	रघुवंशम्, कुमारसंभवम्
भारविः	–	(सप्त शतक), शताब्दी किरातार्जुनीयम्
भट्टः (६वीं शती)	–	भट्टिकांव्यम्
कुमारदासः (६५० से ७५०)	–	जानकीहरणम्
माघः (६५० से ७५०)	–	शिशुपालवधम्
रत्नाकरः (६वीं)	–	हरविजयः
कविराजः	–	राघवपाण्डवीयम्, द्विसन्धानकाव्यम्
हरिदत्तसूरिः	–	राघवनैषधीयम्
चिदम्बरः	–	राघवपाण्डवयादवीयम्
विद्यामाधवः	–	पार्वतीरुक्मणीयम्
वेंकटाध्वरिः	–	यादवराघवीयम्
श्रीहर्ष :	–	नैषधीयचरितम्
अभिनन्दकृत	–	रामचरितम्
शिवस्वामी	–	केक्किणाभ्युदय
हयग्रीवः	–	हृदयग्रीवा
क्षेमेन्द्रः (१०२८–८६)	–	रामायणमञ्जरी, भारतमञ्जरी
मंखकः (११२६–५०)	–	श्रीकण्ठचरितम्
भीमभट्टः	–	रावणार्जुनीयम्
जयद्रथः (१२०३–२६)	–	हरचरितचिन्तामणिः
धनेश्वरसूरिः	–	शत्रुञ्जयः इत्यादयः प्रसिद्धाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दूतकाव्ये- मेघदूतं मूर्धन्यमस्ति। **गीतिकाव्ये-** कालिदासस्य ऋतुसंहारः, जयदेवस्य गीतगोविन्दं विख्यातम्,। **नीतिकाव्ये-** विदुरनीतिः, चाणक्यनीतिः, कामन्दकनीतिः इत्यादयः प्रसिद्धाः। **शतककाव्येषु** भर्तृहरेः शतकत्रयम् अनुपमम्।

वर्तमानकालेऽपि बहूनि काव्यानि सततं विरचितानि दृश्यन्ते।

काव्यशिक्षणस्य अङ्गानिः-

काव्यशिक्षणस्य त्रीणि अङ्गानि सन्ति।

काव्यस्य अङ्गानि

(क) काव्यपाठः	**(ख) स्पष्टीकरणम्**	**(ग) रसानुभूतिः**
१. आदर्शपाठः (अध्यापकैः)	१. कठिनशब्दानाम्	१. भावसौन्दर्यस्य
२. अनुपाठः (छात्रैः)	२. अन्वयस्य	२. कल्पनासौन्दर्यस्य
३. सस्वरपाठः (उभाभ्याम्)	३. व्याकरणांशानाम्	३. शैलीसौन्दर्यस्य
		४. रस–छन्द–अलङ्काराणाम्

काव्यशिक्षणस्य उद्देश्यानि :-

काव्यशिक्षणस्य सामान्यतया एतानि उद्देश्यानि स्वीक्रियन्ते –

– संस्कृतकाव्यं प्रति रुच्युत्पादनम्।
– गतियतिलयभावानुगुणं काव्यपाठक्षमतोत्पादनम्।
– काव्यसौन्दर्यानुभूतिः।
– कल्पानशक्तेः रचनाशक्तेश्च विकासः।
– विभिन्नकाव्यशैलीनां परिचयः।
– कवेः व्यक्तित्वस्य काव्यमहत्त्वस्य च परिचयः
– काव्यस्य उदात्तभावानां जीवनदर्शनानां च परिचयेन नैतिकविकासः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्यशिक्षणविधयः :-

काव्यशिक्षणं एका कला। न केवलं शब्दार्थबोधः रटनं वा अपेक्षितम्, अपितु काव्यसौन्दर्यस्य रसानुभूतिः उद्दिष्टा। काव्यशिक्षणं न सरलं तथाऽपि काव्यशिक्षणाय केचन विधयः प्रस्तूयन्ते, येषां माध्यमेन शिक्षकः स्वकौशलेन काव्यशिक्षणे सफलो भवेत्।

१. अनुवादविधिः :-

प्रारम्भिकस्तरे अन्वयकाठिन्ये सति अस्य विधेः आश्रयणं अपेक्षितम् भवति। अस्मिन् विधौ अध्यापकः पद्यस्य पदच्छेदं विधाय अन्वयं च कृत्वा प्रत्येकं शब्दस्य अर्थं बोधयति अन्ते च पद्यस्य भावं वर्णयति अनुवादमाध्यमेन। अस्मिन् विधौ छात्राः निष्क्रियाः नीरसाः च भवन्ति।

२. दण्डान्वयविधिः-

संस्कृतभाषा संश्लेषणात्मिका अस्ति तदनुगुणं सम्पूर्णस्य पद्यस्य दण्डवत् एकगद्यवाक्ये अन्वयः एव दण्डान्वयः इत्युच्यंते।

आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्।
क्त्वाणमुल्ल्यप्प्रभृत्येवं पूर्वं दण्डान्वये भवेत्।।

"अन्वयप्रबोधः"

इत्थं मुख्यवाक्यरचनायै कः कर्ता? का क्रिया? इत्यादिरुपेण अध्यापकः प्रश्नान् पृच्छति। ततः परं छात्राणां सहयोगेन अन्वयम् उक्त्वा व्याख्यानं करोति। नायं विधिः मनोवैज्ञानिकः। रसानुभूतौ च बाधकः भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **खण्डान्वयविधिः :-**

अस्मिन् विधौ पूर्वं पदच्छेदं कृत्वा, सन्धिसमासादीनां विवरणं कृत्वा, कठिन पदानां अर्थं च बोधयित्वा, ततः परम् अन्वयबोधनार्थं प्रवृत्तः भवति अध्यापकः। प्रथमं क्रियापदम् आदाय लघु–लघु प्रश्नैः कर्त्राकांक्षा, कर्माकांक्षा, करणाकांक्षा विशेषणाकांक्षा इत्यादयः उद्भाव्यन्ते। व्याकरणानुसारं "क्रियान्वयित्वं कारकत्वं" भवति। क्रियापदेन सह सर्वेषां कारकाणां सम्बन्धः भवति अतः क्रियापदेन कर्त्रादीनाम् आकांक्षा वैज्ञानिकी। अस्मिन् विधौ छात्राः सक्रियाः रुचिमन्तश्च भवन्ति।

४. **व्याख्याविधिः :-**

अस्मिन् विधौ भावार्थस्य स्पष्टीकरणाय शब्दार्थः, वाक्यार्थः, काव्यसौन्दर्यबोधकांशः कवेः आशयः, अन्तर्कथाः, अन्यप्रसङ्गाश्च व्याख्यायन्ते। एष विधिः उन्नतस्तरे उपयोगी। संक्षिप्तव्याख्या एव टीका भवति। संस्कृतकाव्यानां टीकाः उपलभ्यन्ते तासां माध्यमेन काव्यशिक्षणं संभवति। प्रख्यातः टीकाकारः मल्लिनाथः रघुवंशस्य व्याख्याने स्वटीकाविषये इत्थं वदति –

इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते।।

परञ्च बहुधा टीकाकाराः स्वपाण्डित्यप्रदर्शनार्थं मूलग्रन्थमतिरिच्य स्वमतं विशदं प्रतिपादयन्ति।

५. **तुलनाविधिः :-**

एष विधिः उन्नतस्तरे व्याख्यानसन्दर्भे अन्यकवीनां पद्यैः सह भावस्य रचनाशैल्याः वा तुलना क्रियते। तुलनात्मकविमर्शणेन विभिन्नरचनानां साम्यवैषम्यविचारः प्रस्तूयते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६. **समीक्षाविधिः :-**

काव्यस्य विस्तृताध्ययने अनुसन्धाने च एष विधिः प्रयुज्यते। अत्र काव्यस्य विषयवस्तुनः पात्राणां रसादीनां च अलंङ्कारशास्त्रसिद्धान्तानुगुणं समालोचना क्रियते।

७. **भाष्यविधिः :-**

व्याख्यानस्य विस्तृतरूपमेव भवति भाष्यविधिः। संस्कृत वाङ्मये विभिन्न शास्त्रीयग्रन्थानाम् उपनिषदां श्रीमद् भगवद्गीतायाश्च बहूनि भाष्याणि उपलभ्यन्ते।

पद्यशिक्षणस्य सोपानानि :-

पद्यशिक्षणस्य इमानि सोपानानि भवन्ति–

१. प्रस्तावना
२. उद्देश्यकथनम्
३. प्रस्तुतीकरणम्
   ३.१ आदर्शपाठः
   ३.२ अनुपाठः
   ३.३ स्पष्टीकरणम्
४. व्याख्यानम्
५. सौन्दर्यानुभूतिः
६. सस्वरपाठः
७. पुनरावृत्तिः
८. गृहकार्यम् ।

वेदव्यास - वाल्मीकि - मुनीनाम्
कालिदास बाणादिकवीनाम्
पौराणिक-सामान्य-जनानाम्
जीवनस्य आशा सुन्दर-सुरभाषा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतपद्यपाठयोजना-१

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालयः

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	चतुर्थः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (पद्यम्)	**प्रकरणम्**	–	**सीता रावणं भर्त्सयति (प्रथमान्वितिः)**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतपद्यसाहित्याध्ययने रुचेः जागरणम्।

२. छात्रेषु गति–यति–लयानुसारं काव्यपाठक्षमतायाः विकासः।

३. छात्रेषु संस्कृतपद्यस्य अर्थसहितवाचनक्षमतायाः विकासः।

४. छात्रेषु पद्यगतभावानाम् अवबोधक्षमतायाः विकासः।

५. छात्रेभ्यः संस्कृतपद्यरचनाशैलीनां परिचयप्रदानम्।

६. छात्रेभ्यः संस्कृतकवीनां परिचयप्रदानम्।

७. छात्राणां कविभावनाभिः तादात्म्यसंस्थापनम्।

८. छात्राणां वर्णन–कल्पना–रचनादि–बौद्धिकशक्तीनाम् अभिवर्धनम्।

९. छात्रेभ्यः संस्कृतकाव्यसौन्दर्यस्य रसास्वादनाय प्रेरणाप्रदानम्।

१०. छात्रेभ्यः स्वयं कवितारचनायाः प्रेरणाप्रदानम्।

विशिष्टोद्देश्यानि -

१. छात्राः अनवद्याङ्गी, अनादृत्य, अनाकम्प्यम्, महोदधिः, अक्षोभ्यम्, महोरस्कं, सिंहसंकाशं, न्यग्रोधः, सत्यसन्धः इत्येतेषां कठिनशब्दानाम् अर्थान् ज्ञात्वा तषां प्रयोगे समर्थाः भवेयुः।

२. मर्यादापुरुषोत्तमं श्रीरामं प्रति छात्रेषु निष्ठोत्पादनं, श्रद्धोत्पादनञ्च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. छात्रेभ्यः सीतायाः निर्भयतायाः, दृढतायाः, साहसस्य च परिचयप्रदानेन, तद्वत् आचरणाय प्रेरणाप्रदानम्।

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टः, सीतारावणयोर्चित्रम्।

पूर्वज्ञानम्-

छात्राः रामायणस्य कथायाः विषये सामान्यरूपेण जानन्ति।

प्रस्तावना-

अध्यापकः 'ज्ञातादज्ञातं प्रति' इति शिक्षणसूत्रमनुसरन् छात्रान् पाठोन्मुखीकरणार्थम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१. रामायणे कस्य युद्धस्य वर्णनमस्ति ?	१. रामायणे रामरावणयुद्धस्य वर्णनमस्ति।
२. रामरावणयोर्युद्धं किमर्थमभवत् ?	२. रावणः सीतां हृतवान् इति कारणतः तयोर्युद्धम् अभवत्।
३. सीताहरणसमये सीता रावणं किम् उक्तवती?	(समस्यात्मक प्रश्नः)

उद्देश्यकथनम् -

'अद्य वयं 'सीता रावणं भर्त्सयति' इति पाठस्य माध्यमेन सीतारावणसंवादविषये अध्ययनं कुर्मः', इत्युक्त्वा अध्यापकः श्यामपट्टोपरि पाठस्य शीर्षकं लिखति।

प्रस्तुतीकरणम् -

'शुभम्' पाठ्यपुस्तकं, तृतीयः भागः, पृष्ठसङ्ख्या–२३,

रावणेनैवमुक्तातु.....अहं राममनुव्रता–इत्येते श्लोकाः।

आदर्शपाठः -

अध्यापकः गति–यति–लय–भाव–पुरस्सरम् आरोहावरोहक्रमेण प्रभावोत्पादकरीत्या कक्षाचितस्वरेण पद्यांशस्य आदर्शकाव्यपाठं प्रस्तौति। सर्वे छात्राः सावधानतया शृण्वन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुपाठः -

अध्यापकः कतिपय छात्रान् अनुपाठाय निर्दिशति, अन्ये सावधानतया श्रृण्वन्ति।

अशुद्धिसंशोधनम् :-

अध्यापकः छात्रैः अनुपाठे पठितानाम् अशुद्धशब्दानां श्यामपट्टोपरि लेखनेन छात्राणां सहयोगेन च संशोधनं करोति।

क. - प्रथमश्लोकस्य

पदच्छेदः -

रावणेन, एवम्, उक्ता, तु, कुपिता, जनक+आत्मजा, प्रति, उवाच, अनवद्य+अङ्गी, तम् अनादृत्य, राक्षसम्।

काठिन्यनिवारणम्-

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
अनवद्याङ्गी	समासज्ञापनम्	अनवद्यानि अङ्गानि यस्याः	अत्यन्त सुन्दरी	सुन्दराङ्गी इत्यस्य विग्रहं कुरु
		सा		समादृत्य इत्यस्य विच्छेदं कुरु
अनादृत्य	व्युत्पत्तिविधिः	अन+आदृ+ल्यप्	निरादरं कृत्वा	

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	**उत्तराणि**
१.	का प्रत्युवाच?	जनकात्मजा प्रत्युवाच।
२.	जनकात्मजा कं प्रत्युवाच?	तं राक्षसम्।
३.	तं राक्षसं किं कृत्वा प्रत्युवाच?	अनादृत्य।
४.	कीदृशी जनकात्मजा?	अनवद्याङ्गी जनकात्मजा।
५.	कथं भूता?	कुपिता।
६.	किमर्थं कुपिता?	रावणेन एवम् उक्ता।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्वयरचना -

रावणेन एवम् उक्ता तु कुपिता अनवद्याङ्गी जनकात्मजा तं राक्षसम् प्रति अनादृत्य उवाच।

ख - द्वितीयश्लोकस्य–

पदच्छेदः -

महागिरिम्, अनाकम्प्यं, महेन्द्र–सदृशं, पतिं, महा+उदधिम्, इव, अक्षोभ्यम्, अहं, रामम् अनुव्रता।

काठिन्यनिवारणम् -

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
अनाकम्प्यम्	विश्लेषणम्	यस्य कम्पनं न भवति।	अविचलम्	'अनासक्तम्इत्यस्य विग्रहं कुरु।
महोदधिः	वाक्यप्रयोगः	भारतस्य दक्षिणे हिन्दमहोदधिः अस्ति।	महासागरः	कस्यचित् महोदधेः नाम वदन्तु।
अक्षोभ्यम्	विश्लेषणम्	यस्मिन् क्षोभः न भवति।	गम्भीरम्	अस्य शब्दस्य वाक्यप्रयोगं कुर्वन्तु।

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	**उत्तराणि**
१.	का अनुव्रता?	अहम् अनुव्रता।
२.	कम् अनुव्रता?	रामम् अनुव्रता।
३.	कं रामम् अनुव्रता?	पतिं रामम् अनुव्रता।
४.	कीदृशं रामम्?	महागिरिं महेन्द्रसदृशम अनाकम्प्यम्
५.	अन्यत् कीदृशं रामम्?	महोदधिम् इव अक्षोभ्यम्।

अन्वयरचना -

महागिरिं महेन्द्रसदृशम् अनाकम्प्यं, मोहदधिम् इव अक्षोभ्यं पतिं रामम् अहम् अनुव्रता।

ग. - तृतीयश्लोकस्य–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेदः -

महाबाहुं महा+उरस्कं, सिंह–विक्रान्त–गामिनम्।

नृसिंहं सिंह–संकाशम् अहं राममनुव्रता।।

काठिन्यनिवारणम् -

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
महोरस्कम्	समासज्ञापनम्	महान् उरस्कः तम् कर्मधारय समासः	विशालवक्षः	महोदयम्–इत्यस्य विग्रहं कुरु
सिंहसकाशम्	पयोय–विधिः	सकाशम्–समानम्	सिंहसमानम्	'सकाश' योजयित्वा अन्यत् उदाहरणं वदतु।

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	**उत्तराणि**
१.	का अनुव्रता?	अहम् अनुव्रता।
२.	कम् अनुव्रता?	रामम् अनुव्रता।
३.	कीदृशं रामम्?	महाबाहुं रामम्।
४.	अन्यत् कीदृशं रामम्?	महोरस्कं रामम्।
५.	अन्यत् कीदृशं रामम्?	सिंहविक्रान्तगामिनं रामम्
६.	पुनः कीदृशं रामम्?	सिंहसंकाशं रामम्।
७.	पुनः कीदृशं रामम्?	नृसिहं रामम्।

अन्वयरचना-

अहं महाबाहुं महोरस्कं सिंहविक्रान्तगामिनं सिंहसंकाशं नृसिंहं रामम् अनुव्रता।

घ. चतुर्थश्लोकस्य।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदच्छेदः -

सर्व–लक्षण–सम्पन्नं न्यग्रोध–परिमण्डलं सत्य–सन्धं महाभागम् अहं रामम् अनुव्रता।

काठिन्यनिवारणम् -

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
न्यग्रोधः	वाक्यप्रयोगः	गौतमबुद्धः न्यग्रोधस्य वृक्षस्य अधः तपं कृतवान्।	वटवृक्षः	न्यग्रोधवृक्षस्य किं वैशिष्ट्यम्?
सत्यसन्धः	विश्लेषणम्	यः सर्वदा सत्यम् आचरणं करोति।	सत्यप्रतिज्ञः	सत्यसन्धेति के प्रसिद्धाः?

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	उत्तराणि
१.	का अनुव्रता?	अहम् अनुव्रता।
२.	कम् अनुव्रता?	रामम् अनुव्रता।
३.	कीदृशं रामम्?	सर्वलक्षणसम्पन्न रामम्।
४.	अन्यत् कीदृशं रामम्?	सत्यसन्धं रामम्।
५.	अन्यत् कीदृशं रामम्?	न्यग्रोधपरिमण्डलं रामम्
६.	अन्यत् कीदृशं रामम्?	महाभागं रामम्

अन्वयरचना -

अहम् सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलं सत्यसन्धं महाभागं रामम् अनुव्रता।

श्यामपट्टकार्यम् -

अध्यापकः छात्रान् श्यामपट्टोपरि लिखितांशान् स्व–स्व अभ्यासपुस्तिकासु लेखनार्थं निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

अध्यापककथनम् -

रावणः सीतां हर्तुं पञ्चवटीं गतः। यदा सीता लक्ष्मणरेखायाः बहिरागता, तदा तेन स्वपरिचयः दत्तः, लंकां गन्तुं च सीता आदिष्टा। तदा सीता क्रोधपूर्वकं तस्य अपमानं कृत्वा उक्तवती यत् यः रामः पर्वतः इव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धीरः समुद्रः इव गम्भीरः महेन्द्रसदृशश्चास्ति। यश्च सिंहवत् पराक्रमी, आजानुबाहुः विशालवक्षः सत्यप्रतिज्ञः, वटवृक्षः इव आश्रयप्रदायकः सर्वगुणसम्पन्नः अस्ति, तादृशस्य रामस्य एव अहम् अनुरागिणी अस्मि।

सौन्दर्यानुभूति-प्रश्नाः -

१. रामस्य वर्णने कानि विशेषणानि प्रयुक्तानि?

२. 'अहं राममनुव्रता' इत्यस्य पुनरावृत्या कः प्रभावः?

३. अत्र बाहुल्येन कस्य अलङ्कारस्य प्रयोगः कृतः?

तुलना -

अध्यापकः समभावकवितया तुलनात्मकसौन्दर्यबोधं कारयति–

लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथम्।
कारूण्यरुपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये।।

१. अस्मिन् श्लोके कस्य वर्णनमस्ति?

२. अत्र कस्य वर्णस्य आवृत्या अनुप्रासात्मकं सौन्दर्यं भवति?

पुनरावृत्त्यात्मकप्रश्नाः -

१. सीता कस्य अनादरं कृतवती?

२. सीता कस्य प्रशंसां कृतवती?

३. सीता कम् अनुव्रता अभवत्?

४. रामस्य विशेषताः काः?

५. न्यग्रोधवृक्षेण सह रामस्य तुलना किमर्थं कृता?

सस्वरपाठः -

पुनरेकवारम् अध्यापकः कक्षायां काव्यमयवातावरणस्य स्थिरीकरणार्थं काव्यसौन्दर्यस्य रसास्वादनार्थञ्च प्रभावोत्पादकरीत्या सस्वरकाव्यपाठं करोति।

गृहकार्यम् -

१. अस्मिन् पाठे आगतानां श्रीरामस्य विशेषणशब्दानां संकलनं कृत्वा लिखन्तु।

२. भगवतः श्रीरामस्य चरित्रसम्बन्धिनीं अन्यां कथां पठन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतपद्यपाठयोजना-२

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालयः

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	चतुर्थः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (पद्यम्)	**प्रकरणम्**	–	**सीता रावणं भर्त्सयति (द्वितीयान्वितिः)**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतपद्यसाहित्याध्ययने रुचेः जागरणम्।

२. छात्रेषु गति–यति–लयानुसारं काव्यपाठक्षमतायाः विकासः।

३. छात्रेषु संस्कृतपद्यस्य अर्थसहितवाचनक्षमतायाः विकासः।

४. छात्रेषु पद्यगतभावानामवबोधक्षमतायाः विकासः।

५. छात्रेभ्यः संस्कृतपद्यरचनाशैलीनां परिचयप्रदानम्।

६. छात्रेभ्यः संस्कृतकवीनां परिचयप्रदानम्।

७. छात्राणां कविभावनाभिः तादात्म्यसंस्थापनम्।

८. छात्राणां वर्णन–कल्पना–रचनादि–बौद्धिकशक्तीनाम् अभिवर्द्धनम्।

९. छात्रेभ्यः संस्कृतकाव्यसौन्दर्यस्य रसास्वादनाय प्रेरणाप्रदानम्।

१०. छात्रेभ्यः स्वयं कवितारचनायाः प्रेरणाप्रदानम्।

विशिष्टोद्देश्यानि -

१. छात्राः स्प्रष्टुम्, आदित्यः, पादपः, काञ्चनः, कालकूटं, स्वस्तिमान्, इत्येतेषां कठिनशब्दानाम् अर्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भवेयुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२. छात्राः आदित्यप्रभा, काञ्चनपादपान्, कालकूटविषम् इत्यादिषु निहितान् विशेषार्थान् अवबुध्य काव्यरसास्वादने समर्थाः भवेयुः।

३. मर्यादापुरुषोत्तमं श्रीरामं प्रति छात्रेषु निष्ठोत्पादनं, श्रद्धोत्पादनञ्च।

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टः, चित्रम्।

पूर्वज्ञानम् -

छात्राः रामकथां सामान्यरूपेण जानन्ति।

प्रस्तावना-

अध्यापकः **'ज्ञातादज्ञातं प्रति'** इति शिक्षणसूत्रमनुसरन् छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
गतपाठाधारिताः	
१. सीता कस्य अनादरं कृतवती?	सीता रावणस्य अनादरं कृतवती।
२. सीता कं प्रशंसितवती ?	सीता रामं प्रशंसितवती।
३. सीता रामरावणयोः मध्ये कथं? गुणभेदं कृतवती?	(समस्यात्मक–प्रश्नः)

उद्देश्यकथनम् -

अस्मिन् सन्दर्भे वयमद्य 'सीता रावणं भर्त्सयति' इति पाठं पठामः, इत्युक्त्वा अध्यापकः श्यामपट्टोपरि पाठस्य नाम लिखति।

प्रस्तुतीकरणम्-

'शुभम्' पाठ्यपुस्तकं, तृतीयः भागः पृष्ठसङ्ख्या–२४

त्वं पुनर्जम्बुकः .....प्रधर्षयितुमिच्छसि–इत्येते श्लोकाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदर्शपाठः -

छात्राध्यापकः गति–यति–लय–भाव–पुरस्सरम् आरोहावरोहक्रमेण प्रभावोत्पादकरीत्या कक्षोचितस्वरेण पद्यांशस्य आदर्शकाव्यपाठं प्रस्तौति। । सर्वे छात्राः सावधानतया शृण्वन्ति।

अनुपाठः -

अध्यापकः कतिपयछात्रान् क्रमशः अनुपाठाय निर्दिशति। अन्ये सावधानतया शृण्वन्ति।

अशुद्धिसंशोधनम् -

अध्यापकः छात्रैः अनुपाठे पठितानाम् अशुद्धशब्दानां संशोधनं श्यामपट्टोपरि लेखनेन छात्राणां सहयोगेन च करोति।

स्पष्टीकरणम् -

क. प्रथमश्लोकस्य

पदच्छेदः -

त्वं पुनः जम्बुकः सिंही माम् इच्छसि सुदुर्लभाम्।
न अहं शक्या त्वया स्प्रष्टुम् आदित्यस्य प्रभा यथा।।

काठिन्यनिवारणम्-

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
स्प्रष्टुम्	व्युत्पत्तिः	स्पृश्+तुमुन्	स्पर्श कुर्तुम्	एतस्य शब्दस्य वाक्यप्रयोगं कुर्वन्तु।
आदित्यः	पर्याय–विधिः	रविः, भानुः, दिनेशः, दिवाकरः	सूर्यः	एतस्य पर्यायशब्दान् वदन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाङ्क्षाप्रश्नाः -

प्रश्नाः	**उत्तराणि**
१. कः इच्छति?	त्वम् (रावणः) इच्छसि।
२. कीदृशः त्वम्?	जम्बुकः त्वम्।
३. काम् इच्छसि?	माम् (सीताम्) इच्छसि।
४. कीदृशीं माम्?	सिंही माम्।
५. अन्यत् कीदृशीं माम्?	सुदुर्लभां माम्।
६. का स्प्रष्टुं न शक्या?	अहं स्प्रष्टुं न शक्या।
७. केन स्प्रष्टुं न शक्या?	त्वया स्प्रष्टुं न शक्या।
८. कथं स्प्रष्टुं न शक्या?	यथा आदित्यस्य प्रभा।

अन्वयरचना -

पुनः त्वं जम्बुकः मां सुदुर्लभां सिंही इच्छसि। यथा आदित्यस्य प्रभा (तथा) अहं त्वया स्प्रष्टुं न शक्या।

ख. द्वितीयश्लोकस्य।

पदच्छेदः -

पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक्।
राघवस्य प्रियां भार्यां यः त्वम् इच्छसि राक्षस।।

काठिन्यनिवारणम्-

शब्दाः	**विधयः**	**प्रयोगाः**	**अर्थाः**	**मूल्याङ्कनम्**
पादपः	विश्लेषणम्	पादैः पिबति इति पादपः	वृक्षः	वाक्यप्रयोगं कुर्वन्तु।
काञ्चनः	विश्लेषणम्	कञ्चनेन स्वर्णेन निर्मितः काञ्चनः	स्वर्णनिर्मितः	वाक्यप्रयोगं कुर्वन्तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	**उत्तराणि**
१.	कः पश्यति ?	त्वं (रावणः) पश्यसि।
२.	कीदृशः त्वम् ?	मन्दभाक् त्वम्।
३.	किं पश्यसि ?	पादपान् पश्यसि।
४.	कीदृशान् पादपान्?	काञ्चनान् पादपान्।
५.	कति पादपान्?	बहून् पादपान्।
६.	त्वं किम् इच्छसि?	भार्याम् इच्छसि।
७.	कस्य भार्याम्?	रामस्य भार्याम्।
८.	कीदृशीं भार्याम्?	प्रियां भार्याम्।

अन्वयरचना -

मन्दभाक्, राक्षस! यः त्वं राघवस्य प्रियां भार्याम् इच्छसि, नूनं बहून् काञ्चनान् पादपान् पश्यसि।

ग. तृतीयश्लोकस्य।

पदच्छेदः -

कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुम् इच्छसि।
राघवस्य प्रियां भार्यां यो अधिगन्तुं त्वम् इच्छसि।।

काठिन्यनिवारणम्-

शब्दाः	**विधयः**	**प्रयोगाः**	**अर्थाः**	**मूल्याङ्कनम्**
कालकूटम्	कथोपकथन–विधिः	समुद्रमन्थनात् कालकूटविषः उत्पन्नः इति कथावर्णनम्	हालाहलम् (महाविषः)	समुद्रमन्थनात् अन्यत् किम आगतम्?
स्वस्तिमान्	विश्लेषणम्	स्वस्तियुक्तः	सकुशलः	वाक्यप्रयोगं कुरु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	**उत्तराणि**
१.	कः गन्तुम् इच्छसि?	त्वं (रावणः) गन्तुम् इच्छसि
२.	कथं भूत्वा गन्तुमिच्छासि?	स्वस्तिमान् गन्तुम् इच्छसि।
३.	किं पीत्वा गन्तुमिच्छसि?	विषं पीत्वा।
४.	कं विषं पीत्वा?	कालकूटं विषं पीत्वा।
५.	तथा त्वं किम् इच्छसि?	अधिगन्तुम् इच्छसि।
६.	किम् अधिगन्तुम् इच्छसि?	राघवस्य भार्याम्।
७.	कीदृशीं भार्यायम्?	प्रियां भार्याम्।

अन्वयरचना-

यः त्वं राघवस्य प्रियां भार्याम् अधिगन्तुम् इच्छसि, कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुम् इच्छसि।

घ. चतुर्थश्लोकस्य।

पदच्छेदः -

अवसज्य शिलां कण्ठे समुद्रं तर्तुम् इच्छसि।

यः रामस्य प्रियां भार्यां प्रधर्षयितुम् इच्छसि।

काठिन्यनिवारणम्-

शब्दाः	**विधयः**	**प्रयोगाः**	**अर्थाः**	**मूल्याकङ्नम्**
अवसज्य	व्युत्पत्तिः	अव+सि+ल्यप्	बन्धनं कृत्वा	वाक्यप्रयोगं कुरु
तर्तुम्	विश्लेषणम्	तरणं करणार्थम्	तरणं कर्तुम्	वाक्यप्रयोगं कुरु
प्रधर्षयितुम	व्युत्पत्तिः	प्र+धृष्+तुमुन्	तिरस्कर्तुम्	वाक्यप्रयोगं कुरु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाङ्क्षाप्रश्नाः -

प्रश्नाः	उत्तराणि
१. किं कर्तुम् इच्छसि?	तर्तुम् इच्छसि।
२. किं तर्तुम् इच्छसि?	समुद्रं तर्तुम् इच्छसि।
३. कथं तर्तुम इच्छसि?	कण्ठे शिलाम् अवसज्य।
४. तथा त्वं किम् इच्छसि?	प्रधर्षयितुम् इच्छसि।
५. कां प्रधर्षयितुम् इच्छसि?	राघवस्य प्रियां भार्याम्।

अन्वयरचना-

त्वं यः रामस्य प्रियां भार्यां प्रधर्षयितुम् इच्छसि, कण्ठे शिलाम् अवसज्य समुद्रं तर्तुम् इच्छसि।

श्यामपट्टकार्यम् -

अध्यापकः छात्रान् श्यामपट्टोपरि लिखितांशान् स्व–स्व अभ्यासपुस्तिकासु लेखनार्थं निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

अध्यापककथनम् -

रावणं भर्त्सयन्ती सीता वदति यत् यथा कश्चन् शृंगालः सिंहीम् आक्रान्तुं न शक्नोति तथैव त्वमपि माम् अधिगन्तुं न शक्नोसि। यथा सूर्यस्य प्रभा स्प्रष्टुं न शक्या तथैव अहमपि। यथा कश्चिदपि कालकूटविषं पीत्वां जीवितुं न शक्नोति, कण्ठे पाषाणं बद्ध्वा तरणं कर्तुं न शक्नोति, तथैव मां हृत्वा कोऽपि जीवितुं न शक्नोति। सम्भवतः त्वं मृत्युं वाञ्छसि, अतएव महतः पराक्रमशालिनः रामस्य प्रियां पत्नीं हर्तुमिच्छसि।

सौन्दर्यानुभूति-प्रश्नाः -

१. सीतायाः हरणेन रावणः कीदृशान् क्लेशान् प्राप्नुयात्?

२. 'राघवस्य प्रियां भार्याम्' इति सम्बोधनेन सीतायाः कीदृशः मनोभावः वर्णितः?

३. 'कालकूटविषं पीत्वा स्वस्तिमान्' इति कथनस्य कः आशयः? अत्र केन अलङ्कारेण सौन्दर्यम्?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुलना- अयमेव भावः गोस्वामिना तुलसीदासेन रचिते काव्येऽपि दृश्यते–

कह सीता धरि धीरजु गाढ़ा। आया गयऊ प्रभु रहु खल ठाडा।

जिमि हरिबधुहि छुद्रसस चाहा। भएसि कालबस निसिचर नाहा।।

उभयवर्णनयोः मध्ये किं साम्यं दृश्यते?

पुनरावृत्त्यात्मकप्रश्नाः -

१. सीता 'जम्बुकः' इति कम् उक्तवती?
२. सीता कथं स्प्रष्टुं न शक्या?
३. कः स्वस्तिमान् न भवति?
४. तरणं कर्तुं कः न शक्नोति?
५. सिंहशृगालयोर्मध्ये कः भेदः ?

सस्वरपाठः -

पुनरेकवारं अध्यापकः कक्षायां काव्यमयवातावरणस्य स्थिरीकरणार्थं काव्यसौन्दर्यस्य रसास्वादनार्थञ्च प्रभावोत्पादकरीत्या सस्वरकाव्यपाठं करोति।

गृहकार्यम् -

एतस्य पाठस्य केन्द्रीयभावं लिखन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतपद्यपाठयोजना-३

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालय

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	द्वितीयः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (पद्यम्)	**प्रकरणम्**	–	**सुभाषितानि**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतपद्यसाहित्याध्ययने रुचेः जागरणम्।

२. छात्रेषु गति लयतिनुसारं काव्यपाठक्षमतायाः विकासः।

३. छात्रेषु संस्कृतपद्यस्य अर्थसहितवाचनक्षमतायाः विकासः।

४. छात्रेषु पद्यगतभावनामवबोधक्षमतायाः विकासः।

५. छात्रेभ्यः संस्कृतपद्यरचनाशैलीनां परिचयप्रदानम्।

६. छात्रेभ्यः संस्कृतकवीनां परिचयप्रदानम्।

७. छात्राणां कविभावनाभिः तादात्म्यसंस्थापनम्।

८. छात्राणां वर्णन–कल्पना–रचनादि–बौद्धिकशक्तीतनाम् अभिवर्द्धनम्।

९. छात्रेभ्यः संस्कृतकाव्यसौन्दर्यस्य रसास्वादनाय प्रेरणाप्रदानम्।

१०. छात्रेभ्यः स्वयं कवितारचनायाः प्रेरणाप्रदानम्।

विशिष्टोद्देश्यानि -

१. छात्राः नमन्ति, फलिनः, शुष्क, कदाचन, उद्यमेन, सिद्धयन्ति, मनोरथैः, सुप्तः, प्रविशन्ति इत्येतेषां कठिनशब्दानाम् अर्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भवेयुः।

२. छात्रेषु परिश्रमं प्रति सकारात्मक–अभिवृत्तेः जागरणम्।

३. छात्राणां नैतिकज्ञानसंवर्धनं तदनुगुणम् आचरणाय प्रेरणाप्रदानञ्च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, संङ्केतिका, आकुञ्चनश्यामपट्टः, चित्रद्वयं, पाठ्यपुस्तकञ्च।

पूर्वज्ञानम् -

छात्राः सुभाषितानां विषये नैतिकज्ञानस्य महत्त्वविषये च सामान्यरूपेण जानन्ति।

प्रस्तावना-

अध्यापकः **'ज्ञातात् अज्ञातं प्रति'** इति शिक्षणसूत्रम् अनुसरन् छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१. मनुष्याः कति प्रकारकाः भवन्ति ?	१. मनुष्याः दुर्जनाः सज्जनाः च भवन्ति
२. दुर्जनाः कथं व्यवहरन्ति?	२. दुर्जनाः दुर्व्यवहारं कुर्वन्ति।
३. सज्जनाः कथं व्यवहारं कुर्वन्ति?	३. सज्जनाः सद्व्यवहारं कुर्वन्ति।
४. सज्जनानां वचनानि कीदृशानि भवन्ति?	(समस्यात्मकः प्रश्नः)

उद्देश्यकथनम् -

अद्य वयं नैतिकज्ञान सम्पादनाय 'सुभाषितानि' इति पाठं पठामः, इत्युक्त्वा छात्राध्यापकः श्यामपट्टोपरि पाठस्य शीर्षकं लिखति।

प्रस्तुतीकरणम् -

नमन्ति फलिनो वृक्षाः——————————————प्रविशन्ति मुखे मृगाः।।

आदर्शपाठः -

अध्यापकः गतियतिलयभावानुसारम् आरोहावरोहक्रमेण प्रभावोत्पादकरीत्या कक्षोचितस्वरेण पद्यांशस्य आदर्शकाव्यपाठं प्रस्तौति।

अनुपाठः -

अध्यापकः कतिपयछात्रान् क्रमशः अनुपाठाय निर्दिशति। अन्ये सावधानं शृण्वन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशुद्धिसंशोधनम्-

अयापकः छात्रेः अनुपाठे पठितानाम् अशुद्धशब्दानां संशोधनतया श्यामपट्टोपरि लेखनेन छात्राणां सहयोगेन च करोति।

स्पष्टीकरणम् -

पदच्छेदः-

नमन्ति, फलिनः, वृक्षाः, नमन्ति, गुणिनः, जनाः।

शुष्कवृक्षाः, च, मूर्खाः, च, न नमन्ति, कदाचन।।

काठिन्यनिवारणम्-

शब्दाः	विधयः	प्रयोगाः	अर्थाः	मूल्याङ्कनम्
नमन्ति	व्युत्पत्तिः	नम्+लट्+प्र.पु. बहु व.	झुकते है	वाक्य प्रयोगं कुरुत
फलिनः	विश्लेषणम्	फलानि सन्ति येषु ते	फलों से युक्त	फलिनः वृक्षाः के?
शुष्क	वाक्यप्रयोगः	ग्रीष्मकाले वस्त्रं शीघ्रं शुष्कं भवति।	सूखा	वाक्यप्रयोगं कुरुत।
कदाचन	वाक्यप्रयोगः	अहं कदाचन तव गृहमागमिष्यामि। कदा इति निश्चितं नास्ति।	कभी	वाक्यप्रयोगं कुरुत।
उद्यमेन	वाक्यप्रयोगः	यः उद्यमं करोति सः सफलः भवति।	परिश्रम से	वाक्यप्रयोगं कुरुत
सिध्यन्ति	व्युत्पत्तिः	सिध्+लट्+प्र.पु, ब.व.	सिद्ध होते हैं	वाक्यप्रयोगं कुरुत
मनोरथैः	वाक्यप्रयोगः	केवलं मनोरथैः सफलतां न प्राप्यते, परिश्रमः करणीयः	मनोकामनाओं से	वाक्यप्रयोगं कुरुत
सुप्तः	व्युत्पत्तिः	सुप्+क्त	सोया हुआ	वाक्यप्रयोगं कुरुत
प्रविशन्ति	व्युत्पत्ति	प्र+विश्+लट् प्र.पु., ब.व.	प्रवेश करते हैं	वाक्यप्रयोगं कुरुत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

.ख. द्वितीयश्लोकस्य।

पदच्छेदः :-

उद्यमेन, हि, सिध्यन्ति, कार्याणि, न मनोरथैः।

न, हि, सुप्तस्य, सिंहस्य, प्रविशन्ति, मुखे, मृगाः।।

आकाङ्क्षाप्रश्नाः -

प्रश्नाः	**उत्तराणि**
१. के नमन्ति?	वृक्षाः नमन्ति।
२. कीदृशाः वृक्षाः नमन्ति?	फलिनः वृक्षाः नमन्ति।
३. अन्ये के नमन्ति?	जनाः नमन्ति।
४. कीदृशाः जनाः नमन्ति?	गुणिनः जनाः नमन्ति।
५. के न नमन्ति?	वृक्षाः न नमन्ति।
६. कीदृशाः वृक्षाः न नमन्ति?	शुष्कवृक्षाः न नमन्ति।
७. अन्ये के न नमन्ति?	मूर्खाः न नमन्ति।
८. कदा न नमन्ति?	कदाचन न नमन्ति।

अन्वयरचना-

फलिनः वृक्षाः नमन्ति, गुणिनः जनाः नमन्ति। शुष्कवृक्षाः च मूर्खाः च न कदाचन नमन्ति।

आकाङ्क्षाप्रश्नाः -

	प्रश्नाः	**उत्तराणि**
१.	कार्याणि कथं सिध्यन्ति?	कार्याणि उद्यमेन सिध्यन्ति।
२.	कार्याणि कथं न सिध्यन्ति ?	कार्याणि मनोरथैः न सिध्यन्ति।
३.	मृगाः कुत्र न प्रविशन्ति ?	मृगाः मुखे न प्रविशन्ति।
४.	कस्य मुखे न प्रविशन्ति?	सिंहस्य मुखे न प्रविशन्ति
५.	कीदृशस्य सिंहस्य मुखे न प्रविशन्ति?	सुप्तस्य सिंहस्य मुखे न प्रविशन्ति।

अन्वयरचना -

कार्याणि उद्यमेन हि सिध्यन्ति मनोरथैः न। (यथा) मृगाः सुप्तस्य सिंहस्य मुख न हि प्रविशन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्यामपट्टकार्यम् -

अध्यापकः छात्रान् श्यामपट्टोपरि लिखितांशान् स्व–स्व–अभ्यासपुस्तिकासु लेखनार्थं निर्दिशति। स्वयं च कक्षायाः निरीक्षणं करोति।

अध्यापककथनम् -

प्रथमश्लोके नम्रतायाः महत्त्वं प्रतिपादितमस्ति। ये सज्जनाः सद्गुणसम्पन्नाः भवन्ति ते विनम्राः भवन्ति न तु उद्धताः। यथा फलिनः वृक्षाः नमन्ति। अर्थात् यदा वृक्षेषु फलोद्गमः भवति तदा वृक्षाणां फलसम्पन्नाः शाखाः अधः नमन्ति, तदा एवं भाति यद् शाखाः स्वविनम्रभारं प्रकटयन्त्यः सन्ति। तद्वदेव गुणसम्पन्नाः समृद्धिशीलाः पुरुषाः अपि नम्राः भवन्ति, ते कदापि औद्धत्यं न प्रकटयन्ति। सर्वैः सह विनम्रभावेन एव व्यवहरन्ति। किन्तु मूर्खाः गुणहीना तु कदापि न नमन्ति। आत्मानं पण्डितं मन्यमानाः ते औद्धत्यमेव प्रकटयन्ति। यथा शुष्काः वृक्षाः स्थाणुः इव तिष्ठन्ति कदापि न नमन्ति तथैव मूर्खाः अपि विनम्राः न भवन्ति।

द्वितीयश्लोके उद्यममहिमा वर्णिताऽस्ति। अस्माकं सर्वाण्यापि कार्याणि उद्यमेन एव सिध्यन्ति। उद्योगी पुरुषः एव जीवने साफल्यं प्राप्नोति। यदि कश्चन 'शेखचिल्ली' इव केवलं विचारं करोति, तं विचारं कार्यरूपे क्रियारूपे न आनयति तर्हि सः कदापि सफलतां प्राप्तुं न शक्नोति। कार्याणि इच्छाभिः मनोकामनाभिः वा न सिध्यन्ति। यथा कश्चन सिंहः शयानः एव भोजनम् इच्छति चेत् भोजनं न प्राप्नोति। तदर्थं तेन सिंहेन पराक्रमः करणीयः भविष्यति। यावत् सः आखेटं न करिष्यति तावत् तस्य बुभुक्षा निवारिता न भविष्यति। कश्चन मृगः स्वयमेव तस्य समीपम् आगत्य 'मां खादतु' इति न वदिष्यति। तेन परिश्रमः करणीयः एव।

एवमेव अस्माभिः अपि जीवने उद्यमः करणीयः। परिश्रमेण विना वयं किमपि प्राप्तुं न शक्नुमः। अतएव प्रयत्नो विधेयः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सौन्दर्यानुभूति-प्रश्नाः

१. 'नमन्ति फलिनः वृक्षाः'—इत्यस्य भावं स्पष्टीकुरुत?

२. परिश्रमस्य किं महत्वम्?

३. 'सुप्तस्य सिंहस्य' इति प्रयोगे किं वैशिष्ट्यम्?

तुलना-

एतादृशः एव भावः एतयोः श्लोकयोः अपि दृश्यते—

भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्भूरिविलम्बिनो घनाः।

अनुद्धताः सत्पुरूषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।

अथ च —

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी दैवेन देयमिति कापुरुषाः वदन्ति।

दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।।

१. उभयत्र वृक्षस्य वर्णनं कथं कृतम्?

२. उभयत्र सिंहशब्दस्य प्रयोगे किं विशिष्टं सौन्दर्यम्?

पुनरावृत्यात्मकप्रश्नाः -

१. के के नमन्ति?

२. के के न नमन्ति?

३. सत्पुरूषाः कीदृशाः भवन्ति?

४. कार्याणि कथं सिध्यन्ति ?

५. मृगाः कुत्र न प्रविशन्ति?

६. सफलताप्राप्तये किं कर्तव्यम्?

सस्वरपाठः -

अध्यापकः पुनरेकवारं कक्षायां काव्यमयवातावरणस्य स्थिरीकरणार्थं काव्यसौन्दर्यस्य रसास्वादनार्थञ्च प्रभावोत्पादकरीत्या सस्वरकाव्यपाठं करोति।

गृहकार्यम् -

१. एतयोः द्वयोः अपि श्लोकयोः भावं अर्थं लिखित्वा आनयन्तु।

२. एतौ द्वावपि श्लोकौ स्मृत्वा कक्षायां श्रावयन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्याकरणशिक्षणम्

व्याकरणस्य महत्त्वम्:-

संस्कृतशिक्षणे व्याकरणस्य महत्त्वपूर्णं स्थानमस्ति। प्राचीनकालादेव व्याकरणस्य प्राधान्यं सर्वैः अंगीकृतम्। सत्स्वपि वेदाङ्गेषु व्याकरणस्य महत्त्वं सर्वोपरि विद्यते–

प्रधानं च षट्सु अङ्गेषु व्याकरणम् इति पाणिनीयशिक्षायामुक्तमपि –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।

व्याकरणं भाषां संस्करोति। अतएव अस्य अपरं नाम "शब्दानुशासनम्" इति। शब्दानां साधुत्वनिरूपणम् असाधुशब्दानां निवारणं च व्याकरणस्य प्रधानं कार्यम्। अतएव "काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इत्युक्त्या व्याकरणशास्त्रस्य सर्वोपयोगित्वं सिद्धम्।

संस्कृतव्याकरणस्य वैशिष्ट्यम् :-

संस्कृतभाषा व्यवहारे नास्ति। अतः व्याकरणाध्ययनेन एव संस्कृतभाषायाः सम्यक्ज्ञानं संभवति।

एषा भाषा संश्लिष्टा अस्ति। प्रकृतिप्रत्ययोः प्रयोगः पृथक् न भवति–

"न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः", इति नियमः

– सन्धिविषयेऽपि तथैव–

"संहितैकपदे नित्या, नित्या धातूपसर्गयोः।
नित्यासमासे, वाक्ये तु सा विवक्षामपेक्षते"।। इति।।

– विभक्तिज्ञानेन अर्थज्ञानं सुकरं भवति।

– समासानां भिन्न–भिन्नविग्रहेण अर्थेऽपि भेदः भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– विशेषणविशेष्ययोः प्रयोगे साम्यं भवेत् यथा–

यल्लिङ्गं, यद्वचनं या च विभक्तिर्विशेष्यस्य।

तल्लिङ्गं, तद्वचनं, सा च विभक्तिर्विशेषणस्य।।

– संस्कृते शब्दानां लिङ्गनिर्धारणं लोकव्यवहारे पुरुषस्त्रीत्ववत् न भवति अपितु शब्दानां प्रकृतिदृष्ट्या प्रत्यययोगेन भवति। यथा–ग्रन्थः, पुस्तिका, पुस्तकम्।

– अन्यभाषासु वचनद्वयमेव अस्ति। परं संस्कृते एकवचनं, द्विवचनं, बहुवचनमिति त्रीणि सन्ति।

– कारकाणां प्रयोगेऽपि संस्कृतभाषायां वैशिष्ट्यम् अस्ति। तदनुगुणं च विभक्तिचिह्नानि योजनीयानि भवन्ति।

– उपसर्गाणां प्रयोगेऽपि अवधानं भवितव्यम्–

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहार-संहार-विहार परिहारवत्।।

– क्रियाणां कालबोधनार्थं संस्कृते दशलकाराः प्रयुज्यन्ते। सर्वे च धातवः दशगणेषु विभक्ताः। लट् लिट्, लुट्, लृट, लेट, लोट, लङ्, लुङ्, लृङ्, (आशीर्लिङ्, विधिलिङ्) इति दश लकाराः।

– भ्वादि, अदादि, जुहोत्यादि, दिवादि, स्वादि, तुदादि, रुधादि, तनादि, क्रयादि, चुरादि, इति दशगणाः। पाणिनेः अनुसारं १६४४ धातवः सन्ति, तेषु १०१० भ्वादिगणे एव सन्ति। पुनश्च धातवः आत्मनेपदिनः, परस्मैपदिनः, उभयपदिनः इति त्रिधा विभक्ताः।

– अव्ययपदानां रूपाणि सर्वत्र समानं भवन्ति–

सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिसु।

सर्वेषु च वचनेषु यन्न व्ययेति तदव्ययम्।।

संस्कृतभाषायाः शुद्धज्ञानार्थं सामान्यव्याकरणनियमानां ज्ञानम् अत्यावश्यकं भवति। सम्यक् ज्ञानाभावे शब्दप्रयोगे भ्रमः भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाल्मीकीयरामायणे हनुमतः वाक्पटुता सूचिता–

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।

बहु व्याहरतानेन न किञ्चिदपभाषितम्।। किष्किन्धा काण्ड।। ३/२६

महाभारतेऽपि व्याकरणस्य महत्त्वं वर्णितमस्ति –

सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते।

तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।। महा. उद्योग (४२/६०)

सामान्यलोकव्यवहारेऽपि भ्रमनिवारणार्थं व्याकरणस्य अध्ययनम् आवश्यकम्–

यद्यपि बहुनाधीषे तदपि पठ पुत्र व्याकरणम्।

स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत।।

व्याकरणज्ञानाभावे स्वजनः (आत्मीयजनः) श्वजनः (कुक्करः) सकलं (सम्पूर्ण) शकलं (खण्डं) सकृत् (एकवारम्) शकृत् (विष्ठा) इति पदानां प्रयोगे भ्रम भवति। प्राचीनकाले विवाहप्रसंगेऽपि व्याकरणज्ञानस्य परीक्षणं भवति इत्यस्य उदाहरणं दृश्यते– एका पण्डितपुत्री विवाहार्थं प्रस्तावितस्य युवकस्य विषये कथयति–

यस्य षष्ठी चतुर्थी च विहस्य विहाय च।

यस्याहं च द्वितीयास्याद् द्वितीयास्यामहं कथम्।।

यः जनः विहस्य (क्रियापदं) इत्यत्र षष्ठी विभक्ति इति, विहाय (क्रियापदं) इत्यत्र चतुर्थी विभक्ति इति अथ च अहम् (सर्वनाम् शब्दः) इत्यत्र द्वितीया विभक्तिः इति कथयति तस्य अहं द्वितीया (पत्नी) कथं भवामि इति।

संस्कृतव्याकरणपरम्परा :-

संस्कृतव्याकरणपरम्परा त्रिधा विभज्यते–

(१) **पूर्वपाणिनि व्याकरणम् :-**

पाणिनेः ऐन्द्रं चान्द्रं काशकृत्स्नं पूर्वम् अन्येऽपि वैयाकरणाः आसन्–

परञ्च नैकस्यापि व्याकरणं समग्रमिति वक्तुं शक्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२) **पाणिनिव्याकरणम् (४५०-३५० ई.पू.) :-**

पाणिनिव्याकरणं समग्रं सम्पूर्ण च अस्ति एतच्च त्रिमुनिव्याकरणम् इति प्रथितम् अत्रादौ पाणिनिः 'अष्टाध्यायी' इति ग्रन्थं रचितवान्। तत्र प्रायः चतुसहस्र (४०००) सूत्राणि सन्ति। एभिः सूत्रैः सम्पूर्ण संस्कृतव्याकरणं सुबद्धम्–

अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्।

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

व्याकरणशास्त्रे सूत्रप्रणाल्याः अत्यधिकं महत्त्वमस्ति। सूत्रमाध्यमेनैव संक्षेपातिसंक्षेपेण कथनं संभवति। अस्मिन् विषये वैयाकरणेषु स्पर्धा एव भवति – ''अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।''

पाणिनेः अनन्तरं कात्यायनः (वररुचिः) सूत्रेषु मध्ये–मध्ये वार्तिकानि **योजितवान्-"उक्तानुक्तदुरुक्तचिन्तनं वार्तिकम्"**। ततः परं महर्षि पतञ्जलिः महाभाष्ये ग्रन्थे पाणिनिसूत्राणां व्याख्यानं कृतवान्। त्रिमुनि व्याकरणेऽपि–**'यथोत्तरं मुनीनां प्रामाण्यम्'** इति अङ्गीक्रियते। तथापि तेषु अन्तिमः पतञ्जलिः सर्वथा पाणिनेः समर्थनमेव करोति–

दाक्षीपुत्रः.....

अतः पाणिनिः संस्कृतव्याकरणस्य केन्द्रबिन्दुरस्ति। पाश्चात्यः भाषाविज्ञानी लियोनार्ड ब्लूमफील्ड पाणिनिम् इत्थं प्रशंसयति

"This grammar of Panini is one of the greatest monuments of human intelligence" (Language, page-11)

पाणिनेः व्याकरणस्यैव समर्थका जयादित्यः, वामनः, जिनेन्द्रबुद्धिः हरदत्तः कैय्यटः, नागोजिभट्टः इत्यादयः वैयाकरणाः प्रसिद्धाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(३) **उत्तरपाणिनिव्याकरणम् :-**

पाणिनेः उत्तरकाले ये अन्ये वैयाकरणाः जाताः तेऽपि पाणिनेः सूत्राणां आधारेणैव व्याकरणग्रन्थान् रचितवन्तः। परं संज्ञाप्रकरणम्, परिभाषाप्रकरणम् इत्यादि क्रमेण क्रमभेदः कृतः। तेषु वैयाकरणसिद्धान्तकौमुद्याः रचयिता भट्टोजिदीक्षितः, रूपमाला लेखकः विमलसरस्वती, प्रक्रियाकौमुदीति च रचयिता रामचन्द्रः, मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी ग्रन्थयोः रचयिता वरदराजः, शब्देन्दुशेखरः, परिभाषेन्दुशेखरः, सिद्धान्तमञ्जूषा चेति ग्रन्थानां लेखकः नागेशः, वाक्यपदीयस्य रचयिता भर्तृहरिः, वैयाकरणभूषणसारस्य रचयिता कौण्डभट्टः इत्येते प्रसिद्धाः।

व्याकरणशिक्षणस्य प्रकाराः :-

व्याकरणस्य ज्ञानम् अत्यन्तम् आवश्यकम्। परं कथं शिक्षणीयम् इत्यत्र भेदाः दृश्यन्ते–

प्रथमं मतम् :-

अस्मिन् मते व्याकरणशिक्षणं विना भाषाशिक्षणमपूर्णं तथा च प्रथमं व्याकरणनियमानां सम्यक्शिक्षणमपेक्षितम् इति।

द्वितीयं मतम् :-

व्याकरणशिक्षणं पृथक्रूपेण न आवश्यकम्। अनौपचारिकरूपेण अनुकरणमाध्यमेन श्रवणभाषणपठनलेखनकौशलाधारेण स्वाभाविकरूपेण भाषाशिक्षणं संभवति इति।

तृतीयं मतम् :-

मध्यममार्गः आश्रयणीयः इति। प्रथमं स्वाभाविकरूपेण। भाषाशिक्षणस्य प्रयासः विधेयः। मध्ये–मध्ये व्यावहारिकव्याकरणस्य क्रियात्मकव्याकरणस्य च शिक्षणं भवेदिति।

व्याकरणशिक्षणस्य उद्देश्यानि :-

व्याकरणशिक्षणस्य इमानि उद्देश्यानि सन्ति –

– संस्कृतभाषायाः ध्वनितत्त्वानां परिचयः

– स्थानप्रयत्नानुगुणं वर्णानामुच्चारणकौशलसम्पादनम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

- शब्दानां विभिन्नरूपाणां ज्ञानम्
- शुद्धवाक्यरचना–कौशलसम्पादनम्
- व्याकरणनियमानां तदनुगुणं प्रयोगाणां च ज्ञानेन भाषायाः सम्यक्ज्ञानम्
- व्याकरणग्रन्थानाम् अध्ययनेन प्रायोगिककार्येण अभ्यासेन च संस्कृतव्यवहारे पूर्णाधिकार प्राप्तिः
- छात्राणां तर्कशक्तेः निरीक्षणशक्तेश्च विकासः
- संस्कृतव्याकरणस्य वैज्ञानिकतायाः ज्ञानम्

व्याकरणशिक्षणविधयः :-

१. पारम्परिकविधिः :-

प्राचीनकाले संस्कृतव्याकरणशिक्षणाय आदौ अष्टाध्यायि सूत्राणि कण्ठस्थी क्रियन्ते स्म ततः परं शिक्षकः सूत्राणां व्याख्या उदाहरणप्रत्युदाहरणैः करोति स्म। सूत्राणां कण्ठस्थीकरणेन व्याकरणनियमाः स्मृतौ दृढं तिष्ठन्ति–

पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्।।

२. आगमन-निगमनविधिः :-

अस्मिन् विधौ द्वे सोपाने वर्तेते –

१. उदाहरणेभ्यः नियमं प्रति – आगमनम्
२. नियमेन उदाहरणं प्रति – निगमनम्

अयं विधिः पाणनीयव्याकरणेऽपि प्रयुक्तः। पाणिनिः आदौ सर्वाणि उदाहरणानि परिशील्यैव नियमरूपेण सूत्राणि रचितवान्। परं शिक्षणकाले प्रथमं सूत्राणि कण्ठस्थीकृत्य, ततः परमेव उदाहरणज्ञानं भवति इति निगमनप्रक्रिया। आगमन–निगमनमिति द्वे प्रक्रिये सम्मेल्यैव एषा विधिः प्रचलति। एवंचेदेव मनोवैज्ञानिकः भवति नो चेत् केवलं नियमात् उदाहरणं प्रतिगमनं नीरसं अमनोवैज्ञानिकं च भवेत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **अव्याकृतिविधिः :-**

अस्मिन् विधौ पृथक्रूपेण व्याकरणशिक्षा न दीयते, अपितु स्वाभाविकरूपेण विभिन्नसंरचनानाम् अभ्यासेन व्याकरणज्ञानं भवति। प्रारम्भिकस्तरे अयं विधिः लाभदायकः।

४. **सहयोगविधिः :-**

व्याकरणस्य साहित्यस्य च संयुक्तरूपेण अध्ययनं क्रियते। साहित्यस्य सूक्ष्मांशानां विश्लेषणं व्याकरणाधारेण क्रियते। व्याकरणज्ञानं विना संस्कृतकाव्यानाम् अध्ययनं रसास्वादनं वा न संभवति। पृथक्रूपेण व्याकरणाध्ययनात् परं काव्याध्ययनं श्रमसाध्यं नीरसं च भवति। अतः काव्याध्ययनसमये एव अपेक्षितानां व्याकरणांशानां बोधनं संभवति। एवं प्रकारेण साहित्येन सह व्याकरणस्य बोधनमेव सहयोगविधिः। केचन प्राचीनपण्डिताः व्याकरणबोधनायैव काव्यानि रचितवन्तः। तत्र भट्टिकाव्यं प्रमुखम् उदाहरणम्।

५. **परियोजनाविधिः :-**

व्याकरणनियमानां बोधनात्परं छात्रेभ्यः लघु–लघु परियोजना दीयते येन माध्यमेन ते स्वयं प्रयासेन उदाहरणानां संकलनं कुर्वन्ति। अनेन व्याकरणबोधोऽपि भवति।

६. **ह्यूरिस्टिकविधिः :-**

आधुनिकविज्ञानशिक्षणे अयं विधिः प्रयुज्यते। सैद्धान्तिकज्ञानं दीयते, ततः परं छात्राः स्वयमेव प्रयोगमाध्यमेन परीक्षणं कुर्वन्तः सम्बद्ध विषयवस्तुविषये जानन्ति। **व्याकरणे**-यथा गुणसन्धेः पाठनानन्तरं गुणसन्धिसहित–भिन्न–भिन्नसन्धीनाम् उदाहरणानि प्रस्तूय तेषु गुणसन्धेः चयनं कर्तुं छात्राः सूच्यन्ते।

व्याकरणशिक्षणस्य सोपानानि :-

व्याकरणशिक्षणस्य इमानि सोपानानि भवन्ति–

१.	प्रस्तावना	२.	उद्देश्यकथम्	३.	प्रस्तुतीकरणम्
४.	विश्लेषणम्	५.	नियमनिर्धारणम्	६.	पुनरावृत्तिः
७.	गृहकार्यम्।				

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतव्याकरणपाठयोजना-१

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालय

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	चतुर्थः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि

दिनांकः – ..... दिवसः – .....

.....

विषयः – संस्कृतम् (व्याकरणम) **प्रकरणम्** – **गुणसन्धिः**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतव्याकरणं प्रति रुचेः उत्पादनम्।

२. छात्रेषु स्थानप्रयत्नानुसारं वर्णानां शुद्धोच्चारणकौशलसम्पादनम्।

३. छात्रेभ्यः साधुसंस्कृतशब्दानां ज्ञानप्रदानम्।

४. छात्रेभ्यः संस्कृतव्याकरणस्य ध्वनितत्त्वानां ज्ञानप्रदानम्।

५. छात्रेभ्यः पदानां व्युत्पत्तिमाध्यमेन अर्थज्ञानसामर्थ्यस्य विकसनम्।

६. छात्रेभ्यः संस्कृतव्याकरणगत–सन्धि–समास–कारक–प्रत्ययादीनां नियमानां ज्ञानप्रदानम्।

७. छात्रेषु सरलसंस्कृतभाषाप्रयोगकौशलसम्पादनम्।

८. छात्राणां वैज्ञानिकचिन्तनशक्तेः तर्कशक्तेश्च विकासः।

९. छात्रेषु व्याकरणशास्त्रीयग्रन्थानामध्ययने अनुसन्धाने च रुचेः जागरणम्।

विशिष्टोद्देश्यानि -

१. गुणसन्धियुक्तपदानां प्रयोगकौशलसम्पादनम्।

२. गुणसन्धियुक्तपदानां विच्छेदकौशलसम्पादनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. गुणसन्धेः नियमज्ञानम्।

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टोपरि लिखितानि कानिचन गुणसन्धियुक्तपदानि।

पूर्वज्ञानम् -

छात्राः सन्धेः सामान्यार्थं महत्वञ्च जानन्ति, अथ च छात्राः दीर्घसन्धेः अध्ययनं कृतवन्तः।

प्रस्तावना -

अध्यापकः ज्ञातादज्ञातं प्रति इति शिक्षणसूत्रमनुसरन् छात्रान्ः पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१. 'देवालयः' इत्यस्य शब्दस्य सन्धि–विच्छेदः कथं भवति?	देव+आलयः
२. अस्मिन् पदे कः सन्धि?	अस्मिन् पदे दीर्घसन्धिः अस्ति।
३. 'सुरेन्द्रः' इत्यस्मिन् पदे कः सन्धिः?	(समस्यात्मक–प्रश्नः)

उद्देश्यकथनम् -

अद्य वयं गुणसन्धिविषये पठामः, इत्युक्त्वा अध्यापकः श्यामपट्टोपरि प्रकरणस्य नाम लिखति।

प्रस्तुतीकरणम् -

अध्यापकः अधोनिर्दिष्टानि उदाहरणानि प्रस्तौति।

१. सुरेन्द्रः विद्यावान् अस्ति।

२. अहं रमेशं नमामि।

३. प्रातःकाले सूर्योदयः भवति।

४. ग्रामे महोत्सवः प्रचलति।

५. ब्रह्मर्षिः ब्रह्मदर्शनं करोति।

६. महर्षिः तपस्यां करोति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्लेषणम् -

I	१.	प्रथम वाक्ये सन्धियुक्तं पदं किम्?	–	सुरेन्द्रः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	सुर+इन्द्रः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	अ
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	इ
	५.	उभयोर्मेलनेन किं भवति?	–	ए
II	१.	द्वितीयवाक्ये सन्धियुक्तं पदं किम्?	–	रमेशः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	रमा+ईशः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	आ
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	ई
	५.	उभयोर्मेलनेन किं भवति?	–	ए
III	१.	तृतीयवाक्ये सन्धियुक्तं पदं किम्?	–	सूर्योदयः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	सूर्य+उदयः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	अ
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	उ
	५.	उभयोर्मेलनेन किं भवति?	–	ओ
IV	१.	चतुर्थवाक्ये सन्धियुक्तं पदं किम्?	–	महोत्सवः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	महा+उत्सवः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	आ
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	उ
	५.	उभयोर्मेलनेन किं भवति?	–	ओ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

V

१. पञ्चमवाक्ये सन्धियुक्तं पदं किम्? – ब्रह्मर्षिः

२. अस्य सन्धिविच्छेदः कथं भवति? – ब्रह्म+ऋषिः

३. प्रथमशब्दस्य अन्तिमः वर्णः कः? – अ

४. द्वितीयशब्दस्य आदिवर्णः कः? – ऋ

५. उभयोर्मेलनेन किं भवति? – अर्

VI

१. षष्ठवाक्ये सन्धियुक्तं पदं किम्? – महर्षिः

२. अस्य सन्धिविच्छेदः कथं भवति? – महा+ऋषिः

३. प्रथमशब्दस्य अन्तिमः वर्णः कः? – आ

४. द्वितीयशब्दस्य आदिवर्णः कः? – ऋ

५. उभयोर्मेलनेन किं भवति? – अर्

श्यामपट्टसारः -

सन्धिपदम्	सन्धिविच्छेदः	विश्लेषणम्
सुरेन्द्रः	सुर+इन्द्रः	अ+इ=ए
रमेशः	रमा+ईश	आ+ई=ए
सूर्योदयः	सूर्य+उदयः	अ+उ=ओ
महोत्सवः	महा+उत्सवः	आ+ऊ=ओ
ब्रह्मर्षि	ब्रह्म+ऋषि	अ+ऋ=अर्
महर्षि	महा+ऋषि	आ+ऋ=अर्

नियमनिर्धारणम् -

अ/आ वर्णानन्तरं इ/ई, उ/ऊ, ऋ वर्णाः आगच्छन्ति चेत् उभयोः स्थाने क्रमशः ए, ओ, अर् आदेशः भवति। तद्यथा–

अ	इ	ए
अ	उ	ओ
अ	ऋ	अर्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रयोगाभ्यासः -

छात्राध्यापकः पुनः कानिचन सन्धियुक्तपदानि प्रस्तौति, छात्रान् च सन्धिविच्छेदनार्थं निर्दिशति।

सन्धिविच्छेदं कुर्वन्तु–

महेशः, महेन्द्रः, महोदयः, चन्द्रोदयः, देवर्षिः।

सन्धिं कुर्वन्तु–

सर्व+ईशः, पर+उपकारः, राजा+ऋषिः, ग्रीष्म+ऋतुः।

गृहकार्यम् -

स्वपाठ्यपुस्तकात् गुणसन्धेः दश उदाहरणानि चित्वा सन्धिविच्छेदं कुर्वन्तु।

ऋषीणामाद्यानां गहनमननावाप्तसुयशाः
श्रुतीनां शास्त्राणां निखिलगुण-तत्त्वार्थनिलया
पुरातत्त्वाधारा सकलभव-ज्ञानाब्धिविभवा
जयेद् दैवी वाणी त्रिभुवनमनोज्ञा बुधप्रिया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतव्याकरण पाठयोजना-२

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालयः

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	द्वितीयम्	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (व्याकरणम)	**प्रकरणम्**	–	**व्यञ्जनसन्धिः**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतव्याकरणं प्रति रुचेः उत्पादनम्।

२. छात्रेषु स्थानप्रयत्नानुसारं वर्णानां शुद्धोच्चारणकौशलसम्पादनम्।

३. छात्रेभ्यः साधुसंस्कृतशब्दानां ज्ञानप्रदानम्।

४. छात्रेभ्यः संस्कृतव्याकरणस्य ध्वनितत्वानां ज्ञानप्रदानम्।

५. छात्रेभ्यः पदानां व्युत्पत्तिमाध्यमेन अर्थज्ञानसामर्थस्य विकासः।

६. छात्रेषु संस्कृतव्याकरणगत–सन्धि–समास–कारक–प्रत्ययादीनां नियमानां ज्ञानप्रदानम्।

७. छात्रेषु सरलसंस्कृतभाषाप्रयोगकौशलसम्पादनम्।

८. छात्राणां वैज्ञानिकचिन्तनशक्तेः तर्कशक्तेश्च विकासनम्।

९. छात्रेषु व्याकरणशास्त्रीयग्रन्थानामध्ययने अनुसन्धाने च रुचेः जागरणम्।

विशिष्टोद्देश्यानि-

१. व्यञ्जनसन्धियुक्तपदानां प्रयोगकौशलसम्पादनम्।

२. व्यञ्जनसन्धियुक्तपदानां विच्छेदकौशलसम्पादनम्।

३. गुणसन्धेः नियमज्ञानम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टोपरि, लिखितानि कानिचन व्यञ्जनसन्धियुक्ततपदानि।

पूर्वज्ञानम् -

छात्राः सन्धिविषये सामान्यरूपेण जानन्ति। स्वरसन्धेः च अध्ययनं कृतवन्तः।

प्रस्तावना-

अध्यापकः **'ज्ञातादज्ञातं प्रति'** इति शिक्षणसूत्रमनुसरन् छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१. सन्धेः कति भेदाः सन्ति?	सन्धेः त्रयः भेदाः सन्ति—स्वरसन्धिः व्यञ्जनसन्धिः, विसर्गसन्धिः।
२. विद्यालयः, महेशः, प्रत्येकम् इत्यादिषु पदेषु कः सन्धिः?	एतेषु पदेषु स्वरसन्धिः अस्ति।
३. काश्चित् इत्यस्मिन् पदे कः सन्धिः?	(समस्यात्मक—प्रश्नः)

उद्देश्यकथनम् -

अद्य वयं व्यञ्जनसन्धिविषये पठामः, इत्युक्त्वा छात्राध्यापकः श्यामपट्टोपरि प्रकरणस्य नाम लिखति।

प्रस्तुतीकरणम्-

अध्यापकः अधोलिखितानि उदाहरणवाक्यानि प्रस्तौति—

१. कश्चित् पुरुषः गच्छति।

२. सः सच्चरित्र अस्ति।

३. रावणः दुष्टः आसीत्।

४. रामः मम इष्टः अस्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्लेषणम्-

I	१.	प्रथम वाक्ये सन्धियुक्तं पदं किम्?	–	कश्चित्
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	कस्+चित्
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	स
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	च्
	५.	उभयोर्मेलनेन किं भवति?	–	सकारस्य स्थाने शकार :–श्च
II	१.	द्वितीयवाक्ये सन्धियुक्तं पदं किम्?	–	सच्चरित्रः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	सत्+चरित्रः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	त्
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	च्
	५.	उभयोर्मेलनेन किं भवति?	–	तकारस्य स्थाने चकार :–च्च
III	१.	तृतीयवाक्ये सन्धियुक्तं पदं किम्?	–	दुष्टः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	दुष्+तः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	ष्
	४.	द्वितीयशब्दस्य आदौदवर्णः कः?	–	त
	५.	उभयोर्मेलनेन किं भवति?	–	तकारस्य स्थाने टकार :–ष्ट
IV	१.	चतुर्थवाक्ये सन्धियुक्तं पदं किम्?	–	इष्टः
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	इष्+तः
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	ष्
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	त्
	५.	उभयोर्मेलनेन किं भवति?	–	तकारस्य स्थाने टकार

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्यामपट्टसारः -

सन्धिपदम्	सन्धिविच्छेदः	विश्लेषणम्
कश्चित्	कस्+चित्	स्+च्=श्च्
रामश्च	रामस्+च	स्+च्=श्च्
सच्चरित्र	सत्+चरित्रः	त्+च=च्च्
तच्च	तत्+च	त्+च्=च्च्
दुष्टः	दुष्+तः	ष्+त्=ष्ट्
इष्टः	इष्+तः	ष्+त्=ष्ट्
उड्डीनः	उत्+डीनः	त्+ड्=ड्ड्

नियमनिर्धारणम् -

सकार तवर्गयोः शकार चवर्गाण्यां सह संयोगः भवति चेत्, सकार त वर्गयोः स्थाने शकारचवर्गौ भवतः। एवमेव सकारतवर्गयोः षकारटवर्गाभ्यां सह संयोगः भवति चेत्, सकारतवर्गयोः स्थाने षकारटवर्गौ भवतः।

प्रयोगाभ्यासः -

अध्यापकः पुनः कानिचन् सन्धियुक्तपदानि प्रस्तौति, छात्रान् च सन्धिविच्छेदनार्थं निर्दिशति।

सज्जनः, सच्चित्, हरिश्शेते, उच्चारणम्, उज्ज्वलः, दुश्चरित्रः, रामष्षष्ठः, कृष्णः, राष्ट्रम्।

गृहकार्यम्-

स्वपाठ्यपुस्तकात् व्यञ्जनसन्धेः दश उदाहरणानि चित्वा सन्धिविच्छेदं कुर्वन्तु।

अखण्ड मण्डलाकारं, व्याप्तं येन चराचरम्
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः
अज्ञान-तिमिरान्धस्य, ज्ञानाञ्जनशलाकया
चक्षुरुन्मीलितं येन, तस्मैश्री गुरवे नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतव्याकरणपाठयोजना-३

विद्यालयस्य नाम - शासकीय उ.मा.विद्यालयः

कक्षा	–	अष्टमी	वर्ग	–	ब
कालांशः	–	द्वितीयः	अवधिः	–	३५ निमेषाः
छात्रसङ्ख्या	–	७३	मध्यायुः	–	१३ वर्षाणि
दिनांकः	–	.....	दिवसः	–	.....
विषयः	–	संस्कृतम् (व्याकरणम)	**प्रकरणम्**	–	**विसर्गसन्धिः**

सामान्योद्देश्यानि -

१. छात्रेषु संस्कृतव्याकरणं प्रति रुचेः उत्पादनम्।

२. छात्रेषु स्थानप्रयत्नानुसारं वर्णानां शुद्धोच्चारणकौशलसम्पादनम्।

३. छात्रेभ्यः साधुसंस्कृतशब्दानां ज्ञानप्रदानम्।

४. छात्रेभ्यः संस्कृतव्याकरणस्य ध्वनितत्त्वानां ज्ञानप्रदानम्।

५. छात्रेषुः पदानां व्युत्पत्तिमाध्यमेन अर्थज्ञानसामर्थस्य विकासनम्।

६. छात्रेभ्यः संस्कृतव्याकरणगत–सन्धि–समास–कारक–प्रत्ययादीनां नियमानां ज्ञानप्रदानम्।

७. छात्रेषु सरलसंस्कृतभाषाप्रयोगकौशलसम्पादनम्।

८. छात्राणां वैज्ञानिकचिन्तनशक्तेः तर्कशक्तेश्च विकासनम्।

९. छात्रेषु व्याकरणशास्त्रीयग्रन्थानामध्ययने अनुसन्धाने च रूचेः जागरणम्।

विशिष्टोद्देश्यानि -

१. विसर्गसन्धियुक्तपदानां प्रयोगकौशलसम्पादनम्।

२. विसर्गसन्धियुक्तपदानां विच्छेदकौशलसम्पादनम्।

३. विसर्गसन्धेः नियमज्ञानम्।

सहायकोपकरणानि -

श्यामपट्टः, सुधाखण्डः, मार्जनी, सङ्केतिका, आकुञ्चनश्यामपट्टे, लिखितानि कानिचन विसर्गसन्धियुक्तपदानि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वज्ञानम् -

छात्राः स्वरसन्धेः व्यञ्जनसन्धेश्च अध्ययनं कृतवन्तः।

प्रस्तावना -

अध्यापकः **'ज्ञातादज्ञातं प्रति'** इति शिक्षणसूत्रमनुसरन् छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

	प्रस्तावितप्रश्नाः	**संभावितोत्तराणि**
१.	विद्यालयः इत्यस्मिन् पदे कः सन्धि?	अस्मिन् पदे स्वरसन्धिः अस्ति।
२.	सज्जनः इत्यस्मिन् पदे कः सन्धिः?	अस्मिन् पदे व्यञ्जनसन्धिः अस्ति।
३.	नमस्ते इत्यस्मिन् पदे कः सन्धिः?	(समस्यात्मक–प्रश्नः)

उद्देश्यकथनम् -

अद्य वयं विसर्गसन्धिविषये पठामः, इत्युक्त्वा अध्यापकः श्यामपट्टोपरि प्रकरणस्य नाम लिखति।

प्रस्तुतीकरणम् -

छात्राध्यापकः अधोनिर्दिष्टानि उदाहरणवाक्यानि प्रस्तौति–

१. नमस्ते श्रीरामाय।

२. कश्चित् बालकः गच्छति।

३. विद्या यशस्तनोति।

४. सः बालकः निश्चलः अस्ति।

विश्लेषणम् -

I	१.	प्रथमवाक्ये सन्धियुक्तं पदं किम्?	–	नमस्ते
	२.	अस्य सन्धिविच्छेदः कथं भवति?	–	नमः+ते
	३.	प्रथमशब्दस्य अन्तिमः वर्णः कः?	–	: (विसर्ग)
	४.	द्वितीयशब्दस्य आदिवर्णः कः?	–	त्
	५.	उभयोर्मेलनेन किं भवति?	–	स् (विसर्गस्थाने सकारः)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

II १. द्वितीयवाक्ये सन्धियुक्तं पदं किम्? – कश्चित्

२. अस्य सन्धिविच्छेदः कथं भवति? – कः+चित्

३. प्रथमशब्दस्य अन्तिमः वर्णः कः? – : (विसर्ग)

४. द्वितीयशब्दस्य आदिवर्णः कः? – च्

५. उभयोर्मेलनेन किं भवति? – श्च् (विसर्गस्थाने शकारः)

III १. तृतीयवाक्ये सन्धियुक्तं पदं किम्? – यशस्तनोति

२. अस्य सन्धिविच्छेदः कथं भवति? – यशः+तनोति

३. प्रथमशब्दस्य अन्तिमः वर्णः कः? – : (विसर्गः)

४. द्वितीयशब्दस्य आदिवर्णः कः? – त्

५. उभयोर्मेलनेन किं भवति? – सत् (विसर्गस्थाने सकारः)

IV १. चतुर्थवाक्ये सन्धियुक्तं पदं किम्? – निश्चलः

२. अस्य सन्धिविच्छेदः कथं भवति? – निः+चलः

३. प्रथमशब्दस्य अन्तिमः वर्णः कः? – : (विसर्गः)

४. द्वितीयशब्दस्य आदिवर्णः कः? – च्

५. उभयोर्मेलनेन किं भवति? – श्च् (विसर्गस्थाने शकारः)

श्यामपट्टसारः -

सन्धिपदम्	सन्धिविच्छेदः	विश्लेषणम्
नमस्ते	नमः+ते	(: + त्) विसर्गस्थाने सकारः
कश्चित्	कः+चित्	(: + च्) विसर्गस्थाने शकारः
यशस्तनोति	यशः+तनोति	(: + त्) विसर्गस्थाने सकारः
निश्चलः	निः+चलः	(: + च्) विसर्गस्थाने शकारः
निश्छलः	निः+छलः	(: + छ्) विसर्गस्थाने शकारः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नियमनिर्धारणम् -

विसर्गस्य अनन्तरं वर्गस्य प्रथमद्वितीयवर्णाः, शषसवर्णाः वा आयान्ति चेत्, विसर्गस्य स्थाने सकारः भवति।

प्रयोगाभ्यासः -

अध्यापकः पुनः कानिचन पदानि प्रस्तौति छात्राश्च सन्धिविच्छेदनार्थं निर्दिशति–
निस्सारः, धनुष्टंकारः, हरिश्शेते, देवस्तिष्ठति, बालश्चलति, हरिश्च।

गृहकार्यम् -

स्वपाठ्यपुस्तकात् एतादृशानि दश उदाहरणानि चित्वा सन्धिविच्छेदं कुर्वन्तु।

सुवर्णा सद्वृत्ता विविधललितालंकृतिचणा
गुणाढ्या निर्दोषा विबुधनिवहाराधितपदा।
सुरीतिप्रख्याता भवविभवरूपाश्रितरसा
सदेयं शर्वाणी जयतु सुरवाणीह सततम् ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणस्य उपागमाः

भाषाशिक्षणे विभिन्नाः विधयः सन्ति। मातृभाषां तु शिशवः स्वाभाविकरूपेण शिक्षन्ते। भाषाज्ञानानन्तरं क्रमशः अग्रे तस्याः व्याकरणस्य साहित्यस्य वा बोधने काठिन्यं न भवति। परं च मातृभाषाभिन्न भाषाशिक्षणे बहुप्रयासः करणीयः। तदर्थं कृत्रिमं वातावरणं निर्मेयं, विभिन्नविधयः अनुसरणीयाः, भिन्ना उपागमाश्च (Appraoches) आश्रयणीयाः।

उपागमविध्योः मध्ये कश्चन भेदः अस्ति। आगमः व्यापकः भवति। आगमपदेन भाषायाः सम्पूर्णाप्रक्रिया दृष्टिपथे आयाति। मनोवैज्ञानिकसिद्धान्ताः भाषावैज्ञानिक सिद्धान्ताश्च एतादृक्–दृष्टौ आधारभूताः। भाषाशिक्षणस्य मुख्यमुद्देश्यं भवति यत् सर्वेष्वपि सन्दर्भेषु भाषायाः प्रयोगार्थं पर्याप्तं ज्ञानम्। अस्य उद्देश्यस्य प्राप्त्यर्थं विविध–अधिगमप्रक्रियाः अवलम्बनीयाः भवन्ति।

विधयस्तु तात्कालिक–उद्देश्यानां प्राप्तयर्थं प्रतिपदं प्रयुज्यमानानि साधनानि सन्ति, येषां प्रयोगेण अन्तिमलक्ष्यस्य प्राप्तिः सुलभाः। एकस्मिन् आगमे बहूनां विधिनां प्रयोगः संभावति। अतः उपागमः व्यापकसिद्धान्तैः सम्बद्धः भवति। विधिः प्रयोगात्मक–शिक्षणसाधनैः सम्बद्धः भवति। यद्यपि सूक्ष्मविश्लेषणेन उभयोर्मध्ये भेदः ज्ञातुं शक्यते परं प्रयोगकाले उभावपि सहैव गच्छतः। परस्परं च पूरकौ तिष्ठतः।

भाषाशिक्षणे पाश्चात्यशिक्षाशास्त्रिभिः विभिन्नाः उपागमाः दृष्टयः वा प्रतिपादितः तद्यथा–

१. मौखिक–उपागमः (Oral Approach)
२. संरचनात्मक–उपागमः (Structural Approach)
३. सान्दर्भिक–उपागमः (Situational Approach)
४. सम्प्रेषाणात्मक–उपागमः (Communicative Approach)

१. मौखिक उपागमः :-

भाष्यते इति भाषा इति व्युत्पत्त्या, भाषायाः भाषितपक्षस्य तन्नाम मौखिक पक्षस्यैव प्राधान्यम्। भाषायाः मौखिक–उपागमः प्राचीनपरम्परागतः, भाषावैज्ञानिक मनोवैज्ञानिक–सम्मतश्च। विविध–शब्दावल्याः मौखिकाभ्यासेन तेषां वाक्येषु प्रयोगेण च भाषाव्यवहारः सिद्ध्यति। सीमितेन साधनेन अल्पव्ययेन मौखिकोपागमस्य आश्रयणेन भाषाशिक्षणं सम्भावति इति अस्य लाभः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परं मौखिकोपागमस्य क्षेत्रं सीमितं भवति। अस्मिन् उपागमे बहूनां शब्दानामभ्यासः। मौखिक–उपागमः कारणीयः। शब्दानाम् अर्थाः विविधप्रसङ्गेषु भिन्नाः भवन्ति। शब्दानां लक्ष्यार्थः व्यंग्यार्थश्च भिन्नः भवति। तत्सर्वं केवलं शब्दावल्याः अभ्यासेन न ज्ञातुं शक्यते।

२. **संरचनात्मक-उपागमः :-**

भाषायां स्वतन्त्रशब्दैः व्यवहारः न भवति, अपितु वाक्यैः भवति। अतः भाषायाः मुख्या अन्वितिः वाक्यमिति मन्तव्यम्। वाक्ये शब्दानां स्थितिं परिकल्प्य वाक्यसंरचनायाः निर्धारणं भवति। भाषायाः संरचना व्याकरणानुगुणं वाक्यसंरचनाभिः भवति। वाक्यसंरचनाः एव भाषायाः मूलाधारः। अतः तासां ज्ञानेन छात्राः भाषा ज्ञाने व्यवहारे च कुशलाः भवन्ति। क्रमशः शब्दभण्डारस्य वृद्धिः कर्तुं शक्यते।

संरचनात्मकोपागमे अवधेयांशः :-

संरचनात्मकोपागमे शब्दानां अपेक्षया संरचनायाः प्राधान्यम्। संरचनानां माध्यमेन शिक्षणे अवधेयांशाः अधोनिर्दिष्टाः :–

– प्रथमं भाषाध्वनिनां मौखिकाभ्यासः कारणीयः।
– औपचारिकरूपेण व्याकरणनियमानां शिक्षणस्य आवश्यकता नास्ति।
– अनुवादपद्धत्याः आश्रयणम् अनपेक्षितम्। मध्ये मध्ये कुत्रचित् मातृभाषया निर्देशाः दातुं शक्यते।
– मौखिकपक्षस्य अभ्यासानन्तरमेव प्रयोगः करणीयः।
– पाठ्यपुस्तकेषु संरचनानां शब्दावल्याश्च स्तराङ्कनं तार्किकं स्यात्।
– कक्षायां भाषावातावरणस्य निर्माणं करणीयम्।
– संरचनानां पुनः पुनः अभ्यासः अपेक्षितः।
– अभ्यासेषु शुद्धप्रयोगस्य विषये अवधानं स्यात्।
– प्रारम्भिकस्तरे नियन्त्रितशब्दावली स्यात्।

यदि वाक्यसंरचनानां ज्ञानं सम्यक् भवति, तर्हि छात्राः विभिन्नसन्दर्भेषु सरलवाक्यानां प्रयोगे समर्थाः भवन्ति। क्रमशः ते नूतनशब्दानां ज्ञानं प्राप्य संरचनासु तेषां प्रयोगं कर्तुं शक्नुवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **सान्दर्भिकः उपागमः :-**

भाषायाः प्रमुखाः अन्वितिः वाक्यम्। परं यथेष्टेन वाक्यप्रयोगेण भाषाव्यवहारः न सिद्धयति अपितु विविधसन्दर्भानुगुणं भाषाव्यवहारः अपेक्षितः। सन्दर्भ विना वाक्यानाम् अभ्यासः यान्त्रिकः नीरसश्च भवति। भाषायाः प्रारंभिकज्ञानानन्तरं केवलं संरचनानाम् अभ्यासेन सम्पूर्णाभिव्यक्तिः न भवति। अतः विविधसन्दर्भानुगुणं वाक्यसंरचनानां अभ्यासः अपेक्षितः।

सान्दर्भिकोपागमे अवधेयांशाः :-

सान्दर्भिके उपागमे विविधसन्दर्भानुगुणं वाक्यानाम् अभ्यासः कारणीयः। अस्य अवधेयांशाः अधोनिर्दिष्टाः :–

– रोचकसन्दर्भाः प्रस्तोतव्याः।
– प्रथमं छात्रजीवनसम्बद्धाः प्रातिवेशिक–वातावरण–सम्बद्धाः सन्दर्भाश्च प्रस्तोतव्याः।
– सन्दर्भानुगुणं प्रयोगाय वाक्यसंरचनाऽपि निर्देष्टव्या।
– वाक्यप्रयोगे सौकर्यार्थं सहायिकारूपेण शब्दावली प्रस्तोतव्या।
– प्रथमं मौखिकाभ्यासः तत्पश्चादेव लिखिताभ्यासः कारणीयः।
– क्रमशः काल्पनिक–सन्दर्भानामपि अभ्यासः कारयितुं शक्यते।

संस्कृतशिक्षणे आपण–व्यवहारः, कार्यालय–व्यवहारः, मित्रमेलनं, दूरवाणिसम्भाषणम् इत्यादीन् सन्दर्भान् प्रस्तूय तदनुगुणं वाक्यसंरचनानां अभ्यासः कारयितुं शक्यते।

विदेशेषु आंग्लभाषाशिक्षणार्थं विविधोपागमाः क्रमशः विकसिताः। अमेरिकादेशे भाषाविज्ञानिनः संरचनात्मकोपागमस्य प्रकल्पनं कृतवन्तः। ब्रिटेनदेशे प्रयोगात्मकभाषाविज्ञानिनः मौखिकोपागमं प्रकल्पितवन्तः। हैराल्ड पामर तथा ए.एस.हार्नबी महोदयौ ततोऽपि तार्किकरूपमादाय सान्दर्भिकं उपागमं प्रकल्पितवन्तौ। कालान्तरे त्रयाणामापि मिश्रणेन संरचनात्मक–मौखिक– सान्दर्भिकोपागमः (Structual-Oral-Situational Approach or S-O-S Approach) आंग्लभाषाशिक्षणे १६४० तमे दशके प्रारब्धः। सार्थकसन्दर्भेषु सावधानेन चितानां स्तरितव्याकरणसंरचनानां मौखिकरूपेण सुव्यवस्थिताभ्यासः अस्योपागमस्य लक्ष्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४. सम्प्रेषणात्मकः उपागमः :-

भाषाभिव्यक्तौ संप्रेषणं प्रधानमङ्गम्। सम्प्रेषणम् द्वयोर्मध्ये सम्भाषणेन भवति। एकः वक्ता अपरश्च श्रोता। विपरिणम्य श्रोता वक्ता भवति वक्ता च श्रोता। एवं रूपेण संप्रेषणम् उभयगामी प्रक्रिया भवति। केवलम् एकांगिभाषणेन एकांगिश्रवणेन वा परस्परं सम्भाषणं सम्प्रेषणं वा न भवति। समाजेऽपि परस्परं विचार–विनिमयार्थमेव भाषा व्यवह्रियते। अतः भाषाशिक्षणेऽपि सम्प्रेषणोपागमस्य आश्रयणं मनोवैज्ञानिकं भवति। पूर्वं तु शिक्षककेन्द्रित–शिक्षणं, विषयकेन्द्रितं, शिक्षणं वा भवति स्म। शिक्षाशास्त्रिणां, भाषाविज्ञानिनां, मनोविज्ञानिनां च सतत्प्रयोगैः सम्प्रति अधिगन्तृ– केन्द्रित–शिक्षण (Learner Centered Education) अथवा बालकेन्द्रितशिक्षणं छात्रकेन्द्रितशिक्षणं वा प्राधान्यं जातम्। एवं हि शिक्षकछात्रयोर्मध्ये परस्परं उभयगामि–संभाषण–माध्यमेन शिक्षणं श्रेयस्करं भवति। अयमुपागमः भाषायाः रूपाधारितपक्षापेक्षया अर्थाधारितपक्षस्य प्राधान्यं कल्पयति।

सम्प्रेषणात्मकोपागमे अवधेयांशाः :-

सम्प्रेणात्मकोपागमस्य लक्ष्यमस्ति छात्राणां सम्प्रेषणकौशलस्य वर्धनं तदर्थम् अवधेयांशाः अधोनिर्दिष्टाः :–

– अर्थाधारेण पाठानां चयनं स्तरांकनं च भवेत्।
– विभिन्नसन्दर्भेषु विभिन्नकार्याणाम् अभिव्यक्त्यर्थं पर्याप्तावकाशाः स्युः।
– सूपयुक्तानां वाक्यानां प्रयोगः करणीयः।
– विभिन्नक्रियाणाम् आयोजनं करणीयम्–यथा अुनभवकथनं, प्रहेलिका, हास्योक्तिः इत्यादयः।
– छात्रः प्रधानः, शिक्षकस्तु केवलं सहायकः भवेत्।
– भाषायाः सैद्धान्तिपक्षापेक्षया प्रायोगिकपक्षस्य प्राधान्यम्।
– सम्प्रेषणपाठ्यक्रमः वास्तविकजीवनसम्बद्धः स्यात्। येन छात्राः ज्ञातांशानां प्रयोगं समाजेऽपि कर्तुं शक्नुयुः।
– भाषायाः शुद्धरूपेण प्रवाहेण च प्रयोगाय सम्प्रेषणात्मकाभ्यासः देयः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्प्रेषणात्मकोपागमे विधयः :-

सम्प्रेषणात्मक–भाषाशिक्षणे सूचनापूर्णाभ्यासाः प्रयुज्यन्ते। सूचनारिक्तसन्दर्भेषु सूचनापूर्तिरेव अत्र प्रमुखं कार्यम्। यदा कस्मिन्श्चित् सन्दर्भे एकः जनः यां सूचनां जानाति, अपरः जनः च न जानाति, तदा सूचनारिक्तता (Information gap) भवति। अतः सूचनारिक्त–सन्दर्भाणां सूचनादानेन पूर्तिः अभ्यासरूपेण भवेत्। तदर्थं केचन प्रमुखाः विधयः अधोनिर्दिष्टाः :–

१. संरचनात्मकाभ्यासः

२. भाषाक्रीड़ाः

३. समस्यासमाधानकार्याणि

४. पात्राभिनयः

५. विशकलितसूचनानां सङ्ग्रथनम्

६. समूहकार्यं युगलकार्यं वा

यथा अन्यभाषाणां शिक्षणे सम्प्रेषणात्मकोपागमः प्रभावपूर्णः दृश्यते, तद्वत् संस्कृतशिक्षणेऽपि अनेन उपागमेन संस्कृतशिक्षणं प्रभावपूर्णं भवति। मातृभाषाणां प्रयोगः मध्ये–मध्ये निर्देशार्थं भवेत्। अध्यापकः संस्कृतमयं वातावरणं निर्माय सम्प्रेषणे सौकर्यं कल्पयित्वा सहायकः भवेत्। विविधगतिविधिभिः अभ्यासैश्च छात्रेभ्यः सम्प्रेषणाय पर्याप्तावकाशः देयः। एवं कृते सति अवश्यमेव संस्कृत–शिक्षणं फलदायकं भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिक्षणकौशलानां विकासः

भाषाशिक्षणे चतुर्विध कौशलानां विकासः उद्दिष्टः :–

१. श्रवणकौशलम्

२. भाषणकौशलम्

३. पठनकौशलम्

४. लेखनकौशलम्

एतेषां कौशलानां पुनः मौखिकलिखितेति, ग्रहणात्मकाभिव्यक्त्यात्मकेति वर्गीकरणं संभवति–

	ग्रहणात्मकम्	अभिव्यक्त्यात्मकम्
मौखिक	श्रवणम्	भाषणम्
लिखितम्	पठनम्	लेखनम्

भाषाशिक्षणे प्रथमं मौखिककौशलानां विकासः अपेक्षितः। ततः परं लिखित– कौशलयोः ग्रहणात्मकस्य शिक्षणानन्तरं लिखिताभिव्यक्तेः विकासः सम्पादनीयः। एवं हि श्रवणभाषणपठनलेखनेति मनोवैज्ञानिकक्रमेणैव भाषाशिक्षणेन गुणात्मकपरिणामः प्राप्तुं शक्यते। संस्कृतभाषाशिक्षणेऽपि अयमेवे क्रमः अनुसरणीयः।

१. श्रवणकौशलम्

कर्णाभ्यां ध्वनिग्रहणक्रिया एव श्रवणं श्रुतानाम् अंशानां बोधस्य चेष्टा अनुसरति। अतः श्रवणकौशलं नाम यत्र श्रोता सक्रियो भूत्वा भाषितांशान् श्रृणोति अथ च तेषाम् अर्थबोधस्य प्रयत्नं करोति। श्रवणकौशले–श्रोतुः तत्परता, रुचिः, अवधानं च आवश्यकं भवति। वक्तुः उच्चारणस्य प्रभावः श्रोतरि भवति। अतः श्रवणं निष्क्रियं सोद्देश्यं च कौशलमस्ति। भावग्रहणस्य मुख्याधारः श्रवणम्। अतएव भाषाशिक्षणे श्रवणकौशलस्य प्रमुखं स्थानम् अस्ति।

श्रवणकौशले द्वयोः शक्त्योः समावेशः भवति –

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१. **धारणशक्तिः :-**

ध्वनीनां शब्दानां च मध्ये पौर्वापरतारतम्यस्य स्मरणमेव धारणशक्तिः। संस्कृते विभिन्नां सदृशप्रतीयमानानां ध्वनीनां सम्यक्रूपेण अभिज्ञानाय श्रवणकौशलस्य विकासः अपेक्षितः। यथा ऱ्स्व–दीर्घस्वरयोर्मध्ये भेदः, अल्पप्राण–महाप्राणवर्णयोर्मध्ये भेदः, नासिक्यवर्णानाम् उच्चारणम्, ऊष्मवर्णानाम् उच्चारणं, संयुक्तवर्णानाम् उच्चारणम्, अनुस्वारविसर्गयोः उच्चारणम् इत्यादीनां सम्यक्श्रवणाभ्यासेनैव एतेषां शुद्धोच्चारणं संभवति। श्रोता श्रुतान् शब्दान् मनसि धारयति, अथ च सन्दर्भानुगुणं तान् व्यवहरति।

२. **बोधशक्तिः :-**

ध्वनियोगेन निर्मितानां शब्दानां अर्थग्रहणमेव बोधशक्तिः। यथा–क् अ म् अ ल् अ म् = कमलम् = एकं पुष्पम्

बोधशक्तिः द्विप्रकारिकाः :-

(क) स्वतंत्ररूपेण शब्दानाम् अर्थान् ज्ञात्वा वाक्ये तेषां समाहारात्मकबोधः

(ख) वाक्यसंरचनायां शब्दानां वाक्यांशानां च बोधः

संस्कृतभाषा मातृभाषा अथवा व्यवहारभाषा नास्ति। अतः संप्रेषणाधारेण अस्याः शिक्षणमेव प्रभावपूर्ण भवति। तदर्थम् आदौ छात्राणां श्रवणकौशलस्य अभ्यासः अपेक्षितः। स च अभ्यासः कक्षायाम् अध्यापकस्य संस्कृतसंभाषणेनैव भवति। संस्कृतभाषायां पर्याप्ताः ध्वनयः सन्ति। तासां च प्रतीकरूपेण स्वतन्त्राः वर्णाः अपि सन्ति। तेषां वर्णानामुच्चारणे भ्रमः न भवति। यथा–

(क)मलम्

म(क)रः

चर(क):

एतेषु उदाहरणेषु दृश्यते यत् आदौ, मध्ये, अन्ते वा भवतु "क" वर्णस्य ध्वनिः समाना एव। वक्ता यां ध्वनिं वदति, तामेव श्रोता श्रृणोति, पठति, लिखति वा। अतः "संस्कृतभाषायां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्णविषयकः भ्रमः न भवति'' इति महत्त्वपूर्ण वैशिष्ट्यम् परं च अध्यापकाः छात्राः सर्वेऽपि स्व–स्व मातृभाषासु उपलभ्यमान–ध्वनिव्यवस्थया (ध्वनि वितरणेन) उच्चारणभेदैः च सम्यक्रूपेण अभ्यस्ताः भवन्ति। न केऽपि द्वे भाषे समाने अतः द्वयोः भाषयोः प्राप्ताप्राप्तध्वनितत्त्वैः (ध्वनिवितरणेन) उच्चारणभेदैश्च अध्यापकाः छात्राः सर्वेऽपि प्रभाविताः। प्रायः भारतीयभाषाणां ध्वनिव्यवस्था संस्कृतसमाऽस्ति। कुत्रचिदेव प्रान्तभेदेन प्रान्तीयभाषाभेदेन वा अल्पमात्रभेदः दृश्यते। यदि कुशलः अध्यापकः स्वयं संस्कृतस्य शुद्धोच्चारणं सम्यक् अभ्यस्य कक्षायां श्रावयति तर्हि अवश्यमेव छात्राणां शुद्धश्रवणकौशलस्य विकासः संभवेत्। शुद्धश्रवणसंस्कारेण परिपूर्णाः श्रवणकौशलेन विकसिताश्च छात्राः स्वयमपि शुद्धोच्चारणे शुद्धसम्भाषणे समर्थाः भवेयुः

श्रवणकौशलस्य विकासे आधाराः :-

मातृभाषाध्वनिभिः शब्दैश्च सम्यक् अभ्यस्ताः छात्राः संस्कृतभाषाशिक्षणे काठिन्यं अनुभवन्ति। अतः अभ्यस्तभाषाभिन्नभाषायाः शिक्षणावसरे छात्राणां श्रवणकौशलस्य विकासाय सचेष्टा प्रक्रिया अनुसरणीया। श्रवणकौशलभाषणकौशलयोः अन्योन्याश्रितः सम्बन्धः दृश्यते। यावत् सम्यक् श्रवणकौशलस्य विकासः न भवति, तावत् भाषणकौशलस्य विकासोऽपि न संभवति। श्रवणकौशलप्रक्रियायाः द्वे प्रमुखे अंगे स्तः :–

१. सामान्यश्रवणम् :-

सामान्यरूपेण स्वाभाविकरूपेण च भाषा–विषयक–श्रवणमेव अत्र गृह्यते। अस्य अधोनिर्दिष्टप्रकाराः सन्ति :–

क. पर्याप्तश्रवणम्
ख. शान्तचित्तश्रवणम्
ग. एकाग्रश्रवणम्
घ. अनौपचारिकश्रवणम्
ङ बाधाहीनश्रवणम्

कक्षायां बहिः च अध्यापकः संस्कृतमयवातावरणस्य निर्माणेन सामान्यश्रवणकौशलस्य विकासं कर्तुं प्रभवति। यावत् अन्यभाषा ध्वनयः श्रवणे बाधकाः भवन्ति तावत् संस्कृतभाषायाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभ्यासः न भवति। परं क्रमशः अभ्यासेन सा स्थितिः आगच्छति यत्र छात्राणां श्रवणेन्द्रियाणि बाह्यकोलाहलं प्रति अन्य भाषाध्वनीः प्रति वा बधिराणि भवन्ति। एतदर्थम् अध्यापकः संस्कृतभाषायाः श्रवणस्य पर्याप्तावसरान् विविधक्रियाकलापैः कल्पयेत्।

२. **चयनात्मकश्रवणम् :-**

भाषायाः निश्चितध्वनीनां शब्दानां वा चयनं कृत्वा, तेषां श्रवणाभ्यासः अत्र अभीष्टः। अस्य प्रकाराः अधोनिर्दिष्टाः :–

क. समस्यामूलक–ध्वनीनां श्रवणम्

ख. नूतनशब्दानां श्रवणम्

ग. संरचनानां श्रवणम्

घ. व्याकरणरूपाणां श्रवणम्

ङ सन्दर्भवाक्यानां श्रवणम्

अध्यापकः स्वकीयसंभाषणेन विभिन्न–ध्वनि–यन्त्राणां सहयोगेन च छात्राणां श्रवणकौशलस्य विकासं सम्पादयितुम् अर्हति।

२. भाषणकौशलम्

भाष्यते इति भाषा। भाषा एव भावाभिव्यक्तौ प्रभावपूर्ण माध्यमम् अस्ति। अतः भाषायाः भाषितरूपस्य प्राधान्यम् अस्ति। स्वभावतः शिशवः प्रारम्भिक–अवस्थायां भाषायाः मौखिकरूपं श्रुत्वा तस्यैव अनुकरणेन स्वयमपि मौखिकाभिव्यक्तौ समर्थाः भवन्ति। अतः भाषाशिक्षणेऽपि अयमेव क्रमः अनुसरणीयः। भाषणकौशलस्य पर्याप्तविकासानन्तरमेव छात्राः संस्कृतभाषाव्यवहारे कुशलाः भविष्यन्ति। संस्कृतभाषायाः व्यवहाराभावात् अस्याः श्रवणसंस्कारः न भवति, श्रवणसंस्काराभावात् भाषणस्य अभ्यासः न भवति, परिणामतः पुनः संस्कृतभाषायाः व्यवहारः न भवति। एवं रीत्या संस्कृतं ग्रान्थिकभाषेति, केवलमस्याः पठनलेखनकौशलयोः विकासः भवति। एवं गते काले, अद्य संस्कृतभाषावबोधे जनाः काठिन्यम् अनुभवन्ति। कालान्तरे, व्यवहाराभावात् एषा भाषा इतोऽपि कठिना प्रतीयते। अतः संस्कृतशिक्षणे संस्कृतभाषायाः भाषिकरूपस्य शिक्षणं महत्त्वपूर्णमस्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतभाषायाः भाषणकौशलस्य विकाससन्दर्भे त्रयः पक्षाः सन्ति–

१. उच्चारणशिक्षणम्

२. सम्भाषणाभ्यासः

३. भाषणदक्षता

१. उच्चारणशिक्षणम् :-

संस्कृतव्याकरणे संस्कृतभाषायाः यावत् सूक्ष्मं वैज्ञानिकं विश्लेषणं कृतम्, तत् विश्वस्य अन्यस्याः कस्याः अपि भाषायाः संन्दर्भे न दृश्यते। पाणिनिः उच्चारण प्रक्रियाम् इत्थं वर्णयति–

आत्मा बुध्या समेत्यर्थान्मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।६।।
मारुतस्तूरसिचरन्मन्द्रं जनयति स्वरम्
----------।।७।।
सोदीर्णो मूर्ध्न्यभिहितो वक्त्रमापद्य मारुतः
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः।।६।।
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः
----------।।१०।। (पाणिनीय शिक्षा)

एषा प्रक्रिया क्रमशः इत्थं वक्तुं शक्यते :–

– उच्चारणात् पूर्वं आत्मा बुद्ध्या शब्दार्थं जानाति।

– अर्थज्ञानात् परं वक्तुम् इच्छया मनः प्रेरयति।

– मनः कायाग्निं (नाभ्याः उपरि अवयवविशेषः) प्रेरयति।

– तेन आघातेन अग्निः वायुस चारं करोति।

– वायुः उरसि (हृदये) स चरन् ध्वनिम् उत्पादयति।

– ततः वायुः मूर्धाभागे आहतः विभिन्नमुखावयवान् प्रति गच्छति।

– मुखतः बहिरागमनसमये वर्णः उच्चरितः भवति।

विद्वांसः वर्णोच्चारणसन्दर्भे वाण्याः चत्वारि रूपाणि वर्णयन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क. परा :-

परा स्वयं बह्मस्वरूपा सैव सरस्वती। एषैव अन्यरूपाणां आधारभूता। एषैव मूलवाण्याः उद्‌गमस्रोतः बहिरप्रकाश्या।

ख. पश्यन्ती -

परावाण्याः ईषत् प्रकाशरूपा पश्यन्ती। एषाऽपि अत्यन्तसूक्ष्मरूपा। अत्रापि वर्णानां विभागः न दृश्यते। एषा परां मध्यमां च तटस्थभावेन पश्यन्ती तिष्ठति –

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी।।

ग. मध्यमा :-

एषा अन्तःसंचङ्कल्परूपा। पश्यन्ति वैखर्ययोः मध्ये स्थित्वा अनुपातक्रमेण प्राणवृत्तिम् अतिक्रामयति।

अन्तः संचङ्कल्परूपा या क्रमरूपानुपातनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रर्वतते।।

घ. वैखरी :-

एषा परावाण्याः प्रकटरूपा। अस्यामेव वर्णानां उच्चरितरूपं प्रकाशितं भवति।

स्थानेषु विवृते वायौ कृतवर्णापरिग्रहा।
वैखरीवाक् प्रयोक्तृणां प्राणवृत्तिर्निबन्धना।।

वर्णानां वर्गीकरणम् :-

महर्षिपाणिनिः संस्कृतवर्णानाम् उत्पत्तिं चर्तुदश–माहेश्वरसूत्रैः वर्णयति। तानि च सूत्राणि महेश्वरस्य ढक्कानादेन प्राप्तानि–

नृत्तावसाने नटराजराजः ननादढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१.	अइउण्	२.	ऋलृक्
३.	एओङ्	४.	ऐऔच्
५.	हयवरट्	६.	लण्
७.	ञमङणनम्	८.	झभञ्
९.	घढधष्	१०.	जबगडदश्
११.	खफछठथचटतव्	१२.	कपय्
१३.	शषसर्	१४.	हल्

पाणिनीयशिक्षायां ६४ वर्णानाम् उल्लेखः दृश्यते-

त्रिषष्ठिश्चतुषष्ठिर्वा वर्णाः शम्भुमते मताः।
संस्कृते प्राकृते चापि स्वयं प्रोक्ताः स्वयम्भुवा।।
स्वराः विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृतह्यष्टौ चत्वारश्च यथा स्मृताः।।
अनुस्वारो विसर्गश्चकपौ चापि पराश्रितौ।
दुःस्पृष्टचेकितविज्ञेयो लृकार प्लुत एव च ।।

(क) **स्वरवर्णाः :-**

अ, आ, आ ३, इ, ई, ई ३, उ, ऊ, ऊ ३, ऋ, ॠ, ऋ ३, लृ, ए, ए ३, ओ, ओ ३, ऐ, ऐ ३, औ, औ ३ (२१)

(ख) **व्यञ्जनवर्णाः :-**

स्पर्शवर्णाः :-

क् ख् ग् घ् ङ्, च् छ् ज् झ् ञ्, ट् ठ् ड् ढ् ण्, त्, थ्, द् ध् न्, प् फ् ब् भ् म्, (२५)

अन्तस्थाः – य् र् ल् व् (४)

ऊष्माणः – श् ष् स् ह् (४)

यमाः – कुं खुं गुं घुं (४)

अनुस्वारः – (.)

विसर्गः – (:)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जिह्वामूलीयौः – (क, ख)

उपध्मानीयौः – (प, फ)

द्विस्पृष्टः – लृ

योगः – ६३ + लृ = ६४

वर्णानां भेदा :-

१. **स्वरभेदाः :-**

उच्चारणदृष्ट्या स्वराणाम् उच्चता–निम्नता–आधारेण एते त्रिधा विभक्ताः

क. उदात्तः – उच्चैरुदात्तः

ख. अनुदात्तः – नीचैरनुदात्तः

ग. स्वरितः – समाहारः स्वरित

२. **कालभेदाः-**

स्वराणां उच्चारणकालानुगुणम् एते त्रिधा विभक्ताः

क. ह्रस्वः – एकमात्राकालः

ख. दीर्घः – द्विमात्राकालः

ग. प्लुतः – त्रिमात्राकालः

३. **उच्चारणस्थानभेदाः :-**

वर्णानाम् उच्चारणस्थानदृष्ट्या इमे भेदाः सन्ति –

१. कण्ठः २. तालुः ३. मूर्धा ४. दन्ताः

५. ओष्ठौ ६. नासिका ७. कण्ठतालुः ८. कण्ठोष्ठौ

९. दन्तोष्ठौ १०. जिह्वामूलं

४. **आभ्यन्तरप्रयत्नदृष्ट्या भेदाः :-**

वर्णानाम् उच्चारणावसरे आभ्यन्तरप्रयत्नदृष्ट्या इमे भेदाः सन्ति –

१. स्पृष्टम् २. ईषत्स्पृष्टम् ३. ईषद्विवृतम्

४. विवृतम् ५. संवृतम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५. बाह्यप्रयत्नदृष्ट्या भेदाः :-

वर्णानाम् उच्चारणावसरे बाह्यप्रयत्नदृष्ट्या इमे भेदाः सन्ति :–

१. विवारः २. संवारः ३. श्वासः ४. नादः

५. घोषः ६. अघोषः ७. अल्पप्राणः ८. महाप्राणः

उच्चारणस्य महत्त्वम् :-

वैदिकशिक्षायां शुद्धोच्चारणस्य महत्त्वम् अंगीकृतम्। शुद्धोच्चारणेन कल्याणप्राप्तेः ब्रह्मप्राप्तेश्च विधानं वर्णितमस्ति–**'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामदुग् भवति।'** अशुद्धोच्चारणेन हानिरपि भवति, तद्यथा–

मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

अत्र सत्यङ्केतितमस्ति यत् आभिचारिकयज्ञे इन्द्रस्य अशुभं भूयात् इति कामनया 'इन्द्रशत्रुर्विवर्धस्व' इत्युच्चारणैः आहूतयः दत्ताः। इन्द्रशत्रुः इति समस्तपदे उच्चारणभेदेन षष्ठीतत्पुरुषः बहुव्रीहिर्वा भवति। परं पुरोहितानाम्ः अशुद्धोच्चारणेन बहुव्रीहिः गृहीतः अथ च इन्द्रस्य वृद्धिर्जाता। सः वृत्रासुरं पराजितवान्।

तैत्तरीयोपनिषदि शिक्षावल्ल्यां उच्चारणस्य षडंगाः प्रोक्ताः :–

१. वर्णः (अक्षरज्ञानं, वर्णमालाज्ञानं)

२. स्वरः (उदात्तानुदात्तस्वरितः)

३. मात्रा (ह्रस्वदीर्घप्लुताः)

४. बलम् (आभ्यन्तरबाह्यप्रयत्नाः)

५. साम (दोषरहितं, माधुर्यपूर्णं, साम्ययुक्तं, स्पष्टं सुस्वरोच्चारणम्)

६. सन्तानम् (पदानां अतिशयसन्निधिः, शीघ्रता)

वैदिकमन्त्राणाम् उच्चारणविषये अनेके शिक्षाग्रन्थाः प्रणीताः :–

१. भारद्वाजशिक्षा २. पाणिनीयशिक्षा ३. याज्ञवल्क्यशिक्षा

४. सिष्ठीशिक्षा ५. पाराशरीशिक्षा ६. माण्डव्यशिक्षा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७. केशवीशिक्षा ८. वर्णरत्नप्रदीपिका ९. माध्यन्दिनीशिक्षा

१०. षोडशश्लोकी शिक्षा ११. प्रातिशाख्यप्रदीपशिक्षा

अशुद्धोच्चारणस्य कारणानि :-

१. **अज्ञानम् :-** वर्णानां स्थानप्रयत्नादिविषये ज्ञानाभावः।

२. **शारीरिकदोषः :-** येषां ओष्ठदन्तताल्वादिषु अवयवेषु दोषाः सन्ति ते शुद्धोच्चारणं कर्तुं न शक्नुवन्ति–

न कराली न लम्बोष्ठः नाव्यक्तो नानुनासिकः।
गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति।।

३. **मनोवैज्ञानिकं कारणम् :-**

यस्मिन् परिवारे अशान्तिः, कलहः, क्रोधः, भयं, आशंका इत्यादयः दृश्यन्ते तस्य परिवारस्य बालकाः उच्चारणे संकोचमनुभवन्ति। अतः बहुधा अशुद्धोच्चारणं कुर्वन्ति।

४. **प्रादेशिकभाषाप्रभावः :-**

भारतस्य भिन्न–भिन्नप्रदेशेषु भिन्नाः प्रान्तीयभाषाः भाष्यन्ते। तासां प्रभावेण संस्कृतस्य उच्चारणमपि अशुद्धं भवति। यथा उत्तरप्रदेशे 'श' इत्यस्य 'स', 'य' इत्यस्य 'ज' इति, बिहारे 'व' इत्यस्य 'ब' इति 'ड़' इत्यस्य 'र' इति, राजस्थाने 'ज्ञ' इत्यस्य 'ध' इति, 'अहं' इत्यस्य 'एहं' इति, दक्षिणभारते 'कृष्णः' इत्यस्य 'क्रुष्णः' इति, महाप्राणानां स्थाने अल्पप्राणाः, बंगालप्रान्ते अन्तिमम् अकारम् ओकारम् इति, 'शिक्षा' इत्यस्य सिक्खा इति, पंजाबप्रान्ते 'धूर्त' इत्यस्य 'दूर्त' इति, 'शब्द' इत्यस्य 'शबद' इति, एवं रीत्या भिन्न–भिन्नप्रान्तप्रभावेण अशुद्धयः भवन्ति।

५. **शिक्षापद्धत्याः प्रभावः :-**

वर्तमानशिक्षापद्धतौ मौखिककार्यस्य महत्त्वं नास्ति। अतः शुद्धोच्चारणस्य अभ्यासाय अवकाशः न लभ्यते। बहुधा अध्यापकाः स्वयमपि अशुद्धोच्चारणं कुर्वन्ति। तेषां संशोधनस्यापि व्यवस्था नास्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१. **शुद्धोच्चारणाभ्यासः :-**

अशुद्धोच्चारणस्य कारणानि ज्ञात्वा सम्यक् शिक्षणेन अभ्यासेन च शुद्धोच्चारणं सम्भवति। वर्णोच्चारणविषये पाणिनीयशिक्षायामुक्तम्–

व्याघ्री यथा हरेत्पुत्रान् द्रंष्ट्राभ्यां न च पीडयेत्।

भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।। पाणिनीयशिक्षा

वर्णोच्चारणसंदर्भे कियदवधानमपेक्षितमित्यनेन श्लोकेन ज्ञायते। एवमेवाशुद्ध उच्चारणस्य दश लक्षणानि उक्तानि :–

उपांशुदष्टं त्वरितं निरस्ताम्बिलम्बितङ्गदितं प्रगीतम्।

निपीडितं ग्रस्तपदाक्षरञ्च वदेन्न दीनं न तु सानुनास्यम्।

(पाणिनीय शिक्षा) पाणिनीयशिक्षायां कीदृशाः जनाः शुद्धोच्चारे समर्थाः इत्यपि उक्तम्–

प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभना।

प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति।।

२. **संभाषणाभ्यासः :-**

भाषणकौशले वर्णानां शुद्धोच्चारणस्य ज्ञानं तु अपेक्षितमेव परं केवलं वर्णैः संभाषणं न भवति। संभाषणे तु शब्दानां वाक्यानां च प्रयोगः भवति। अतः द्विधा संभाषणस्य अभ्यासः संभवति–

क. **व्याकरणाधारितसंरचना :-**

विभिन्नालङ्काराणां, विभक्तीनां, प्रत्ययादीनामाधारेण वाक्यसंरचनामाध्यमेनाभ्यासेन छात्राः अनायासेन व्याकरणानुगुणं शुद्धवाक्यप्रयोगे सफलाः भवन्ति।

ख. **सान्दर्भिकसंरचना :-**

विविधजीवनसन्दर्भाणाम् आधारेण वाक्यसंरचनानाम् अभ्यासेन छात्राः स्वतः सन्दर्भानुगुणं सार्थकवाक्यप्रयोगे सफलाः भवन्ति। विविधसंवादानां शिक्षणेन परस्परं वार्तालापस्य अभ्यासेन च एतद् कार्यं संभवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **भाषणदक्षता :-**

तृतीयस्तरे मौखिकाभिव्यक्तेः स्वतन्त्रप्रयोगः भवति। यदा छात्राः सामान्य–संभाषणे सरलसंस्कृतवाक्यानां प्रयोगे समर्थाः भवन्ति, सन्दर्भानुगुणं उचितशब्दावल्याः प्रयोगे समर्थाः भवन्ति, तदा ते क्रमशः संस्कृते एव चिन्तनमारभन्ते। संस्कृते चिन्तनेन स्वतंत्ररूपेण संस्कृताभिव्यक्तिः संभवति तदा ते प्रसङ्गानुकूलं यं कमपि प्रदत्तं विषयम् अवलम्ब्य स्वतंत्ररूपेण विश्वस्तरूपेण च भाषणे दक्षाः भविष्यन्ति।

अतः संस्कृतशिक्षणे भाषणकौशलस्य महत्त्वं मत्वा शिक्षकैः छात्राणां संस्कृतमाध्यमेन भाषणकौशलस्य विकासाय सर्वविधप्रयासाः विधेयाः। संस्कृतभाषायाः व्यवहाराभावात् तयाः भाषणाभ्यासस्य सदवकाशः विद्यालयेषु एव भवति, तत्र च सहायकः संस्कृतशिक्षक एव, अतः सः स्वयं संस्कृतसंभाषणे समर्थः भूत्वा छात्रान् अपि तथाविध–समर्थान् कारयेत्।

३. पठनकौशलम्

आधुनिके वैज्ञानिकस्पर्धात्मकयुगे शीघ्रतया विषयबोधस्यकृते पठनकौशलं महत्त्वपूर्णं भवति। ध्वनिसामञ्जस्येन लिपिसंकेतानां वर्णानामुच्चारणपूर्वकं, शब्दानां वाक्यानां च क्रमशः अर्थबोधसहितग्रहणप्रक्रिया एव पठन अथवा वाचन इत्यभिधीयते। वाचनं ग्रहणात्मकं कौशलमस्ति। भाषायाः लिखितरूपं पुस्तकं वा दृष्ट्वा अर्थबोधसहितं वाचनं क्रियते।

वाचनं सोद्देश्या प्रक्रिया, यत्र अधोनिर्दिष्टक्रमः दृश्यते–

१. ध्वनिप्रतीकानां–कल्पना।

२. शब्दानां चाक्षुषग्रहणम्।

३. लिखितवाक्येषु शब्दानां कालविस्तारः।

४. शब्दानां अर्थग्रहणम्।

५. वाक्यार्थस्य समाहारात्मकः बोधः।

वाचनकाले त्रिप्रकारेण अर्थग्रहणं भवति। कोशीयः– अर्थः, व्याकरणिकः अर्थः, सांस्कृतिकः अर्थः। वाचनकाले प्रारम्भिकस्तरे लिपिसंकेतान् शब्दान् उपसर्ग–प्रत्यय विभक्तिचिह्नानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्धविराम–पूर्णविरामादिचिह्नानि दृष्ट्वा अर्थबोधसहित–वाचने गतिः मन्दा भवति, परं क्रमशः अभ्यासेन वाचनगतिः तीव्रा अर्थबोधः स्पष्टतरश्च भवति।

वाचनस्य प्रकाराः :-

वाचनम्

- **मुखरता**
  - सस्वरवाचनम्
  - मौनवाचनम्
- **भावग्रहणीयता**
  - गहनवाचनम्
  - विस्तृतवाचनम्
- **वाचनगतिः**
  - १. मन्दवाचनम्
  - २. सामान्यवाचनम्
  - ३. द्रुतवाचनम्

१. आदर्शवाचनम्

२. अनुकरणवाचनम्

सस्वरवाचनम् :-

कक्षाशिक्षणे सस्वरवाचनस्य प्राधान्यमस्ति। अस्य उद्देश्यानि अधोनिर्दिष्टानि–

- शब्दानां शुद्धोच्चारणकौशलसम्पादनम्।
- सस्वरवाचनेरुच्युत्पादनम्।
- अर्थबोधसहितवाचनकौशलसम्पादनम्।
- भावानुगुणं आरोह–अवरोहस्वरेण विरामचिह्नादीनाम् अनुगुणं गद्यांशस्य वाचनकौशलसम्पादनम्।
- गति–यति–लयानुगुणं काव्यांशानां सस्वरपाठकौशलसम्पादनम्।
- श्रोत्रानुगुणं कण्ठस्वरस्य नियन्त्रणसामर्थ्यसम्पादनम्।
- उच्चारणगतौ विकासः।
- संस्कृतसाहित्ये रुच्युत्पादनम्।

सस्वरवाचनस्य आदर्शवाचनरूपं सामान्यतः अध्यापकः प्रस्तौति। अध्यापकः कक्षोचितस्वरेण समुचितबलाघातेन भावानुगुणं आरोह–अवरोहस्वरेण विरामादि चिह्नानि अनुपालयन् समुचितप्रवाहेण प्रभावपूर्णम् आदर्शवाचनं प्रस्तौति।

आदर्शवाचनानुगुणम् अध्यापकेन निर्दिष्टाः छात्राः अनुकरणवाचनं कुर्वन्ति यावत् स्पष्टं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रभावपूर्ण च आदर्शवाचनं भवति तावदेव अनुकरणवाचनमपि। प्रायः अनुकरणवाचनम् एकैकछात्रेण क्रियते, कदाचित् सामूहिकरूपेणापि कारयितुं शक्यते। अनुकरणवाचनकाले छात्रैः अशुद्धरूपेण उच्चारितान् शब्दान् अध्यापकः अवश्यमेव स्पष्टरूपेण श्यामपट्टोपरि उल्लिख्य संशोधयेत्।

सस्वरवाचनशिक्षणस्य विभिन्नाः विधयः सन्ति, तद्यथा–

१. वर्णमालाविधिः २. दृष्ट्वाकथनविधिः

३. ध्वनिसाम्यविधिः ४. श्रुतकथनविधिः

५. सामूहिकवाचनविधिः ६. भाषाशिक्षणयन्त्रविधिः

वाचनमेका कला अस्ति। याज्ञवल्क्यशिक्षायां वाचनस्य चतुर्दशदोषाः प्रतिपादिता –

शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकम्।
काकस्वरं मूर्ध्नि गतं तथा स्थानविवर्जितम्।।
विस्वरं विसं चैव विश्लिष्टं विषमाहतम्।
व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश।

पाणिनीयशिक्षायामपि अधमपाठकानां विषये उक्तमस्ति–

गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।

अन्यत्र पाठकस्य गुणाः अपि वर्णिताः–

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरम्।
अधैर्यं लय समर्थं च षडेते पाठका गुणाः।।

–पाणिनीय शिक्षा

मधुरं चापि नाव्यक्तं सुव्यक्तं न च पीडितम्।
सनाथस्यैव देशस्य न वर्णाः सङ्करं गताः।।
यथा सुमत्तनागेन्द्रः पदात् पदं निधापयेत्।
एवं पदं पदाद्यन्तं दर्शनीयम् पृथक्पृथक्।।

–याज्ञवल्क्यशिक्षा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मौनवाचनम्:-

एकाग्रचित्तेन विषयवस्तुनः अर्थग्रहणपूर्वकं विना स्वरं वाचनमेव मौनवाचनम्। सस्वरवाचने स्वरयन्त्रस्य उपयोगात् अधिकः श्रमः भवति। अतः दीर्घकालं यावत् सस्वरवाचने काठिन्यमपि भवति। पुनश्च अन्येषां श्रावणार्थं सस्वरवाचनं युज्यते परं सर्वदा तथैव पठनेन अन्येषां बाधकमपि भवति। अतः श्रान्तिं निवारयितुं बाधां निवारयितुं च मौनवाचनम् उत्तमं भवति। मौनवाचनेन शीघ्रतया अर्थबोधो भवति। अल्पेन कालेन अनायासेन विस्तृतं विषयवस्तु अध्येतुं शक्यते।

मौनवाचनस्य उद्देश्यानि :-

- छात्रेषु स्वाध्याय–प्रवृत्तेः विकासः।
- वाचनगतेः वर्धनम्।
- अर्थग्रहणक्षमतायाः विकासः।
- मुख्यतथ्यानां चयनं कृत्वा तेषां स्मरणम्।
- अवकाशसमयस्य सुदपयोगः।
- संस्कृतसाहित्यस्य विस्तृताध्ययने रुच्युत्पादनम्।

मौनवाचने अवधेयाः अंशाः :-

- सस्वरवाचनस्य समुचिताध्ययनानन्तरमेव मौनवाचनं कारणीयं, यतोहि मौनवाचने छात्राणां दोषाः ज्ञातुं न शक्यन्ते।
- मौनवाचनकाले वातावरणं पूर्णतया शान्तं भवेत्। छात्राश्च एकाग्रचित्ताः भवेयुः।
- मौनवाचनात् पूर्वमेव सर्वेऽपि अपेक्षिताः निर्देशाः स्पष्टतया देयाः।
- मौनवाचनं प्रारम्भिककक्षासु नोपयुज्यते। काव्य पाठेऽपि प्रायः अनेन रसास्वादनं न भवति।
- मौनवाचनकाले शिक्षकः कक्षायां निरीक्षणं कुर्यात्।
- मौनवाचनान्तरम् अर्थबोधस्य परीक्षणं अपि भवेत्।

मौनवाचनेन भावग्रहणाधारेण संस्कृतसाहित्यस्य गहनाध्ययनं कर्तुं शक्यते। अपि च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कथापुस्तकानां पत्र–पत्रिकाणां द्रुतगत्या विस्तृताध्ययनम् अपिकर्तुं शक्यते। मौनवाचने निपुणता, व्यक्तेः विचाराणां प्रौढ़ता द्योतयति। अनेन भाषायाम् अधिकारः भाषादक्षता वा सूच्यते।

वाचनशिक्षणस्य सोपानानिः-

१. वर्णमाला परिचयः शब्दानाम् अभिज्ञानं च।

२. श्रवणभाषणयोः अभ्यासेन ज्ञातांशानां सस्वरवाचनम्।

३. स्वतन्त्ररूपेण वाचनम् (अध्यापकनिर्देशं विना)

४. विविधसाहित्यांशानां विस्तृतवाचनम्।

५. पूर्णात्मविश्वासेन विविधपत्रपत्रिकाणाम् रुच्यनुगुणं पुस्तकानां च स्वतंत्ररूपेण वाचनं रसास्वादनम् च।

४. लेखनकौशलम्

भाषायाः ध्वनीनां मौखिकोच्चारितश्ब्दानां वाक्यानां वा लिपिसंकेतमाध्यमेन लिखिताभिव्यक्तिरेव लेखनम्। भाषायाः प्रमुखोद्देश्यम् अस्ति भावाभिव्यक्तिः। मौखिकाभिव्यक्तिः सीमिते काले सीमितजनानां मध्ये एव संभवति परं लिखिताभिव्यक्तेः क्षेत्रं सुविशालम्। भाषायाः लिखितं रूपं स्थिरं तिष्ठति सरलतया अन्येभ्यः उपलब्धः भवति। अतः भाषाशिक्षणेऽपि लेखनकौशलस्य महत्त्वं स्वीक्रियते।

यद्यपि भाषाभिव्यक्तौ मौखिकरूपस्य प्राधान्यं तथापि लिखितरूपस्य पठनेन पुनः लिखितरूपेण भावाभिव्यञ्जनेन च भाषाबोधस्य प्रमाणं दृष्टिगोचरं भवति। भाषायाः लिखितरूपस्य संशोधनं मूल्याङ्कनं च सरलं प्रामाणिकं च भवति।

पूर्व् पठनशिक्षणं वा लेखनशिक्षणं वा इत्यत्र मतभेदः अस्ति। प्रसिद्ध शिक्षादार्शनिकानां फ्रोबेल महोदयानां मतानुसारं – "बालकाः प्रथमं वाचने शिक्षिताः भवेयुः। यदा ते अक्षराणां प्रत्यभिज्ञाने समर्थाः भवन्ति तदा लेखनशिक्षणं प्रारब्धव्यम् इति।" अनेन लेखनं सार्थकप्रक्रिया भवति इति सूच्यते। परं च एतद् विपरीतं बालमनोविज्ञानवेत्री मार्या मान्टेसरी महोदया प्रथमं बालकेभ्यः लेखनशिक्षा देया इति अभिप्रैति। एवं हि लेखनकार्यं कुर्वन् यदा तस्य शारीरिकक्रियाणां नियन्त्रणं भवति तदैव सः लिखित– सामग्रयाः पठने उत्सुकः भवति। पूर्वपरिचितानां लिखिताक्षराणां वाचने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सः समर्थः भवतीति। कदाचित् रोमनलिप्यां पठने लेखने च विद्यमानं भेदं दृष्ट्वा एतादृशः मतभेदः दृश्यते यतोहि आंग्लभाषायां '**C**'(सी) इति लिख्यते परं **cat** इति शब्दे 'क' इति पठ्यते।

संस्कृतभाषायां श्रवणभाषणपठनलेखनदृष्ट्या साम्यं भवति यथा लिख्यते तथैव पठ्यते इति देवनागरीलिपिः सम्पूर्णेऽपि विश्वेऽस्मिन् अत्यन्तवैज्ञानिकी। अतः संस्कृतभाषायां पठनं लेखनं च युगपत् प्रारब्धुं शक्यते।

सुलेखस्य महत्त्वम् :-

लेखनमेका कला। अतः अस्यां नैपुण्यसम्पादने श्रद्धा अपेक्षिता परिश्रमश्च करणीयः। सुन्दरं सुवाच्यं लेखनं सर्वेषां मनांसि हरति। विद्यालयेषु कार्यालयेषु च लेखनकलायाः अत्यधिकं स्थानमस्ति। यद्यपि मुद्रणयन्त्राणां टङ्कणयन्त्राणां सङ्गणकानां च आविर्भावेन हस्तलेखनकार्यस्य न्यूनता जाता तथापि मौलिकरूपेण आवश्यकता तु अस्ति एव।

लेखनशिक्षणस्य उद्देश्यानि :-

- लेखनकौशलस्य विकासः लेखनगतेः विकासः
- विरामादिचिह्नानां प्रयोगज्ञानम्।
- संस्कृतध्वन्यनुगुणं वर्णभेदज्ञानम्।
- एकाग्रतायाः स्मरणशक्तेश्च विकासः।
- शुद्धोच्चारणे सहायताप्रदानम्।

असुन्दरलेखस्य कारणानिः-

अद्यत्वे छात्राः बहुधा सुन्दरलेखने समर्थाः न दृश्यन्ते, यतोहि–

- छात्राः प्रारम्भादेव मसिलेखन्याः उपयोगं कुर्वन्ति (फाउन्टेन पेन)।
- छात्राः लेखनीग्रहणरीतिं सम्यक् न जानन्ति।
- लेखनकाले कथम् उपवेष्टव्यं इति न जानन्ति, अतः तिर्यक् उपवेशनेन तिर्यक् लेखनमेव भवति।
- छात्राणां लेखनाभ्यासः न्यूनः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

- केचन् छात्राः शिरोरेखां विना विनोदरूपेण लिखन्ति परं देवनागरी लिप्याम् नेकमपि अक्षरा शिरोरेखां विना भवति।
- लिपिज्ञानाभावात् अक्षररचनायां दोषाः भवन्ति।
- अक्षराणाम् आकारः, ऋजुता, सामीप्यम् इत्येतेषु विषयेषु ध्यानं न भवति।

लेखनशिक्षणस्य विधयः :-

१. अनुलेखः :-

सुन्दरलेखनस्य अभ्यासाय प्रारम्भिकस्तरे अनुलेखः उत्तमं साधनमस्ति। श्यामपट्टे छात्राणां पुस्तिकासु वा बृहदाकारेण सुन्दराणि अक्षराणि लिख्यन्ते। छात्राः एतद् दृष्ट्वा तथैव बहुबारम् लिखन्ति। अनुलेखार्थं पृथक्रूपेण मुद्रितपुस्तिकाश्च उपलभ्यन्ते।

२. प्रतिलेखः :-

प्रतिलेखार्थं पृथक्पुस्तिकाः नोपलभ्यन्ते। छात्राः पाठ्यपुस्तकात् अन्यपुस्तकात् वा प्रतिदिनं कमपि अंशं दृष्ट्वा स्वलेखनपुस्तिकायां लिखन्ति। लेखनसमये विरामचिन्हादीनां प्रयोगे श्रद्धाप्रदर्शनीया। अक्षराणि समानाकाराणि स्युः। पदानां मध्ये दूरं समानं स्यात्। लेखनं ऋजुपङ्क्तौ स्यात्। अध्यापकः छात्राणां लेखनस्य संशोधनं कृत्वा वामभागे आवश्यकनिर्देशान् लिखति। एवं क्रमशः अभ्यासेन सुलेखस्य अभ्यासः भवति।

३. श्रुतलेखः :-

शब्दाः वाक्यानि वा श्रुत्वा लेखनमेव श्रुतलेखः। श्रुतलेखेनापि लेखनकौशलस्य सम्यक् अभ्यासः भवति। श्रुतलेखेन सुन्दरलेखनस्य शीघ्रलेखनस्य, शुद्धलेखनस्य च सम्यक् अभ्यासः भवति। अल्पे एव काले अधिकपरिमाणस्य विषयस्य लेखनाभ्यासः संभवति। श्रुतलेखने छात्राणां स्मरणशक्तिः वर्धते। श्रुतलेखस्य आरम्भात् पूर्वं अवधेयं यत् छात्राणां उपवेशनस्य व्यवस्था समीचीना स्यात्, लेखनीग्रहणरीतिश्च समीचीना स्यात्। अध्यापकस्य उच्चारणं शुद्धं स्पष्टं कक्षोचितस्वरेण समुचितवेगेन च भवेत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणे श्रुतलेखनस्य अत्यधिकं महत्त्वम् अस्ति। अतः सप्ताहे अवश्यम् एकान्तरं श्रुतलेखाय भवेत्।

श्रुतलेखस्य सोपानानि :-

१. **प्रस्तावना :-**

सर्वे आवश्यकनिर्देशाः देयाः

२. **प्रस्तुतीकरणम् :-**

क. छात्राणां विषयपरिचयार्थं अध्यापकेन अनुच्छेदस्य प्रथमवाचनम्।

ख. छात्राणां लेखनार्थं द्वितीयवाचनम्।

ग. छात्राणां श्रुतलेखस्य संशोधनाय अन्तिमवाचनम्।

३. **संशोधनम् :-**

अध्यापकेन अथवा परस्परं छात्रैः श्रुतलेखस्य संशोधनम्।

४. **श्यामपट्टकार्यम् :-**

श्रुतलेखे जातानां दोषाणां विवरणपूर्वकम् अध्यापकः शुद्धशब्दान् श्यामपट्टे लिखित्वा प्रदर्शयति।

५. **गृहकार्यम् :-**

छात्राः अशुद्धशब्दानां शुद्धं रूपं पंचवारं लिखेयुः।

रचनात्मकं लेखनम् :-

सामान्यलेखनकौशलस्य अभ्यासानन्तरं रचनात्मकलेखनस्य अभ्यासः कारयितुं शक्यते। रचनात्मकलेखनाभ्यासस्य अभ्यासाय अधोनिर्दिष्टप्रकाराः सन्ति–

१. **पुनर्लेखनाभ्यासः :-**

मौखिकरूपेण श्रुतायाः कथायाः वार्तायाः वा तथैव पुनर्लेखनाभ्यासः।

२. **पुनर्योजनाभ्यासः :-**

निर्देशानुसारं वाक्यसंरचनानां परिवर्तनं कृत्वा लेखनाभ्यासः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **वाक्यरचनाभ्यासः :-**

विविधसामग्रीणां सहयोगेन वाक्यरचनाभ्यासः

क. **सारणीमाध्यमेन :-**

छात्राः सारणीमाध्यमेन एकाधिकसार्थकवाक्यानां रचनां कुर्वन्ति।

ख. **सम्मेलनमाध्यमेन :-**

छात्राः द्वयोः भागयोः विशकलितरूपेण दत्तान् वाक्यखण्डान् सम्मेल्य वाक्यरचनां कुर्वन्ति।

ग. **उदाहरणमाध्यमेन :-**

प्रदत्त–उदाहरणपदानि प्रयुज्य वाक्यरचना।

घ. **चित्राधारेण :-**

चित्राणि दृष्ट्वा रिक्तस्थानानां पूर्तिः अथवा सम्पूर्णवाक्यरचना।

ङ **वाक्यविस्तारेण :-**

निर्देशानुगुणं लघुलघु वाक्यानां विस्तारस्य अभ्यासः।

४. **अशुद्धवाक्यानां संशोधनं कृत्वा लेखनाभ्यासः :-**

५. **संवादलेखनाभ्यासः**

६. **पत्रलेखनाभ्यासः,**

७. **अनुच्छेदरचनाभ्यासः**

८. **संक्षेपणाभ्यासः**

लेखनकार्यस्य संशोधनम् :-

लेखनकार्यस्य यावत् महत्त्वम् अस्ति तावदेव संशोधनस्यापि। संशोधनाभावे लेखनकार्यस्य सार्थकता न सिद्ध्यति परं संशोधनकार्यमेव शिक्षकेभ्यः सर्वाधिकम् अरुचिकरं प्रतीयते अतः अधिकांशविद्यालयेषु संशोधनकार्यं प्रति न्याय्यं न भवति। प्रायः अध्यापकाः अनेन नीरसकार्येण मुक्तिं प्राप्तुं यथाशीघ्रं छात्राणां उत्तरपुस्तिकासु यत्र तत्र रक्तमस्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अंकनं कृत्वा त्यजन्ति। यदि प्रधानाचार्येण निरीक्षकेण वा अध्यापकानां संशोधनकार्यस्य पर्यवेक्षणं क्रियते तदा ते शीघ्रातिशीघ्रं छात्राणाम् उत्तरपुस्तिकाः संशोध्य प्रदर्शयन्ति। संख्यादृष्ट्या बहूनां छात्राणां संशोधनं तु भवति, परञ्च गुणात्मकदृष्ट्याऽपि संशोधनं भवति इति निश्चयेन वक्तुं न शक्यते। संशोधनं कृत्वा नवा छात्रेभ्यः सूचनात्मकनिर्देशाः लिख्यन्ते, न वा समुचितं मार्गदर्शनं क्रियते। अतः लेखनकार्यस्य संशोधने गुणवत्ता अपेक्षिता।

संशोधनस्य सिद्धान्ताः :-

लेखनकार्यस्य संशोधनावसरे केचन मनोवैज्ञानिकाः शैक्षणिकाश्च सिद्धान्ताः अनुसरणीयाः। यथा–

१. नियमितता
२. तत्परता
३. उपेक्षायाः अभावः
४. रुचिः
५. सोद्देश्यता
६. संशोधनकार्यस्यानुवर्तनम्
७. संशोधनचिह्नानां विकासः
८. निदानात्मकम् उपचारात्मकं च शिक्षणम्
९. संशोधनात् परं मूल्यांकनम्

उपर्युक्तसिद्धान्तानां पालनेन लेखनकार्यस्य संशोधनं गुणवत्ता च संभवति। सामूहिकरुपेणापि संशोधनं कर्तुं शक्यते, परं तदपेक्षया वैयक्तिकसंशोधनम् अत्यन्त प्रभावपूर्णम्। संशोधनकार्ये छात्राणां सहयोगमात्रं स्वीकरणीयं न तु तेषाम् उपरि पूर्णरूपेण आधृत्यैर्भाव्यम्।

सामान्य अशुद्धयः :-

संस्कृतलेखनकार्येषु प्रायः अधोनिर्दिष्टाः अशुद्धयः भवन्ति :–

१. वर्तनीसम्बद्धात्रुटिः
२. कालसम्बद्धात्रुटिः
३. कारकसम्बद्धात्रुटिः
४. उपसर्गप्रत्ययविभक्तिसम्बद्धा त्रुटयः
५. शब्दरचनासम्बद्धात्रुटिः
६. लिङ्ग सम्बद्धात्रुटिः
७. वाक्ये पदक्रमसम्बद्धात्रुटिः
८. कर्तृकर्म क्रियाणाम् अन्वयवसम्बद्धात्रुटिः
९. विशेषणविशेष्यणाम् अन्वयसम्बद्धात्रुटिः
१०. पदानाम् अर्थावबोधने त्रुटिः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११. तथ्यसम्बद्धात्रुटिः
१२. अनुच्छेदे क्रमाभावः
१३. सामान्य अपवादनियमानां विषये त्रुटिः
१४. सन्धिकरणे त्रुटिः
१५. समाससम्बद्धात्रुटिः

संशोधनं कथं कर्त्तव्यम् :-

लेखनकार्यस्य संशोधनस्य प्रमुखमुद्देश्यमस्ति छात्रेषु शुद्धतया स्पष्टतया च संस्कृते लेखनकौशलस्य विकासः न तु रक्तमस्याः लेपनम्। संशोधनकार्यं छात्राणाम् उत्साहवर्धकं भवेत् न तु हताशाजनकम्। अन्यथा ते संस्कृतशिक्षणात् भीताः सन् पलायनं कुर्युः। संशोधनं छात्रस्य भवति न तु पुस्तिकायाः। स्पष्टतया संशोधननिर्देशाः भवितव्याः। छात्राश्च सम्यक् बोधनीयाः येन ते भविष्ये ताः एव त्रुटयः न कुर्युः। संशोधनकार्य सम्पूर्णस्य लेखनकार्यस्य भवितव्यम्। संशोधनकार्ये विलम्बो न करणीयः नो चेत् छात्राः तद्विषये विस्मरन्ति। संशोधनं छात्रैर्लिखित्–मसिवर्णभिन्नं भवेत्। प्रायः रक्तमस्या संशोधनं समुचितम्। संशोधनकार्यस्य माध्यमेन अध्यापकछात्रयोर्मध्ये समाश्वासात्मकः वार्तालापः भवितव्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणे दृश्यश्रव्योपकरणानां प्रयोगः

शिक्षणं कथं प्रभावपूर्णं भवेत् इत्यस्मिन् विषये सर्वदैव अध्यापकाः शिक्षाशास्त्रिणश्च सततं चिन्तनशीलाः दृश्यन्ते। यद्यपि अध्यापकछात्रयोर्मध्ये सम्प्रेषणमेव शिक्षायाः महत्त्वपूर्णः आधारः तथापि बहुकालं यावत् केवलम् अध्यापकेन शिक्षणापेक्षया, यदि छात्राणां विभिन्नेन्द्रियाणाम् आकर्षणाय भिन्न–भिन्न सामग्रीणां प्रयोगः क्रियते चेत् छात्रेषु मनौवैज्ञानिकः प्रभावः अतिशयः भवेत्। अतः शिक्षणे विविधेन्द्रियाणाम् आकर्षणाय दृश्यश्रव्यसामग्रीणां प्रयोगः प्रवृत्तः।

दृश्यश्रव्योपकरणानां महत्त्वम् :-

- दृश्यश्रव्योपकरणानां प्रयोगेण पाठ्यक्रमः रोचकः आकर्षकश्च भवति।
- पाठ्यांशः सार्थकः भवति।
- पाठ्यांशः सरलः सुबोधश्च भवति।
- लब्धं ज्ञानं परिपुष्टम् भवति।
- अधिकतमं ज्ञानं स्मृतौ स्थिरं भवति।
- अनुभवस्य विस्तारः भवति।
- छात्राः अध्ययने सक्रियाः भवन्ति।
- शिक्षणं प्रभावपूर्णं लाभदायकं च भवति।

अतः संस्कृतशिक्षणेऽपि दृश्यश्रव्योपकरणानां प्रयोगेण संस्कृतशिक्षणं रोचकं सुलभं प्रभावपूर्णं च भवति।

सुप्रसिद्धः शिक्षाविद् पैस्टॉलॉजी महोदयः शिक्षायां पदार्थानां प्रत्यक्षानुभवस्य अत्यधिकं महत्त्वं मनुते। फ्रॉबेल, मान्टेसरी प्रभृतयः शिक्षाशास्त्रिणः बाल्यशिक्षायां दृश्यश्रव्योपकरणानां महत्त्वपूर्णं स्थानं दत्तवन्तः। यूनिसेफ संस्थया अध्ययनाधारेण शिक्षणे स्मृतौ च इन्द्रियाणां प्रामुख्यम् इत्थं निर्धारितम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिक्षणम्	**स्मरणम्**
आस्वादनेन १%	पठनेन १०%
स्पर्शेण २%	श्रवणेन २०%
घ्राणेन ३%	दर्शनेन ३०%
श्रवणेन ११%	दर्शनेन श्रवणेन च ५०%
दर्शनेन ८३%	कथनेन ३०%
	कथनेन श्रवणेन च ६०%

अनेन अधिगमप्रक्रियायां दृश्यश्रव्योपकरणानां महत्त्वं स्पष्टम्।

दृश्योपकरणानि :-

वर्णानां, पदार्थानां, विभिन्नतथ्यानां वा स्वरूपं प्रदर्शयितुम् उपयुज्यमानानि उपकरणानि दृश्योपकरणानि भवन्ति। एतेषां माध्यमेन दृश्येन्द्रियस्य आकर्षणं भवति।

श्रव्योपकरणानि :-

विभिन्नाः ध्वनीः, शब्दान् सम्वादादींश्च श्रोतुम् उपयुज्यमानानि उपकरणानि श्रव्योपकरणानि भवन्ति। एतेषां माध्यमेन श्रवणेन्द्रियाणाम् आकर्षणं भवति।

दृश्यश्रव्योपकरणानि :-

येषाम् उपकरणानां माध्यमेन द्रष्टुं श्रोतुं च शक्यते तानि दृश्यश्रव्योपकरणानि भवन्ति।

दृश्यश्रव्योपकरणानां प्रकाराः

दृश्योपकरणानि	**श्रव्योपरकणानि**	**दृश्यश्रव्योपकरणानि**
१. श्यामपट्टः	आकाशवाणी	दूरदर्शनम्
२. चित्रं मानचित्रं च	सीडीरोम	नाटकानि
३. सहायक शिक्षणसामग्री	ग्रामोफोन	संगणकम्
४. स्लाइड–प्रोजेक्टर		
५. ओवरहेड–प्रोजेक्टर (ओ.एच.पी.)		
६. फिल्म प्रोजेक्टर		

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणे दृश्यश्रव्योपकरणानां प्रयोगः :-

दृश्योपकरणानिः-

१. श्यामपट्टः :-

विद्यालयेषु अधिकतया श्यामपट्टौभित्तौ निर्मितः उपलभ्यते। काष्ठनिर्मितः श्यामपट्टोऽपि इतस्ततः भिन्नस्थानेषु उपयोगाय प्रयुज्यते। तात्कालिकोपयोगाय आकुंचन–श्यामपट्टोऽपि उपलभ्यते। इदानीं क्वचित् हरितपीतनीलवर्णेष्वपि लेखनपट्टाः प्रयुज्यन्ते। श्यामपट्टः विपुलरूपेण उपलब्धमुपकरणमस्ति। अस्य प्रयोगः अध्यापकस्य अत्यन्तसहायकः। विशिष्ट संस्कृतशिक्षणे पदच्छेदाः व्याकरणांशाः श्यामपट्टोपरि लिखित्वा स्पष्टतया सरलतया अल्पकाले एव बोधयितुं शक्यन्ते। संस्कृताध्यापकैः अवश्यमेव श्यामपट्टस्य उपयोगः अधिकाधिकः करणीयः।

२. चित्राणि रेखाचित्राणि मानचित्राणि च :-

चित्राणि अध्यापनं रुचिकरं आकर्षकं च कुर्वन्ति। काव्येषु विविधवर्णानां, कक्षाविषयाणां, प्राकृतिकदृश्यानां, ऐतिहासिकभवनानां च चित्राणि प्रदर्शयितुं शक्यन्ते। प्रारंभिकस्तरे चित्राणां माध्यमेन शब्दभाण्डारस्य वृद्धिः कर्तुं शक्यते। व्याकरणांशानां बोधनाय रेखाचित्राणि सारण्यः प्रयोक्तुं शक्यन्ते। प्रसंगानुसारं ऐतिहासिक–अंशान्, भौगोलिक–अंशान् च बोधयितुं मानचित्राण्यपि प्रयोगार्हाणि।

३. सहायकशिक्षणसामग्री :-

अ. प्रतिकृतयः :-

बृहदाकारस्य प्राकृतिकवस्तुनः केनापि द्रव्येण निर्मितं लघ्वाकारं वस्तुरूपं प्रतिकृतिः भवति। विविधफलानां, जन्तूनां, शाकानां, भवनानाम् (ताजमहल् इत्यादयः) च प्रतिकृतयः कक्षायां प्रदर्शयितुं शक्यन्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब. प्रक्षेपकयन्त्रम् :-

प्रक्षेपकयन्त्रस्य (Projector) सहयोगेन स्थिरचित्राणि (Slides) चलचित्राणि च (Film strips) यवनिकायां प्रदर्शयितुं शक्यन्ते। भाषायाः साहित्यस्य च शिक्षणे एतेषां उपयोगः कर्तुं शक्यते। पारदर्शिपत्राणां (Transparancies) प्रयोगः लिखित्वा प्रदर्शनाय कर्तुं शक्यते।

श्रव्योपकरणानि :-

१. आकाशवाणी :-

आकाशवाण्या प्रतिदिनं संस्कृतवार्ताः प्रसार्यन्ते। अपि च मध्ये मध्ये संस्कृतकार्यक्रमाः अपि प्रसार्यन्ते। तेषां कार्यक्रमाणां श्रवणार्थं छात्राः प्रेरणीयाः। संस्कृतपाठ्यक्रमः अपि आकाशवाणि माध्यमेन प्रसारयितुं शक्यते।

२. ध्वनिमुद्रिका :-

पूर्वमुद्रितानां ध्वनीनां पाठानां श्लोकानां च श्रावणार्थं ध्वनिमुद्रिका (Tape Recorder) सान्द्रमुद्रिका (CD Rom) च प्रयुज्येते। अनयोः माध्यमेन पूर्वध्वनीनां सम्मार्जनेन नूतनध्वनयः अपि मुद्रयितुं शक्यन्ते। परं ग्रामोफोन यन्त्रे पूर्वमुद्रित ध्वनीनामेव श्रवणं संभवति। एतेषां यन्त्राणां साहाय्येन शुद्धोच्चारणं सम्पादयितुं शक्यते।

दृश्यश्रव्योपकरणानि :-

१. नाटकम् :-

संस्कृतवाङ्मये बहूनि नाटकानि रचितानि सन्ति। तानि सम्पूर्णरूपेण आंशिकरूपेण वा रंगमंचोपरि अभिनीय प्रदर्शयितुं शक्यन्ते। अभिनयस्य दर्शनेन, संवादानां श्रवणेन च छात्राः स्वाभाविकगत्या संस्कृतसंभाषणे समर्थाः भविष्यन्ति।

२. दूरदर्शनम् :-

सम्प्रति अत्युत्तमं सर्वसुलभं च दृश्यश्रव्योपकरणमस्ति। दूरदर्शनमाध्यमेन संस्कृतकार्यक्रमाः प्रसार्यन्ते। तेषां दर्शनार्थं छात्राः प्रेरणीयाः। नूतनकार्यक्रमाः अपि संरच्य दूरदर्शनमाध्यमेन प्रसारयितुं शक्यन्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **संगणकम् :-**

संगणकमाध्यमेनशिक्षणं प्रचुरप्रसारे अस्ति। छात्राः संगणकयंत्रस्य प्रयोगे रुचिमपि प्रदर्शयन्ति। अनेन माध्यमेन ते स्वयम् अध्ययनं कर्तुं शक्नुवन्ति। संगणकयंत्रे अन्तर्जाल (Internet) माध्यमेन संस्कृतविषयक Website द्रष्टुं शक्यते। ततः स्वरुच्यनुसारं छात्राः ज्ञानम् अर्जयितुं शक्नुवन्ति।

अवधेयांशाः :-

- दृश्यश्रव्योपकरणानि अध्यापकस्य सहायकानि सन्ति न तु अध्यापकस्य विकल्परूपाणि।
- उपकरणानि शिक्षणस्य केवलं साधनानि भवन्ति न तु साध्यानि।
- अध्यापकः उपकरणानां प्रयोगविषये तेषां महत्वविषये च सम्यक् ज्ञात्वैव तानि संचालयेत्।
- उपकरणानां प्रयोगस्य पूर्वसन्नाहः करणीयः। सर्वे छात्राः सम्यक्रूपेण यथा द्रष्टुं श्रोतुं वा शक्नुयुः तथा व्यवस्था करणीया।
- प्रदर्शनानन्तरं श्रावणानन्तरं वा अध्यापकेन स्पष्टीकरणं विधेयम्। अन्ते छात्राणां मूल्यांकनम् अवश्यं भवेत्।
- उपकरणानां मूल्याधिक्यं महत्वपूर्णं नास्ति, अपितु उपलब्धोपकरणानां समुचितः अधिकाधिकः प्रयोगः। बहूनि उपकरणानि युगपत न प्रयोज्यानि। विषयानुकूलम् अपेक्षितमेव प्रयोक्तव्यम्।

संस्कृतशिक्षणे विविधदृश्यश्रव्योपकरणानां समुचितप्रयोगेण छात्राः संस्कृतं प्रति रुचिमन्तः आकर्षणयुक्ताः च भवन्ति। एतेषां माध्यमेन अध्यापकः संस्कृतशिक्षणं प्रभावोत्पादकं लाभदायकं च कर्तुं प्रभवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणे मूल्याङ्कनम्

शिक्षायाः परीक्षायाश्च अस्ति कश्चन दृढः सम्बन्धः। परीक्षयाम् एव शिक्षायाः मूल्याङ्कनं भवति। प्राचीनकालादेव येनकेनापि रूपेण परीक्षाक्रमः प्रचलत्येव। परीक्षाणां माध्यमेन छात्राणां ज्ञानस्तरः, बुद्धिकौशलं, बोधक्षमतायाः च निश्चितं ज्ञानं प्राप्यते। परञ्च कालक्रमेण परीक्षा अत्यन्तमहत्त्वपूर्णा जाता। परीक्षणविधौ परिवर्तनाय मनोवैज्ञानिकाः शिक्षाशास्त्रिणश्च विविधान् प्रयोगान् कृतवन्तः। परिणामतः मूल्याङ्कनस्य नूतनविधयः आविष्कृताः।

मूल्याङ्कनस्य आवश्यकता :-

उद्देश्यानां पूर्तिः कियत्पर्यन्तं जाता? कृतस्य कार्यस्य साफल्यं कियत्पर्यन्तम् अधिगतम् ? अध्यापकानां शिक्षणविधिः कियान् सफलः ? छात्राणां विषयग्रहणं कियत् जातम् ? इत्यादीनां प्रश्नानां समाधानार्थं मूल्याङ्कनम् अपेक्षितम्। मूल्याङ्कनेन कृतस्य कार्यस्य सिंहावलोकनं भवति, परीक्षणं भवति, अग्रिमकर्त्तव्यस्य विषये विचारविमर्शोऽपि भवति।

मूल्याङ्कनं, परीक्षा, मापनं इत्येते त्रयः शब्दाः परस्परं भिद्यन्ते। परीक्षासाधनम् अस्ति, मूल्याङ्कनं साध्यम् अस्ति अतः मूल्याङ्कनस्य क्षेत्रं व्यापकम्। मूल्याङ्कनं सर्वेषाम् अंशानां सततक्रमेण निरन्तरं भवति। परीक्षा तु निश्चिते स्थाने निश्चितायाम् अवधौ। परीक्षितांशस्य मूल्यांकनाय प्रयुज्यमाना सांख्यिकीया प्रक्रिया मापनम्।।

परम्परागत संस्कृतपरीक्षाप्रणाल्याः दोषाः :-

परम्परागतसंस्कृतपरीक्षाप्रणाल्या श्रवणभाषणपठनलेखनति चतुर्विधभाषाकौशलानां विकासस्य मूल्याङ्कन न भवति। वर्षपर्यन्तम् अध्ययनात् परं वार्षिकपरीक्षाधारेण छात्राणाम् उत्तीर्णता अनुत्तीर्णता वा उद्घोष्यते। परीक्षायाम् उत्तमाङ्केनोत्तीर्णाः छात्राः अपि संस्कृतमाध्यमेन अभिव्यक्तौ कुशलाः न प्रतीयन्ते। अस्यां परीक्षाप्रणाल्यां बहवः दोषाः सन्ति :–

– लिखितपरीक्षामाध्यमेन संस्कृतभाषायाः अन्यकौशलानां परीक्षणं न भवति।

– छात्राणां वास्तविकयोग्यतायाः निर्णयम् न भवति। पञ्चषाणां प्रश्नानाम् आधारेण छात्राणाम् उत्तीर्णता अनुत्तीर्णता वा भाग्याधारिता भवति।

– कण्ठस्थीकरणस्य प्राधान्यं दीयते। अनेन स्मरणशक्तेः परीक्षणं भवति न तु आर्जितज्ञानस्य।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

– मूल्याङ्कनं व्यक्तिनिष्ठं भवति। भिन्न–भिन्न परीक्षकैः एकस्यैव उत्तरस्य भिन्नांकाः दातुं शक्यन्ते।

– परीक्षायाम् उत्तीर्णता प्रमाणपत्रप्राप्तिश्च छात्राणां प्रधानं लक्ष्यं सञ्जातम्। अतः ते परीक्षासु अनुचिताचरणे प्रवृत्ताः भवन्ति।

– सम्पूर्णाशिक्षा परीक्षाकेन्द्रिताः सञ्जाता। छात्राः परीक्षोत्तरणार्थमेव पठन्ति, अध्यापकाः परीक्षानिमित्तमेव पाठयन्ति।

मूल्याङ्कनस्य प्रकाराः :-

मूल्याङ्कनं द्विविधं भवति :–

१. आन्तरिकं मूल्याङ्कनम् :-

सम्पूर्णेऽपि शैक्षणिकसत्रे छात्रैः कृतानां सर्वेषां कार्याणाम्, दैनिकगतिविधीनां च कक्षास्तरे, विद्यालयस्तरे वा अध्यापकैः यत् मूल्याङ्कनं क्रियते तदेव आन्तरिकं मूल्याङ्कनम्। अनेन छात्राणां निरन्तरप्रगतिं ज्ञातुं शक्यते। अनेन मूल्यांकनेन छात्रैः सम्पूर्णेऽपि वर्षे कृतस्य परिश्रमस्य सर्वेषामपि ज्ञातांशानां कौशलानां च मूल्यांकनं संभवति। वार्षिकपरीक्षायां अस्वास्थ्यकारणात् अन्यान्यकारणेभ्यः वा ये छात्राः परीक्षालेखने असमर्थाः भवन्ति, न्यूनाङ्कान् वा प्राप्नुवन्ति तेषां सम्पूर्णवर्षस्य परिश्रमः व्यर्थः भवति। एतादृशे सन्दर्भे निरन्तरमूल्यांकनाधारेण परीक्षापरिणामे सम्पूर्णे वर्षे कृतस्य परिश्रमस्य प्रतिफलं प्रदर्शयितुं शक्यते।

२. बाह्यमूल्यांकनम् :-

शिक्षकेतरजनैः शैक्षिकसंस्थाभिः राज्य परीक्षामण्डलैः, केन्द्रीय परीक्षामण्डलैः, विश्वविद्यालयैर्वा औपचारिकरूपेण निश्चितावधौ परीक्षाधारेण कृतं मूल्यांकनं बाह्यमूल्यांकनं भवति। एतादृशीः परीक्षा व्यापकसन्नाहाधारेण सुनियोजितरूपेण आयोज्यन्ते।

स्वरूपाधारेणपरीक्षा द्विविधा :-

क. मौखिकपरीक्षाः :-

अस्यां परीक्षायां प्रश्नाः मौखिकरूपेण प्रक्ष्यन्ते, छात्रैः उत्तराण्यपि मौखिकरूपेण दीयन्ते। अस्याः मूल्याङ्कनस्य प्रामाणिकता विश्वसनीयता च कदाचित् सन्दिग्धा भवति। परीक्षानन्तरं प्रमाणरुपेण प्रस्तोतुं किमपि नावशिष्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ख. लिखितपरीक्षाः :-

अस्यां परीक्षायां प्रश्नानाम् उत्तराणि लिखितरूपेण छात्रैः प्रस्तूयन्ते। छात्राणां उत्तरपुस्तिकानां मूल्यांकनं परीक्षणं कृत्वा अङ्काः निर्धार्यन्ते। परीक्षापरिणामघोषणानन्तरमपि उत्तरपुस्तिकासु छात्राणाम् उत्तराणि परीक्षकैः प्रदत्तांकाश्च प्रमाणरूपेण तिष्ठन्ति। लिखितपरीक्षाद्विविधा भवति :–

अ. निबन्धात्मकपरीक्षा :-

अस्यां परीक्षायां पञ्चशः निबन्धात्मकप्रश्नाः प्रक्ष्यन्ते, तेषाम् उत्तराण्यपि सुदीर्घानि भवन्ति।

अस्याः मूल्याङ्कनं व्यक्तिनिष्ठं संभवति। भाग्याधारितं च भवति।

ब. वस्तुनिष्ठपरीक्षा :-

अस्यां समग्रपाठ्यांशम् आधृत्य लघुलघु प्रश्नाः प्रक्ष्यन्ते। उत्तराणां मूल्यांकनं वस्तुनिष्ठं भवति। भिन्नपरीक्षकैः परीक्षामाणेऽपि मूल्यांकने भेदः न भवति। अतः एषा परीक्षा अत्यन्तप्रामाणिका भवति।

मूल्याङ्कनप्रविधयः



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणे गुणात्मकमूल्याङ्कनाय प्रस्तावः :-

१. प्रश्नपत्राणां संरचना परिवर्तनीया प्रश्नेषु वैविध्यं स्यात् निबन्धात्मक–लघूत्तरात्मक– वस्तुनिष्ठेति सर्वेषामपि समावेशः स्यात्।

२. ज्ञानात्मक–क्रियात्मक–भावात्मकेति त्रयाणामपि पक्षाणां प्रश्नाः प्रष्टव्याः।

३. आन्तरिकमूल्याङ्कने छात्रैः सम्पूर्णेऽपि वर्षे कृतानां कक्षाकार्याणां गृहकार्याणां, प्रायोगिककार्याणां च समावेशः स्यात्।

४. छात्राणां वास्तविकज्ञानस्य मूल्यांकनाय प्रश्नरचना विवेकपूर्णा स्यात्।

५. संस्कृतभाषाया व्यवहारिकपक्षस्य परीक्षणार्थं मौखिकपरीक्षा भवेत्।

६. प्रश्नपत्राणि कक्षास्तरानुगुणानि पाठ्यक्रमानुगुणानि च भवेयुः।

७. परीक्षणं निष्पक्षं स्यात्।

८. संस्कृतशिक्षणोद्देश्यानां पूर्तिं परीक्षितुं प्रश्नाः भवेयुः।

संस्कृतशिक्षणे मूल्याङ्कनस्य नूतनं विधानम् :-

क. निबन्धात्मकप्रश्नाः :-

यद्यपि निबन्धात्मकपरीक्षायां दोषाः सन्ति तथापि अधोनिर्दिष्टानाम् अंशानां परीक्षणार्थं केचन निबंधात्मकप्रश्नाः अवश्यमेव स्युः।

१. लिखिताभिव्यक्तिः २. विषयज्ञानम् ३. काव्यरसानुभूतिः

४. घटनानां वर्णनम् ५. सारलेखनम् ६. पत्रलेखनम्

७ निबन्धरचना

ख. वस्तुनिष्ठप्रश्नाः :-

विषयग्रहणकौशलम्, शब्दज्ञानम्, शुद्धप्रयोगः, अक्षरविन्यासः, व्याकरणप्रयोगः इत्यादीनाम् अंशानां परीक्षणार्थं वस्तुनिष्ठप्रश्नाः प्रष्टव्याः। वस्तुनिष्ठप्रश्नानां बहवः प्रकाराः सन्ति–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१. बहुविकल्पप्रश्नाः

२. रिक्तस्थानस्य पूर्तिः

३. प्रत्यभिज्ञानप्रश्नः (सत्यासत्यपरीक्षा)

४. प्रत्याह्वानप्रश्नः – छात्राः प्रश्नानाम् उत्तरं स्मृत्वा लिखन्ति। यथा 'लता' शब्दस्य तृतीया–एकवचने रूपम्–

५. युगलीकरणं – वर्गद्वयोः अंशानां सम्मेलनं संयोजनं वा।

६. व्यवस्थापनम् – क्रमनिर्धारणम्

७. एकपदेन उत्तरम्

ग. लघु-उत्तरात्मकप्रश्नाः :-

केचन् प्रश्नाः तादृशाः भवेयुः येषां उत्तराणि कतिपयवाक्यैः अनुच्छेदेन वा भवेयुः।

घ. अतिलघु-उत्तरात्मकप्रश्नाः :-

येषां प्रश्नानाम् एकवाक्येन वाक्यद्वयेन वा उत्तराणि भवन्ति।

च. मौखिकपरीक्षाः :-

संस्कृतभाषायाः व्यवहारपक्षस्य मूल्यांकनार्थं मौखिकपरीक्षायाः महत्त्वपूर्णं स्थानमस्ति। मौखिकपरीक्षायाः अधोनिर्दिष्टाः प्रकाराः सन्ति :–

१. वाचनपरीक्षणम्

२. संवादकौशलपरीक्षणम्

३. भाषणम्

४. प्रश्नावलीमाध्यमेन

५. शास्त्रार्थ–तर्कवितर्कार्थम् एषा प्रणाली प्राचीनकालात् प्रचलति।

६. शलाकापरीक्षा–प्राचीनकाले सम्पूर्णज्ञानं परीक्षितुम् अस्याः प्रयोगः भवति स्म। ग्रन्थस्य यस्मिन् कस्मिन् अपि भागे शलाका (काष्ठदण्डम्) स्थाप्यते। तत्र विद्यामानम् अंशं छात्रः वर्णयेत्। यद्यपि एषाऽपि परीक्षा भाग्याधीना भवति, तथापि यावत् सम्पूर्णं शास्त्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्पूर्णः ग्रन्थः वा न अधीतः तावत् छात्राः सफलाः न भवन्ति। आधुनिके प्रतिस्पर्धात्मके युगेऽपि विषयस्य अक्षुण्णज्ञानस्य परीक्षणार्थम् अस्याः परीक्षायाः प्रयोगः कर्तुम् शक्यते।

७. सामूहिकचर्चा–

८. अपठितांशाधारिताःप्रश्नाः :–

अपठितं गद्यांशं काव्यांशं वा उपस्थाप्य तदाधारिताः प्रश्नाः।

एवम् प्रकारेण मूल्यांकनस्य नूतनप्रविधीनाम् आश्रयेण संस्कृतशिक्षणे छात्राणां सर्वांगीणं मूल्यांकनम् संभवति। चतुर्विधभाषाकौशलानां परीक्षणमपि मुख्यभूतमस्ति। अतः सर्वेषाम् अंशानां पक्षाणां च निष्पक्षरूपेण प्रामाणिकरुपेण निरन्तरमूल्याङ्कनेनैव संस्कृतशिक्षणे मूल्यांकनस्य क्षेत्रे गुणवत्ता भवेत्।

संस्कृतस्य प्रचाराय, सर्वत्रप्रसराय च
आत्मानमाहुतं मन्ये, वन्दे संस्कृतमातरम्
भूतले संस्कृताभाषा, कामधेनुः प्रकीर्तिता
जननी सर्वभाषाणां, विज्ञानस्योपकारिणी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षणे पाठ्यसहगामिक्रियाणां महत्त्वम्

शिक्षणे पाठ्यविषयैः सह पाठ्यसहगामिक्रियाणाम् अत्यन्तं महत्वमस्ति। पूर्वं तु केवलं बौद्धिकविषयाः एव शिक्षणे महत्वपूर्णं स्थानं भजन्ते स्म। अन्याः गतिविधयः पाठ्येतरक्रियारूपेण गौणाः। परम् उद्देश्यपरिवर्तनेन बालकानां सर्वांगीणविकासः शिक्षया उद्दिष्टत्वात् शिक्षणं बहुमुखी प्रक्रिया जाता। सम्प्रति पाठ्यक्रमे कक्षाशिक्षणेन सह पुस्तकालयाध्ययनं, प्रयोगशालानुभवः, क्रीडाः, साहित्यिकगतिविधयः, सांस्कृतिककार्यक्रमाः सर्वेऽपि अभिन्नाङ्गत्वेन स्वीकृताः।

पाठ्यसहगामिक्रियाणां महत्त्वम्ः-

१. **शारीरिकविकासः :-**

क्रीडायोगादिभिः शारीरिकगतिविधिभिः छात्राणां शारीरिकशक्तेः विकासः भवति।

२. **मनौवैज्ञानिकविकासः :-**

छात्रेषु किशोरावस्थायां शक्तिरधिका भवति। अतः विभिन्नक्रियाकलापैः तेषां मूलप्रवृत्तीनां मनोवैज्ञानिकभावानां च विकासाय अवसरो लभ्यते।

३. **सामाजिकतायाः विकासः :-**

पाठ्यसहगामिक्रियामाध्यमेन समाजमध्ये विविधकार्यक्रमाणाम् आयोजनं भवति। तेन समाजसेवाभावस्य विकासः भवति, अथ च परस्परं सहयोगभावनायाः अपि विकासः भवति।

४. **वैयक्तिकावश्यकतायाः पूर्तिः :-**

वैयक्तिक रूपेण स्व स्व योग्यतानुगुणं व्यक्तित्वस्य विकासाय पाठ्यसहगामिक्रियाः सहायिकाः भवन्ति।

५. **नैतिकतायाः विकासः :-**

पाठ्यसहगामिक्रियाणां माध्यमेन सहयोगः सहानुभूतिः, सत्यनिष्ठा, कर्तव्यनिष्ठा, न्यायप्रियता, आज्ञापालनं, धैर्यम् इत्यादयः नैतिकगुणाः विकसिताः भवन्ति।

६. **रूचीनां विकासः :-**

विविधक्रियाणाम् आयोजनेन छात्राणां रुचेः, परिष्करणं भवति। ते विविधगतिविधिषु रुचिमन्तः अपि भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७. **नेतृत्त्वगुणानां विकासः :-**

विविधगतिविधीनां माध्यमेन छात्रेषु नेतृत्त्वकौशलस्य उत्तरदायित्वबोधस्य च विकासः भवति। तेषु आत्मविश्वासस्य भावना प्रबला भवति।

८. **नागरिकताप्रशिक्षणम् :-**

विविधगतिविधीनां माध्यमेन छात्रेषु सन्नागरिकस्य गुणानां विकासः भवति। अद्यतनछात्राः एव श्वः देशस्य नागरिकाः भविष्यन्ति।

९. **अवकाशसमयस्य सदुपयोगः :-**

अवकाशसमयः वृथा न गच्छेत इत्येतदर्थं पाठ्यसहगामिक्रियाणाम् आयोजनं भवति। छात्राः यदि सोद्देश्यक्रियासु रताः न भवन्ति तर्हि अवश्यमेव तेषां रिक्तमस्तिष्के नकारात्मक असामाजिक–अनैतिक–क्रियाकलापानां प्रति आसक्तिः भवेत्।

१०. **अनुशासनस्थापने सहाय्यम् :-**

पाठ्यसहगामिक्रियाणां माध्यमेन छात्रेषु स्वतः अनुशासनस्य भावना विकसति। यतोहि सर्वे क्रियाणां नियमानुगुणं व्यवस्थानुगुणं च कार्यं कुर्वन्ति।

संस्कृतशिक्षणसम्बद्ध-पाठयसहगामिक्रियाणाम् उद्देश्यानि :-

१. संस्कृतसाहित्यं प्रति रुच्युत्पादनम्।

२. छात्राणां अभिव्यक्तिकौशलस्य विकासः।

३. छात्रेषु आत्मविश्वासस्य जागरणम्।

४. छात्राणां सर्जनात्मकशक्तेः विकासः।

५. छात्राणां शब्दभाण्डारस्य वृद्धिः।

६. शुद्धोच्चारणस्य अभ्यासः।

७. संस्कृतसाहित्यिक–अंशानां सङ्कलनप्रवृत्तेः विकासः।

८. स्वस्थमनोरञ्जनम्।

९. अवकाशसमयेषु संस्कृताध्ययनप्रवृत्तेः विकासः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०. सैद्धान्तिकज्ञानस्य व्यावहारिकरूपेण प्रयोगे अवसरप्रदानम्।

११. संस्कृतभाषायाः प्रचारे प्रसारे च अभिरुचिः।

संस्कृतशिक्षणसम्बद्ध पाठ्यसहगामिक्रियाः :-

संस्कृतशिक्षणं यथा रोचकं प्रभावपूर्णं च भवेत् तथा कर्तुं विभिन्नाः पाठ्यसहगामिक्रियाः आयोजयितुं शक्यन्ते।

१. **साहित्यिकप्रतियोगिताः :-**

वाद–विवादः, भाषणम्, निबन्धलेखनम्, संस्कृतप्रश्नोत्तरी, श्लोकपाठः, संस्कृतगानम्, अन्त्याक्षरी, इत्यादयः।

२. **भाषाक्रीड़ा :-**

संख्याज्ञानार्थं, समयबोधार्थं, शब्दनिर्माणार्थं, वाक्यरचनार्थं, कथारचनार्थं च।

३. **प्रहेलिकाः :-**

प्रहेलिकाः, विनोदकणिकाः, समस्यापूर्तिः।

४. **चित्रवर्णनम् :-**

५. **संवादाभ्यासः :-**

मित्रमेलनं, रोगीवैद्यसंभाषणं, आपणव्यवहारः, शिष्टाचारः इत्यादयः।

६. **शब्दभाण्डारस्य वर्णनम् :-**

पशूनां, पक्षीणां, फलानां, पुष्पाणां, वस्त्राणां, गृहोपयोगिवस्तूनां च बोधकशब्दानां सङ्ग्रः।

७. **संस्कृतकविसम्मेलनम् :-**

८. **व्याख्यानमालायाः आयोजनम् :-**

९. **सांस्कृतिक-कार्यक्रमाः :-**

नृत्यानां प्रदर्शनम्, नाटकानां प्रदर्शनम्

१०. **पर्यावरणसंरक्षणकार्यक्रमाः :-**

विविधकाव्येषु आगतानां वृक्षाणाम्, अभिज्ञानं, रोपणं, संरक्षणं च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११. संस्कृतप्रदर्शनी :-

१२. संस्कृतशोभायात्रा :-

१३. सांस्कृतिकोत्सवानाम् आयोजनम् :-

यथा संस्कृतदिवसः, संस्कृतसप्ताहः, वाल्मीकिजयन्ती, व्यासजयन्ती, कालिदास जयन्ती, गीताजयन्ती इत्यादयः।

१४. विद्यालयीय कार्यक्रमेषु संस्कृतकार्यक्रमाणाम् आयोजनम् :-

यथा स्वतंत्रतादिवसे, गणतन्त्रदिवसे, शिक्षकदिवसे, वार्षिकोत्सवे च संस्कृत कार्यक्रमाः आयोजनीयाः।

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्
देवाभागे यथापूर्वे सञ्जनानामुपासते
समानी वः आकूतिः समानाहृदयानि वः
समानमस्तु वो मनो, यथा वः सुसुहासति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतकक्षः संस्कृतशिक्षकश्च

विद्यालये यथा विज्ञानकक्षः, संगीतकक्षः, कलाकक्षः, क्रीडाकक्षः इत्यादयः भवन्ति तथैव संस्कृतकक्षोऽपि भवितव्यः। संस्कृतकक्षे सर्वं संस्कृतमयं वातावरणं स्यात्। संस्कृतकक्षे प्रविश्य छात्राः संस्कृताध्ययने यथा तत्पराः स्युः तथा प्रेरणादायकं वातावरणं संस्कृतकक्षे भवितव्यम्। संस्कृतशिक्षणम् रूचिकरं कर्तुं दृश्यश्रव्योपकरणानां पाठ्यसहगामिक्रियाणां च महत्वपूर्णं स्थानं अस्ति। अतः संस्कृतकक्षे दृश्यश्रव्योपकरणानां प्रदर्शनस्य व्यवस्था पाठ्यसहगामिक्रियाणाम् आयोजनस्य च व्यवस्था भवेत्।

संस्कृतकक्षे आवश्यकसामग्री :-

१. भित्त्युपरि सूक्तयः, सुभाषितश्लोकाः

२. कवीनाम् ऋषीणां, संस्कृतविदुषां च चित्राणि

३. व्याकरणांशसम्बद्ध रेखाचित्राणि

४. प्राचीनगुरुकुलशिक्षणसम्बद्धचित्राणि

५. संस्कृतज्ञानविज्ञानबोधकपटानि

६. दृश्यश्रव्योपकरणानि

७. सान्दर्भिकग्रन्थाः—शब्दकोशः, धातुकोशः, रूपचन्द्रिका, अमरकोशः इत्यादीनि।

८. संस्कृतसाहित्यस्य ग्रन्थाः – प्रसिद्धानि महाकाव्यानि, नाटकानि इत्यादयः

९. वर्णनात्मकचित्राणि

१०. प्रतिकृतयः

११. संस्कृतपत्रिकाः

यदि विद्यालयेषु पृथक्रूपेण संस्कृतकक्षस्य व्यवस्था न भवितुमर्हति, तर्हि संस्कृताध्यापकः न्यूनातिन्यूनं सर्वासु कक्षासु विद्यालयस्य परिसरे च भित्तिषु सूक्तीः सुभाषितश्लोकान् अन्यानि च संस्कृतविषयकचित्रपटानि स्थापयितुं शक्नोति। एतेनापि छात्राः संस्कृतं प्रति आकर्षिताः भवेयुः। विद्यालये सर्वत्र संस्कृतवाक्यानां दर्शनेन श्रवणेन च अवश्यमेव विद्यालये संस्कृतवातावरणस्य निर्माणं भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षकः :-

समाजे अद्यापि संस्कृतशिक्षकस्य प्रतिष्ठा अक्षुण्णा अस्ति। समाजं प्रति संस्कृतशिक्षकस्य दायित्त्वं महत्त्वपूर्णमस्ति।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुः साक्षात् परब्रह्म तस्मै श्री गुरवे नमः।।

अद्यापि उत्तमशिक्षकं सर्वे ईश्वरसमं मन्वते। अस्माकं संस्कृतिरपि मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इत्युक्त्वा समाजे आचार्यस्य गौरवपूर्ण स्थानं सूचयति। शतपथब्राह्मणे–'मातृमान्, पितृमान आचार्यपुरुषोवेदः' इत्युक्तम्।

प्राचीनकाले गुरुः यथा वदति स्म तथैव आचरति स्म। तस्य त्यागपूर्णेन, आदर्शपूर्णेन जीवनेन सर्वे प्रभाविताः आसन्। तस्य जीवनम् अनुकरणयोग्यमासीत्। अतएव समाजे सः प्रतिष्ठातिशयस्य अधिकारी आसीत।

गुरुसुश्रूषया विद्या पुष्कलेन धनेन वा।

अथवा विद्यया विद्या चतुर्थी नोपलभ्यते।।

इति प्राचीनकाले व्यवस्था आसीत्। शिक्षायाः प्रसारः सीमितः आसीत्। अतः गुरुमुखादेव ज्ञानप्राप्तेः अवकाशः सीमितः आसीत्। तच्च आचार्यात् प्राप्तं ज्ञानं यद्यपि चतुर्थांशं भवति स्म तथापि महत्वपूर्णम्–

आचार्यात् पादमाधत्ते पादं शिष्यः स्वमेधया।

पादं सब्रह्मचारिभ्यः शिष्टं कालक्रमेण च।।

आचार्यात् प्राप्ते पादमात्रज्ञाने शिष्यः अन्य स्रोतसां त्रिपादात्मकं ज्ञानम् संयोज्य स्वजीवनम् आदर्शमयं यापयति स्म।

वर्तमानयुगे समाजे बहुपरिवर्तनानि जातानि। उद्देश्यानि परिवर्तितानि। जीवनविधानानि परिवर्तितानि, भौतिकवादस्य उपभोक्तृवादस्य च व्यापकः प्रसारः जातः। अस्मिन् काले सर्वत्र प्रतिस्पर्धात्मके वातावरणे स्वार्थभावस्य, भ्रष्टाचारस्य च व्यापकः प्रसारः जातः। अनुदिनं नैतिकमूल्यानां ह्रासः भवति। 'सर्वेभ्यः शिक्षा' इति शिक्षायाः सार्वभौमीकरणम् जातम्। अस्मिन् काले ये संस्कृतशिक्षकाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालप्रवाहेण तदनुकूलाचरणे प्रवृत्ताः तान् प्रति समाजे आदरोऽपि न्यूनः जातः। परम् अस्मिन् प्रतिकूले वातावरणेऽपि ये शिक्षकाः आदर्शमयं जीवनं यापयन्ति, यद्यपि ते अंगुलिगण्याः, तेषु समाजस्य बद्धादरः दृश्यते।

समाजे संस्कृतशिक्षकेभ्यः बहु अपेक्षा अस्ति। भारतीयसंस्कृतेः संरक्षणे शाश्वतजीवनमूल्यानां विकासे च तस्य भूमिका अद्यापि सर्वोपरि अस्ति। अतः संस्कृतशिक्षकाः कालिदासोक्तरीत्या "ज्ञानपण्यः वणिजः" मा भवन्तु। सर्वेऽपि आदर्श संस्कृतशिक्षकाः भवन्तु। केवलम् उदरनिमित्तं संस्कृतशिक्षकवृत्तिः मा भवेत्। भावि सन्ततीनां कृते भारतीयसंस्कृतेः स्थानांतरणे संस्कृतशिक्षकः मेरुदण्डः अस्ति।

आदर्श-संस्कृत-शिक्षकस्य गुणाः :-

सामान्यशिक्षकेषु ये गुणाः भवन्ति, यथा—आकर्षकव्यक्तित्वं, शिक्षकोचिता वेशभूषा, उत्तमं स्वास्थ्यं, मधुरभाषित्वं, कुशाग्रबुद्धिः, संवेगात्मकं संतुलनं, सामाजिक व्यवहारकुशलता, उत्तमचरित्रम्, नेतृत्वक्षमता, हास्यप्रियता, मैत्रीपूर्णः सहानुभूतिपूर्णश्च व्यवहारः—ते तु संस्कृतशिक्षेकेऽपि भवेयुरेव। तदतिरिच्य अधोनिर्दिष्टाः विशिष्टाः गुणाः, संस्कृतशिक्षकेषु अपेक्ष्यन्ते :—

१. **संस्कृतभाषायाः सम्पूर्णदक्षता :-**

संस्कृतशिक्षकः संस्कृतभाषाव्यवहारे पूर्णरूपेण दक्षः स्यात्। बहुधा जनाः पठनकाले यथाकथंचित् रटनं कृत्वा परीक्षामुत्तरन्ति। क्रमशः नियुक्तिं प्राप्य संस्कृतशिक्षकाः भवन्ति। तादृशाः शिक्षकाः छात्रेभ्यः सम्यक् संस्कृतपाठने दक्षाः न भवन्ति। अतः संस्कृतशिक्षकः व्याकरणनियमानुकूलभाषाप्रयोगे पूर्ण रुपेण दक्षः भवेत्। तस्य उच्चारणं सम्यक् स्यात्। तस्य लेखनं स्पष्टं शुद्धं च स्यात्।

२. **संस्कृतसाहित्यस्य ज्ञानम् :-**

संस्कृतसाहित्यं विशालमस्ति। न कोऽपि जनः सर्वशास्त्रपारङ्गतः भवति। तथापि व्यापकसंस्कृत साहित्यस्य विविधविधानां विपुलः परिचयः अपेक्षितः। सर्वेषां ग्रन्थानां विषये ग्रन्थलेखकानां विषये च पर्याप्तं ज्ञानं स्यात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३. **सांस्कृतिकचेतना :-**

भारतस्य संस्कृतिः संस्कृताश्रिता विद्यते। अतः संस्कृतशिक्षकाः भारतीयसंस्कृति विषये रुचिमन्तः श्रद्धावन्तश्च भवेयुः। भाविसन्ततीनां प्रति भारतीयसंस्कृति सम्प्रेषणे एते एव अग्रदूताः। सर्वेऽपि संस्कृतशिक्षकाः स्वतः सांस्कृतिक दूताः सन्ति। (Voluntary cultural Ambassaders)।

४. **कुशलसम्प्रेषकः :-**

सम्प्रेषणाधारेणैव प्रभावपूर्णं शिक्षणं भवति। सर्वं ज्ञात्वाऽपि सम्प्रेषणकौशलाभावे अध्यापकाः छात्रान् सम्यक्बोधयितुं न शक्नुवन्ति। कालिदासेन मालविकाग्निमित्रे सुष्ठु प्रतिपादितम्–

शिलष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव।। १.१६।। मालविकाग्निमित्रम्

कस्यचिद् सम्पूर्ण ज्ञानम् आत्मस्थितं, तस्य हृदि एव तिष्ठति, अपरस्य कस्यचिद् अन्यस्य संक्रान्तिरूपः विशेषगुणः भवति। परं यस्य सम्पूर्ण ज्ञानं, सम्यक् संक्रमणकौशलं च उभयमपि भवति सः शिक्षकः शिक्षकाणां धुरिः भवति, प्रमुखः भवति इति वा।

५. **कुशल अभिप्रेरकः :-**

संस्कृतशिक्षकः स्वयं संस्कृतभाषायां रुचिमान् भवेत्। स्वकीय रोचकभाषणकौशलेन सर्वान् अपि छात्रान् संस्कृताध्ययनं प्रति सम्यक् अभिप्रेरयेत्। सम्यक् अभिप्रेरकः अध्यापकः एव उत्तमाध्यापकः भवति।

"A bad teacher quarrels, the good teacher explains, better teacher illustrates, the best teacher inspires."

सम्यक् अभिप्रेरिताः छात्राः स्वयं संस्कृताध्ययने प्रवृताः भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६. **नूतनविधीनां ज्ञानम् :-**

शिक्षाक्षेत्रे अनुदिनं मनोवैज्ञानिकप्रयोगाः प्रचलन्ति। तदनुगुणं छात्राणां बोधनाय नूतनविधीनां प्रणयनं भवति। संस्कृतशिक्षकः संस्कृतशिक्षणे प्रयुज्यमानानां विधीनां विषये तेषां प्रयोगविषये च सम्यक् ज्ञानं धारयेत।

७. **वैज्ञानिकदृष्टिः :-**

संस्कृतशिक्षकस्य चिन्तनं वैज्ञानिकमपि भवेत्। संस्कृतभाषायाः व्याकरणं वैज्ञानिकं क्रमबद्धमस्ति। अतः संगणके अस्य प्रयोगः कर्तुं शक्यते। अथ च संस्कृतग्रन्थेषु बहवः वैज्ञानिकविषयाः वर्णिताः सन्ति। एतेषां विषये नूतनम् अनुसन्धानकार्यम् अपेक्षितम्। अस्मिन् कर्मणि संस्कृतशिक्षकस्य प्रवृत्तिः भवेत्।

८. **अन्यविषयाणां ज्ञाता :-**

अद्य शिक्षा केवलं संस्कृतनिष्ठा नास्ति, अपितु विद्यालये अन्ये बहवः विषयाः पाठ्यन्ते। संस्कृतशिक्षकः कूपमण्डूकवत् न स्यात्। सः अन्यविषयाणाम् अपि सामान्यज्ञानं स्थापयेत्। येन आवश्यकतानुगुणं छात्रान् अन्यविषयेषु अपि प्रेरयितुं शक्नोति। अथ च अन्यविषयाध्यापकैः सह सामञ्जस्यपूर्णं व्यवहारं कर्तुं शक्नोति।

९. **कुशलाभिनेता :-**

संस्कृतशिक्षकः हास्यप्रियः, लास्यप्रियः, गानकुशलः, क्रीडाकुशलः, अभिनयकुशलश्च भवेत्। एतादृशः सर्वगुणसम्पन्नः शिक्षकः सर्वान् छात्रान् रञ्जयितुं शक्नोति।

१०. **निष्पक्षव्यवहारः :-**

अन्याध्यापकैः सह छात्रैः सह च निष्पक्षव्यवहारः संस्कृतशिक्षकस्य अपेक्षितः गुणः।

११. **सृजनात्मकता :-**

संस्कृतशिक्षकः साहित्यसृजनकौशलसम्पन्नः भवेत्। अनेन संस्कृतसाहित्यस्य संवर्धनं भवति छात्राः अपि तदर्थं प्रेरिताः भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१२. **संस्कृतप्रचारे रुचिः :-**

संस्कृतशिक्षकः सम्पूर्णेसमाजे संस्कृतस्य प्रचारे–प्रसारे च रूचिं प्रदर्शयेत् तदर्थं सरलसंस्कृतव्यवहारेण, समाजे संस्कृतनिष्ठकार्यक्रमाणाम् आयोजनेन च छात्रान् अपि संस्कृतप्रचारार्थं प्रेरयितुं शक्नोति। अनेनैव संस्कृतस्य संरक्षणं भविष्यति।

श्लिष्टा क्रिया कस्यचिदात्म संस्था
संक्रान्तिरन्यस्य विशेषयुक्ता
यस्योभयं साधु स शिक्षकाणां
धुरिप्रतिष्ठापयितव्य एव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यवहार-संस्कृतम्

प्रथमा इकाई

मम	मेरा	भवतः(पुं.)	आपका	भवान् (पुं.)	आप
अहम्	मैं	भवत्याः(स्त्री)	आपका	भवती (स्त्री)	आप

	निकटे		दूरे
एषः (पुं.)	यह	सः	वह (पुं.)
एषा (स्त्री)	यह	सा	वह (स्त्री)
एतत् (नपुं.)	यह	तत्	वह (नपुं.)

परिचयस्य प्रथमः प्रकारः (सर्वैः सह संस्कृतेन सम्भाषणम्)

मम नाम रमेशचन्द्रः।	मेरा नाम रमेशचन्द्र है।	..... नाम कौशलः।
भवतः नाम किम् ?	आपका नाम क्या है ?	..... नाम किम् ?
मम नाम श्रीकान्तः।	मेरा नाम श्रीकान्त है।	मम नाम .....
भवत्याः नाम किम् ?	आपका नाम क्या है ?	..... नाम किम् ?
मम नाम रेखा।	मेरा नाम रेखा है।	भवत्याः नाम .....
मम नाम मोहनः।	भवतः नाम किम्? (पुं.)	मम नाम .....
मम नाम निवेदिता।	भवत्याः नाम किम्? (स्त्री)	मम ..... निवेदिता।

परिचयस्य द्वितीयः प्रकारः (प्रश्नोत्तर-माध्यमेन वार्तालापः)

अहं सुरेशः	मैं सुरेश हूँ।	अहं .....।
भवान् कः ?	आप कौन हैं?	भवान् .....?
अहं दिलीपः।	मैं दिलीप हूँ।	.....रजनी
अहं रजनी।	मैं रजनी हूँ।	भवती ..... ?
भवती का ?	आप कौन हैं ?	.....का?
अहं साधना।	मैं साधना हूँ।	अहं .....।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अहं दिनेशः।	भवान् कः ? (पुं.)
अहं सीता।	भवती का ? (स्त्री)
अहं नरेन्द्रः।	अहम् अल्पना।

शब्दानां प्रयोगः (सङ्केतमाध्यमेन वाक्यानाम् अनुकरणम्)

एषः कः? (पुं.) **निकटे**	यह कौन है ?	..... कः ?
एषः नरेशः।	यह नरेश है।	एषः .....?
सः कः ? **(दूर)**	वह कौन है ?	..... राजेन्द्र।
सः राजकुमारः।	वह राजकुमार है।	एषा .....का ?
एषा का ? (स्त्री)	यह कौन है ?	सः ..... ?
एषा राधा।	यह राधा है।	सा .....।
सा का ?	वह कौन है ?	एतत् .....।
सा गीता।	वह गीता है।	..... किम्?
एतत् किम ? (नपुं.)	यह क्या है ?	
एतत् पत्रम्।	यह पत्र है।	
तत् किम् ?	वह क्या है ?	
तत् पुष्पम्।	वह फूल है।	

पु.	एतस्य	इसका	तस्य	उसका	कस्य	किसका
स्त्री	एतस्याः	इसका	तस्याः	उसका	कस्याः	किसका

षष्ठी-विभक्ति

(प्रश्नोत्तर-माध्यमेन सम्भाषणं करणीयम्)

सम्भाषण पद्धति में षष्ठी विभक्ति इसका, इसकी, इसके, उसका, उसकी, उसके आदि का प्रयोग प्रारम्भ में संस्कृत में संभाषण करना सरल हो जाता है। चित्रों व संकेतों के माध्यम से निम्नलिखित प्रयोगों का अभ्यास करें :–

एतस्य	नाम श्यामः।	इसका नाम श्याम है।	एतस्य नाम .....।
एतस्य	नाम किम् ?	इसका नाम क्या है ?	एतस्याः नाम .....।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतस्य	नाम विवेकः।	इसका नाम विवेक है।	तस्याः नाम .....।
एतस्य	नाम गोपालः।	इसका नाम गोपाल है।	..... नाम किम् ?
तस्य	नाम किम् ?	उसका नाम क्या है ?	..... नाम सुरेन्द्रः ?
तस्य	नाम सुरेन्द्रः।	उसका नाम सुरेन्द्र है।	..... नाम नलिनी ?
कस्य	नाम कमलः ?	किसका नाम कमल है ?	कस्य नाम ..... ?
तस्य	नाम कमलः।	उसका नाम कमल है।	कस्याः नाम ..... ?
एतस्याः	नाम रमा।	इसका नाम रमा है।	
एतस्याः	नाम किम् ?	इसका नाम क्या है ?	
एतस्याः	नाम उमा।	इसका नाम उषा है।	
एतस्याः	नाम वीणा।	इसका नाम वीणा है।	
तस्याः	नाम किम् ?	उसका नाम क्या है ?	
तस्याः	नाम शारदा।	उसका नाम शारदा है।	
कस्याः	नाम राधा ?	किसका नाम राधा है ?	
तस्याः	नाम राधा।	उसका नाम राधा है।	
एतस्याः	नाम राधा।	इसका नाम राधा है।	

एतस्य मन्दिरस्य नाम महाकालेश्वर–मन्दिरम्।

इस मन्दिर का नाम महाकालेश्वर मन्दिर है।

एतस्य वाहनस्य नाम प्रिया–स्कूटर–वाहनम्।

इस वाहन का नाम प्रिया स्कूटर है।

एतस्य नगरस्य नाम उज्जयिनी नगरम्।

इस नगर का नाम उज्जयिनी है।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभ्यासार्थम्

कस्य नाम भरतः ?	किसका नाम भरत है ?
दुष्यन्तपुत्रस्य नाम भरतः ।	दुष्यन्त के पुत्र का नाम भरत है।
कस्य नाम रामचन्द्रः ?	किसका नाम रामचन्द्र है ?
दशरथस्य ज्येष्ठपुत्रस्य नाम रामचन्द्रः।	दशरथ के बड़े पुत्र का नाम रामचन्द्र है।
कस्य नाम स्वामी विवेकानन्दः ?	किसका नाम स्वामी विवेकानन्द है ?
एकस्य महापुरुषस्य नाम स्वामी विवेकानन्दः।	एक महापुरुष का नाम स्वामी विवेकानन्द है।
कस्य नाम स्वामी दयानन्दः ?	किसका नाम स्वामी दयानन्द है ?
आर्य समाज संस्थापकस्य नाम स्वामी दयानन्दः।	आर्य समाज के संस्थापक का नाम स्वामी दयानन्द है।
कस्याः नाम सीता?	किसका नाम सीता है?
राम की पत्नी का नाम सीता है।	रामस्य पत्न्याः नाम सीता।
उमायाः पतिः कः?	उमा का पति कौन है?
उमायाः पतिः शंकरः।	उमा का पति शंकर है।
शङ्करस्य पत्नी का ?	शङ्कर की पत्नी कौन है ?
रामायणलेखकस्य नाम किम् ?	रामायण के लेखक का नाम क्या है ?

लिङ्ग परिचय

पुंल्लिङ्गशब्दाः	स्त्रीलिङ्गशब्दाः	नपुंसकलिङ्गशब्दाः
बालकः	बालिका	ज्ञानम्
विद्यालयः	शकुन्तला	पत्रम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहोदरः	लेखनी	दुग्धम्
रामः	सीता	जलम्
कृष्णः	राधा	पात्रम्
श्रीकान्तः	रमा	वस्त्रम्
विवेकः	प्रियंका	भवनम्
ग्रामः	पाठशाला	गृहम्
अध्यापकः	कल्पना	नगरम्
जनकः	सरस्वती	व्यजनम्
अनुजः	जननी	पुष्पम्
अग्रजः	वाणी	कङ्कणम्
पुत्रः	रेखा	वाहनम्
कार्यालयः	पार्वती	नेत्रम्
छात्रः	पत्रिका	पुस्तकम्
एषः, सः, कः ?	एषा, सा, का ?	एतत्, तत्, किम् ?

उदाहरणम्

एषः बालकः।	सः सुलभः।	कः दिलीपः ?
एषा माता।	सा पाठशाला।	का सरस्वती ?
एतत् पत्रम्।	तत् व्यजनम्।	किं चित्रम् ?

अस्मि (हूँ) (स्थानपूर्तिः करणीया)

अहं रमेशः अस्मि।	मैं रमेश हूँ।	..... देवदत्तः अस्मि।
अहं कृषकः अस्मि।	मैं किसान हूँ।	अहं वैज्ञानिकः .....
अहं भारतीयः अस्मि।	मैं भारतीय हूँ।	अहं ..... अस्मि।
अहं पाण्डेयः अस्मि।	मैं पाण्डेय हूँ।	..... मध्यप्रदेशीयः
अहम् अभियान्त्रिकः अस्मि।	मैं इंजीनियर हूँ।	मालवीयः कः अस्ति ?
अहं मध्यप्रदेशीयः अस्मि।	मैं मध्यप्रदेशीय हूँ।	मालवीयः ..... अस्मि ।
अहं मालवीयः अस्मि।	मैं मालवीय हूँ।	अहं अध्यापकः ..... ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शब्द - सङ्ग्रह

सुफेनकम्	साबुन	प्राङ्गणम्	आँगन
दन्तफेनकम्	टूथपेस्ट	आन्दोलनम्	आंदोलन/हिलना
व्यजनम्	पंखा	आकर्षणम्	आकर्षण
कृष्णफलकम्	श्यामपट्टे	अद्यपर्यन्तम्	आज तक
आम्रफलम्	आम	अङ्गुलीयकम्	अंगूठी
स्यूतः	थैला	अनुमानम्	अंदाज
युतकम्	कमीज	स्थाप्यम्	अमानत
उरुकम्	पेण्ट	कपाटिका	अलमारी
कङ्कतम्	कङ्घा	पिष्टम्	आटा
दर्पणम्	दर्पण	झञ्झावातः	आँधी
करवस्त्रम्	रुमाल	आलुकम्	आलू
अन्तर्युतकम्	बनियान	आच्छादनम्	ओढ़ना/ढकना
सुवासकम्	पावडर	स्थानम्	स्टेशन
घटिका	घड़ी	क्षौरम्	हजामत
छत्रम्	छाता	यानपेटिका	बैग
अग्निपेटिका	माचिस	संशीतकः	कूलर
अग्निशलाका	काड़ी	करांशुकम्	कुर्ता
शाटिका	साड़ी	पादांशुकम्	पजामा
कुञ्चिका	चाबी	परिवर्तनम्	हेरफेर
कीलिका	कील	सज्जीकरणम्	सजाना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चषकः	गिलास	दिनदर्शिका	कैलेण्डर
उपनेत्रम्	चश्मा	दिनाङ्कदर्शकम्	–''–

क्रियापदानि, वर्तमानकालः

एकवचनम्

उदाहरणम् **अन्यपुरुषः** राजेशः गच्छति। सीता गच्छति।
वाहनं गच्छति।

उत्तमपुरुषः अहं गच्छामि।
अहं पठामि।

अन्यपुरुषः	**एकवचनम्**	**क्रिया-पदानि**	**उत्तम-पुरुषः**
वादयति	बजाती है। बजाता है।	सा वादयति।	अहं वीणां वादयामि।
गच्छति	जाता है। जाती है।	सा गच्छति।	अहं गच्छामि।
सूचयति	सूचित करता/करती है।	एषः सूचयति।	अहं सूचयामि।
आगच्छति	आता/आती है।	जितेन्द्रः आगच्छति।	अहम् आगच्छामि।
उपविशति	बैठता/बैठती है।	सः उपविशति।	अहम् उपविशामि।
करोति	करता/करती है।	भवतः अनुजः किं करोति?	अहं करोमि।
पठति	पढ़ता/पढ़ती है।	एषः पठति।	अहं पठामि।
लिखति	लिखता/लिखती है।	कः लिखति?	अहं लिखामि।
खादति	खाता/खाती है।	रेखा खादति।	अहं खादामि।
गायति	गाता/गाती है।	रमा गायति।	अहं गायामि।
हसति	हँसता/हँसती है।	सः हसति।	अहं हसामि।
पिबति	पीता/पीती है।	राहुलः पिबति।	अहं पिबामि।
धावति	दौड़ता/दौड़ती है।	एषः धावति।	अहं धावामि।
क्रीडति	खेलता/खेलती है।	भवान् कुत्र क्रीडति?	अहं क्रीडामि।
पतति	गिरता/गिरती है।	तत् पतति।	अहं पतामि।
क्षिपति	फेंकता/फेंकती है।	सा क्षिपति।	अहं क्षिपामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्रमति	भ्रमण करता/करती है।	भिक्षुकः भ्रमति।	अहं भ्रमामि।
आनयति	लाता/लाती है।	मम माता आनयति।	अहम् आनयामि।
नयति	ले जाता/जाती है।	मम अनुजः नयति।	अहं नयामि।
ददाति	देता/देती है।	धनिकः ददाति।	अहं ददामि।
तिष्ठति	ठहरता/ठहरती है।	बालिका तिष्ठति।	अहं तिष्ठामि।
उत्तिष्ठति	खड़ा होता/होती है।	सा उत्तिष्ठति।	अहम् उत्तिष्ठामि।
पश्यति	देखता/देखती है।	सः पश्यति।	अहं पश्यामि।
दर्शयति	दिखाता/दिखाती है।	एषा दर्शयति।	अहं दर्शयामि।
शृणोति	सुनता/सुनती है।	भवती किं शृणोति।	अहं शृणोमि।
स्पृशति	छूता/छूती है।	राधा स्पृशति।	अहं स्पृशामि।
वदति	बोलता/बोलती है।	सा वदति।	अहं वदामि।
प्रेषयति	भेजती है/भेजता है।	सा प्रेषयति।	अहं प्रेषयामि।
चोरयति	चुराता है।	सः चोरयति।	अहं चोरयामि।
स्वीकरोति	स्वीकार करता है।	भिक्षुकः स्वीकरोति।	अहं स्वीकरोमि।
स्थापयति	रखती है।	सा स्थापयति।	अहं स्थापयामि।
त्यजति	छोड़ता है।	सः त्यजति।	अहं त्यजामि।
उद्घाटयति	खोलती है।	सा उद्घाटयति।	अहम् उद्घाटयामि।
पिदधाति	बन्द करता है।	सः पिदधाति।	अहं पिदधामि।
प्रक्षालयति	धोता है।	रजकः प्रक्षालयति।	अहं प्रक्षालयामि।
प्रज्ज्वालयति	जलाती है।	गृहिणी प्रज्ज्वालयति।	अहं प्रज्ज्वालयामि।
भवति	होता है।	सः हर्षितः भवति।	अहं हर्षितः भवामि।
अस्ति	है।	सः दुःखितः अस्ति।	अहम् अस्मि।
शक्नोति	सकती है/सकता है।	सा गन्तुं शक्नोति।	अहं गन्तुं शक्नोमि।
वसति	रहता है/रहती है।	सः कुत्र वसति।	अहं वसामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इच्छति	इच्छा करता है/करती है।	भिक्षुकः इच्छति।	अहम् इच्छामि।
क्रीडति	खेलता है/खेलती है।	बालकः क्रीडति।	अहं क्रीडामि।
पीडयति	कष्ट देता है/देती है।	सः पीडयति।	अहं पीडयामि।
ताडयति	मारता है/मारती है।	पिता ताडयति।	अहं ताडयामि।
जानाति	जानता है/जानती है।	कः संस्कृतं जानाति।	अहं जानामि।
चिन्तयति	चिन्ता करता है/करती है।	भवती किं चिन्तयति।	चिन्तयामि।

संस्कृते लिङ्गानुसारेण क्रियापरिवर्तनं न भवति। यथा रामः गच्छति। सीता गच्छति। बालकः अस्ति। बालिका अस्ति। वाहनम् अस्ति।

मध्यमपुरुष - स्थाने सरलप्रयोगः

व्यवहारदृष्ट्या प्रारम्भे युष्मद् शब्दस्य स्थाने भवत् शब्दस्य प्रयोगः सरलः उचितश्च। अत्र भवत् शब्दयोगे अन्यपुरुषक्रियाप्रयोगः सरलः।

यथाः- त्वं गच्छसि इत्यस्य स्थाने भवान् गच्छति। भवती गच्छति। एषः प्रयोगः सुकरः।

क्रियापद-संयोजनम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	एषः/सः – गच्छति	एतौ/तौ – गच्छतः	एते/ते – गच्छन्ति
मध्यमपुरुषः	त्वं – गच्छसि	युवां – गच्छथः	यूयं – गच्छथ
उत्तमपुरुषः	अहं – गच्छामि	आवां – गच्छावः	वयं – गच्छामः

द्विवचन - स्थाने सरलप्रयोगः

व्यवहारदृष्ट्या संस्कृत–संभाषणं सरलं भवतु एतदर्थं पारम्परिकद्विवचनस्थाने द्वयम् इति प्रयोगः। यथा–'बालकौ स्तः' स्थाने 'बालकद्वयम् अस्ति' पुस्तकद्वयम् अस्ति' इति कर्तुं शक्यते। तदनन्तरं द्विवचनस्य अभ्यासः करणीयः। पुरुषद्वयम् गच्छति। बालिकाद्वयम् पठति। ईदृशानि अनेकवाक्यानि रचितव्यानि।

यदि 'द्वयं', 'त्रयं', 'चतुष्टयम्' इत्यस्य प्रयोगं कुर्मः तदा क्रिया एकवचने भवति यथा 'जनत्रयं गच्छति'।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीया इकाई

एकवचनतः बहुवचनम्

पुंल्लिङ्गे -

पुरुषः – पुरुषाः, सः – ते, एषः – एते, कः – के, भवान् – भवन्तः,

स्त्रीलिङ्गे -

स्त्री – स्त्रियः, सा – ताः, एषा – एताः, का – काः, भवती – भवत्यः,

नपुं.लिङ्गे -

वाहनम् – वाहनानि, तत् – तानि, एतत् – एतानि, किम् – कानि, पत्रम् – पत्राणि,

गच्छति – गच्छन्ति, अहम् – वयम्, गच्छामि – गच्छामः

वर्तमान - कालः

क्रिया पदानि

अन्यपुरुषः	बहुवचनम् (अन्यस्य कृते/अन्य के लिये)		उत्तम पुरुषः (हम के लिये)
भ्रमन्ति	भ्रमण करते हैं	के बालकाः भ्रमन्ति?	वयं भ्रमामः।
गच्छन्ति	जाते हैं	छात्रः विद्यालयं गच्छन्ति।	वयं विद्यालयं गच्छामः।
आगच्छन्ति	आते हैं	ते स्वदेशम् आगच्छन्ति।	वयं स्वदेशम् आगच्छामः।
उपविशन्ति	बैठते हैं	काः तत्र उपविशन्ति?	वयम् उपविशामः।
मिलन्ति	मिलते हैं	मित्राणि मिलन्ति।	वयं मिलामः।
कुर्वन्ति	करते हैं	एते कार्यं कुर्वन्ति।	वयं कार्यं कुर्मः।
पठन्ति	पढ़ते हैं	एते पुस्तकं पठन्ति।	वयं पुस्तकं पठामः।
लिखन्ति	लिखते हैं	के पत्रं लिखन्ति?	वयं पत्रं लिखामः।
चलन्ति	चलते हैं	एताः चलन्ति।	वयं चलामः।
खादन्ति	खाते हैं	स्त्रियः फलं खादन्ति।	वयं फलं खादामः।
गायन्ति	गाते हैं	भवत्यः गीतं गायन्ति।	वयं गीतं गायामः।
हसन्ति	हंसते हैं	भवन्तः हसन्ति।	वयं हसामः।
पिबन्ति	पीते हैं	ताः दुग्धं पिबन्ति।	वयं दुग्धं पिबामः।
धावन्ति	दौड़ते हैं	काः धावन्ति?	वयं धावामः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रीडन्ति	खेलते हैं	बालिकाः क्रीडन्ति।	वयं क्रीडामः।
पतन्ति	गिरते हैं	तानि पुस्तकानि पतन्ति।	वयं पतामः।
क्षिपन्ति	फेंकते हैं	ते पत्रं क्षिपन्ति।	वयं पत्रं क्षिपामः।
आनयन्ति	लाते हैं	स्त्रियः जलम् आनयन्ति।	वयं जलम् आनयामः।
नयन्ति	ले जाते हैं	बालिकाः फलानि नयन्ति।	वयं नयामः।
ददति	देते हैं	ते धनं ददति।	वयं धनं दद्मः।
तिष्ठन्ति	ठहरते हैं	बालकाः तिष्ठन्ति।	वयं तिष्ठामः।
उत्तिष्ठन्ति	खड़े होते हैं	बालिकाः उत्तिष्ठन्ति।	वयम् उत्तिष्ठामः।
पश्यन्ति	देखते हैं	ताः चलचित्रं पश्यन्ति।	वयं चलचित्रं पश्यामः।
दर्शयन्ति	दिखाते हैं	प्रेक्षालयाः चलचित्रं दर्शयन्ति	वयं चलचित्रं दर्शयामः।
वदन्ति	बोलते हैं	ते असत्यं वदन्ति।	वयं सत्यं वदामः।
स्थापयन्ति	रखते हैं	एते पुस्तकं स्थापयन्ति।	वयं पुस्तकं स्थापयामः।
स्वीकुर्वन्ति	लेते हैं	भिक्षुकाः दानं स्वीकुर्वन्ति।	वयं दानं स्वीकुर्मः।
त्यजन्ति	छोड़ते हैं	ते सदाचारं त्यजन्ति।	वयं सदाचारं त्यजामः।
प्रज्ज्वालयन्ति	जलाते हैं	काः दीपं प्रज्ज्वालयन्ति?	वयं दीपं प्रज्ज्वालयामः।
निर्वापयन्ति	बुझाते हैं	के दीपं निर्वापयन्ति?	वयं दीपं निर्वापयामः।
उद्घाटयन्ति	खोलते हैं	के द्वारम् उद्घाटयन्ति?	वयं द्वारम् उद्घाटयामः।
इच्छन्ति	इच्छा करते हैं	भवत्यः किम् इच्छन्ति?	वयं किमपि न इच्छामः।
शक्नुवन्ति	सकते हैं	एते कार्यं कर्तुं शक्नुवन्ति।	वयं कार्यं कर्तुं शक्नुमः।
भवन्ति	होते हैं	कार्याणि भवन्ति।	वयं भवामः।
पीडयन्ति	कष्ट देते हैं	आतंकवादिनः पीडयन्ति।	वयं पीडयामः।
ताडयन्ति	पीटते हैं	शिक्षकाः छात्रान् ताडयन्ति।	वयं ताडयामः।
प्रेषयन्ति	भेजते हैं	बालकाः पत्रं प्रेषयन्ति।	वयं प्रेषयामः।
चोरयन्ति	चुराते हैं	चौराः धनं चोरयन्ति।	वयं धनं चोरयामः।
पृच्छन्ति	पूछते है	आचार्याः प्रश्नं पृच्छन्ति।	वयं प्रश्नं पृच्छामः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूचयन्ति	सूचित करते हैं	एताः किं सूचयन्ति?	वयं सूचनां सूचयामः।
चिन्तयन्ति	चिन्ता करते हैं	ताः किं चिन्तयन्ति	वयं किं चिन्तयामः।
प्रक्षालयन्ति	धोते हैं	स्त्रियः वस्त्रं प्रक्षालयन्ति।	वयं वस्त्रं प्रक्षालयामः।

अभ्यासार्थम्

दशरथस्य पुत्रः कः?भवत्याः प्रदेशस्य नाम किम्?

दशरथस्य पुत्रः रामः।

मम विद्यालयस्य नाम विद्यामन्दिरम्।

भवतः गृहस्य नाम किम्?

मम गृहस्य नाम; अभिवादनम्।

भवतः प्रदेशस्य नाम किम्?

मम प्रदेशस्य नाम; मध्यप्रदेशः।

मम नाम रमा; अहं गृहिणी।

मम नाम अल्पना; अहं छात्र

मम प्रदेशस्य नाम उत्तरप्रदेशः।

मम नगरस्य नाम उज्जयिनी।

भवत्याः/भवतः नगरस्य नाम किम्?

मम नगरस्य नाम मीनाक्षीपुरम्।

पार्वत्याः पुत्रस्य नाम गणेशः।

यशोदायाः पुत्रस्य नाम किम्?

मम नाम पीटर; अहम् अमेरिकादेशीयः।

मम नाम अतुलः; अहं लिपिकः।

सप्तमी - विभक्ति

सप्तमी विभक्ति का प्रयोग विद्यालय में, पुस्तक में, मेज पर आदि इस प्रकार के वाक्यों में किया जाता है :–

नगरे	गङ्गायाम्	भोपाले	नद्याम्
गृहे	क्षिप्रायाम्	महाभारते	कश्याम्
ग्रामे	गीतायाम्	विद्यालये	उज्जयिन्याम्
मन्दिरे	नर्मदायाम्	जाबालिपुरे	वीणायाम्

अभ्यासार्थम्

उज्जयिन्यां महाकालेश्वरस्य मन्दिरम् अस्ति।

गङ्गायां जनाः स्नानं कुर्वन्ति।

मम गृहे एकः देवालयः अस्ति।

नर्मदायां विपुलं जलम् अस्ति।

अभ्यास प्रश्नाः

काशीहिन्दू विश्वविद्यालयः कुत्र अस्ति?

काशीहिन्दू विश्वविद्यालयः वाराणस्याम् अस्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्तरप्रदेशे ताजभवनं कुत्र अस्ति?

उत्तरप्रदेशे ताजभवनम् आगरानगरे अस्ति।

भारते भोपालनगरं कुत्र अस्ति?

भारते भोपालनगरं मध्यप्रदेशे अस्ति।

मध्यप्रदेशे भारतभवनं कुत्र अस्ति?

मध्यप्रदेशे भारतभवनं भोपालनगरे अस्ति।

मध्यप्रदेशे कालिदास–समारोहः कुत्र भवति?

मध्यप्रदेशे कालिदास–समारोहः उज्जयिन्यां भवति।

वा (या) विकल्पार्थे

भवती गच्छति वा?	आप जा रहीं है या नहीं?
सा जानाति वा?	वह जानती है या नहीं?
भवान् भोजनं करोति वा?	आप भोजन कर रहे हैं या नहीं ?

किल ? निश्चयात्मक

भवान् पाठयति किल?	आप पढ़ा रहे हैं न?
भवती पठति किल?	आप पढ़ रही हैं न?
भवन्तः आगच्छन्ति किल?	आप आ रहे हैं न?

सन्ति (वे) हैं

ते बालकाः सन्ति।	वे बालक हैं।
ताः स्त्रियः सन्ति।	वे स्त्रियाँ हैं।
तानि पुस्तकानि सन्ति।	वे पुस्तकें हैं।
एते कृषकाः सन्ति।	ये कृषक हैं।
एताः बालिकाः सन्ति।	ये बालिकाएँ हैं।
एतानि पुष्पाणि सन्ति।	ये पुष्प हैं।
ते युवकाः सन्ति।	वे युवक हैं।

स्मः (हम) हैं

वयं छात्राः स्मः।	हम छात्र हैं।
वयं मालवीयाः स्मः।	हम मालवीय हैं।
वयं मध्यप्रदेशीयाः स्मः।	हम मध्यप्रदेशीय हैं।
वयं भारतीयाः स्मः।	हम भारतीय हैं।
वयं स्त्रियः स्मः।	हम महिलाएँ हैं।
वयं पुरुषाः स्मः।	हम पुरुष हैं।
वयं बालिकाः स्मः।	हम बालिकाएँ हैं।

आम् = हाँ

आम्, अहं जानामि।	हाँ, मैं जानता हूँ।	..... अहं जानामि।
आम्, सः अध्यापकः अस्ति।	हाँ, वह अध्यापक है।	आम् .....जानामि।
आम्, अहं भोजनं करोमि।	हाँ, मैं भोजन करती हूँ।	आम् सः ..... अस्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न = नहीं

न, अहं न जानामि।	नहीं, मैं नहीं जानती हूँ।	..... अहं जानामि।
न, अहं न पठामि।	नहीं, मैं नहीं पढ़ती हूँ।	न अहं, न ..... ।

पर्याप्तम् = पर्याप्त

पर्याप्तं भोजनम् अस्ति।	पर्याप्त भोजन है।	पर्याप्तम् अस्ति।
पर्याप्तं धनम् अस्ति।	पर्याप्त धन है।	कार्यम् अस्ति।
पर्याप्तं जलम् अस्ति।	पर्याप्त जल है।	पर्याप्तं दुग्धम्।
पर्याप्तं ..... पर्याप्तम्।	बस.....बस.....बस।	

धन्यवादाः = धन्यवाद अत्र आगमनस्य कृते बहुधन्यवादः।

चायं स्वीकरोतु ..... धन्यवादाः ..... स्वागतम्। कृपया फलं स्वीकरोतु।

मास्तु=आवश्यक नहीं

जलम् – आवश्यकं वा?	मास्तु.....मास्तु। (नहीं)	मास्तु, त्यजतु।
चिन्ता मास्तु	चिन्ता मत करो।	मास्तु, पर्याप्तम्।

क्षम्यताम् = क्षमा कीजिये

क्षम्यताम्, मम समीपे धनं नास्ति।	क्षमा कीजिये, मेरे पास पैसे नहीं हैं।
चिन्ता मास्तु।	चिन्ता मत कीजिये।

कृपया

कृपया दशरुप्यकाणि ददातु।	कृपया दस रुपये दीजिये।
क्षम्यताम्, मम समीपे न सन्ति।	क्षमा कीजिये, मेरे पास नहीं है।
चिन्ता मास्तु।	कोई बात नहीं। (चिन्ता मत करो)

प्रतिदिनम् = प्रतिदिन अहं ..... पठामि।

प्रतिदिनम् अहं रामायणं पठामि।	मैं प्रतिदिन रामायण पढ़ता हूँ।
प्रतिदिनम् अहं विद्यालयं गच्छामि।	मैं प्रतिदिन विद्यालय जाता हूँ।
प्रतिदिनं सः फलं खादति।	वह प्रतिदिन फल खाता है।
अहं प्रतिदिनं दुग्धं पिबामि।	मैं प्रतिदिन दूध पीता हूँ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शब्द-रूपम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
कर्ता	देवः(देव ने)	देवौ (दो देवों ने)	देवाः (देवों ने)
कर्म	देवम् (देव को)	देवौ (दो देवों को)	देवान् (देवों को)
करण	देवेन (देव से, के द्वारा)	देवाभ्याम् (दो देवों के द्वारा)	देवैः (देवों से+द्वारा)
सम्प्रदानम्	देवाय (देव के लिए)	देवाभ्याम् (दो देवों के लिए)	देवेभ्यः (देवों को, के लिए)
अपादानम्	देवात् (देव से)	देवाभ्याम् (दो देवों से)	देवेभ्यः (देवों से)
सम्बन्धम्	देवस्य (देव का,के,की)	देवयोः (दो देवों का, की, के)	देवानाम् (देवों का,के,की)
अधिकरणम्	देवे (देव में, पर)	देवयोः (दो देवों में, पर)	देवेषु (देवों में, पर)
सम्बोधनम्	हे देव!	हे देवौ!	हे देवाः!

तृतीया इकाई

भूतकालः

	पुंल्लिङ्गशब्दाः				स्त्रीलिङ्गशब्दाः		
	एकवचनम्	द्विव.	बहुवचनम्		एकवचनम्	द्विव.	बहुवचनम्
अन्य– (तद्) पुरुषः	सः	तौ	ते	अन्य–(तद्) पुरुषः	सा	ते	ताः
(एतद्)	एषः	एतौ	एते	(एतद्)	एषा	एते	एताः
(किम्)	कः	कौ	के	(किम्)	का	के	काः
(भवत्)	भवान्	भवन्तौ	भवन्तः	(भवत्)	भवती	भवत्यौ	भवत्यः
(राम)	रामः	रामौ	रामाः	(बालिका)	बालिका	बालिके	बालिकाः
मध्यम (युष्मद्) पुरुषः	त्वं	युवां	यूयम्	मध्यम–पु.	त्वम्	युवाम्	यूयम्
उत्तम पु. (अस्मद्)	अहं	आवाम्	वयम्	उत्तम–पु.	अहं	आवाम्	वयम्
क्रियापदानि	गतवान्	गतवन्तौ	गतवन्तः	क्रियापदानि	गतवती	गतवत्यौ	गतवत्यः
अद्य	आज	श्वः		आने वाला कल			

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परश्वः	परसों	ह्यः	बीता हुआ कल	
परह्यः	परसों	(बीता हुआ)	शनिवासरः	शनिवार
अद्य कः वासरः?		आज कौन वार है?	अद्य रविवासरः अस्ति।	आज रविवार है।
श्वः कः वासरः अस्ति?		कल कौन वार है?	श्वः सोमवासरः।	कल सोमवार है।
परश्वः कः वासरः अस्ति?		परसों कौन वार है?	परश्वः मङ्गलवासरः।	परसों मङ्गलवार है।

आसीत् = था

परह्यः कः वासरः आसीत्?	परसों कौन वार था? परह्यः शुक्रवासरः आसीत्।	परसों शुक्रवार था।
ह्यः कः वासरः आसीत्?	कल कौन वार था? ह्यः शनिवासरः आसीत्।	कल शनिवार था।

रविवासरः श्वः बुधवासरः परश्वः गुरुवासरः

सोमवासरः गुरुवासरः अद्य कः वासरः?

मङ्गलवासरः शुक्रवासरः अद्य मङ्गलवासरः।

पुंल्लिङ्गः

उदाहरण-वाक्यानि

एकवचनम्

गतसोमवासरे छात्रः आगतवान्।	पिछले सोमवार को छात्र आया।
गतमासे सः विदेशं गतवान्।	पिछले महीने वह विदेश गया।
गतमासे अहं पुस्तकम् आनीतवान्।	मैं पिछले महीने पुस्तक लाया।
ह्यः भवान् धनं दत्तवान्।	कल आपने धन दिया।
सः कुत्र गतवान्?	वह कहाँ गया?
कः संस्कृतं ज्ञातवान्?	किसने संस्कृत जानी?
अहं देवालयं दृष्टवान्।	मैंने देवालय देखा।

स्त्रीलिङ्गः

रेखा फलम् आनीतवती।	रेखा फल लाई।	रेखा किं आनीतवती ?
सा भोजनं कृतवती।	उसने भोजन किया।	सा किं कृतवती ?
का अत्र आगतवती?	कौन यहाँ आयी?	राधा किं आनीतवती ?
राधा जलम् आनीतवती।	राधा जल लाई।	कृपया उत्तरं वदन्तु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बहुवचनम् (पुंल्लिङ्गः)

अद्य प्रातः छात्राः आगतवन्तः।	आज प्रातःकाल छात्र आए।	अद्य प्रातः के आगतवन्तः ?
ते संस्कृतं पठितवन्तः।	उन्होंने संस्कृत पढ़ी।	के संस्कृतं पठितवन्तः ?
एते भोजनं कृतवन्तः।	इन्होंने भोजन किया।	एते किं कृतवन्तः ?
एते किं कृतवन्तः?	इन्होंने क्या किया?	वयं किं पीतवन्तः?
वयं जलं पीतवन्तः।	हम लोगों ने जल पिया।	उत्तरं वदन्तु।

भूतकाले प्रयोगः

बहुवचनम् (स्त्रीलिङ्गः)

ताः देवालयं गतवत्यः।	वे देवालय गयीं।	काः देवालयं गतवत्यः?	
एताः भोजनं कृतवत्यः।	इन (महिलाओं) ने भोजन किया?	काः भोजनं कृतवत्यः?	स्त्रियः
गीतं गीतवत्यः।	स्त्रियों ने गीत गाया।	स्त्रियः किं गीतवत्यः?	
भवत्यः किं कृतवत्यः?	आपने क्या किया?	कृपया उत्तरं वदन्तु।	

एकः(पुंल्लिङ्ग)	**एका(स्त्रीलिङ्ग)**	**एकम् (नपुंसकलिङ्ग)**
एकः पुरुषः।	एका बालिका।	एकं फलम्।
एकः छात्रः।	एका शाटिका।	एकं यानम्।

द्वयम् (दो)

वर्तमानकाले प्रयोगः

पुरुष-द्वयम्	**बालिका-द्वयम्**	**पत्र-द्वयम्**
बालकद्वयम् आगच्छति।	स्त्रीद्वयं पठति।	पत्रद्वयम् अस्ति।
दो बालक आते हैं।	दो स्त्रियाँ पढ़ती हैं।	दो पत्र हैं।

त्रयम् (तीन)

वानरत्रयम्	भगिनीत्रयम्	वाहनत्रयम्
वानरत्रयम् फलं खादति।	सखित्रयम् गीतं गायति।	वाहनत्रयम् अस्ति।

चतुष्टयम् (चार)

छात्रचतुष्टयम्	लेखनीचतुष्टयम्	मित्रचतुष्टयम्
छात्रचतुष्टयम् अस्ति।	बालिकाचतुष्टयम् अस्ति।	फलचतुष्टयम् अस्ति।
पञ्चछात्राः पठन्ति।	षट्बालिकाः सन्ति।	दशफलानि खादन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशेष :–द्वयम्,त्रयम्,चतुष्टयम् इत्यादि–योगे एकवचन–प्रयोगः एव भवति, अत्र लिङ्गकाठिन्यमपि न भवति।

इदानीम्	**इस समय**	
इदानीम् अहं गीतं गायामि।	इस समय मैं गीत गाता/गाती हूँ।	इदानीं लोकसभा न प्रचलति।
इदानीं कः समयः?	अभी क्या समय हुआ है?	इदानीं निर्वाचनं भवति।
इदानीम् अष्टवादनम्।	अभी आठ बजे हैं।	इदानीं वर्षा न भवति।
इदानीं द्विवादनं भवति।	अभी दो बज रहे हैं।	इदानीं परीक्षा प्रचलति।

कति	**कितने**
विद्यालये कति बालकाः पठन्ति?	विद्यालय में कितने बालक पढ़ते हैं?
कति युवकाः आगच्छन्ति?	कितने युवक आते हैं?
परिवारे कति सदस्याः सन्ति?	परिवार में कितने सदस्य हैं?

एकः बालकः। तस्य नाम करीमः। सः प्रतिग्रामं गच्छति। टोपिकाः विक्रीणति। सः एकदा एकं ग्रामं गच्छति। कतिपयाः टोपिकाः विक्रीणाति अनन्तरं सः अन्यं ग्रामं गच्छति। मार्गे अतिक्लान्तः भवति। सः एकस्मिन् वृक्षतले उपविशति। टोपिकानां पेटिका तत्रैव स्थापयति। तत्रैव करीमस्य कृते निद्रा आगच्छति। अनन्तरं तत्र वानराः आगच्छन्ति। वृक्षस्य उपरि कूर्दन्ति। ततः एकः वानरः वृक्षात् अवतरति करीमस्य निकटे आगच्छति। सः पेटिकां पश्यति तथा च पेटिकाम् उद्घाटयति। टोपिकाः पश्यति। अनन्तरम् एकां टोपिकां स्वीकरोति, मस्तके च धारयति। तदनन्तरं वृक्षम् आरोहति अन्ये वानराः वदन्ति अहो! भवान् अतिसुन्दरः। भवान् नृपः इव प्रतिभाति। अनन्तरं सः वानरः कथयति—यदि भवन्तः टोपिकाः इच्छन्ति तर्हि गच्छन्तु वृक्षतले, टोपिकाः सन्ति, ततः आनयन्तु। अनन्तरं सर्वे वानराः वृक्षतले आगच्छन्ति। प्रत्येकः वानरः एकां एकां टोपिकां स्वीकरोति। अनन्तरं वृक्षस्य उपरि गच्छन्ति। सर्वे वानराः सर्वाः टोपिकाः अपहरन्ति। पेटिका रिक्ता भवति। सर्वे वानराः वृक्षस्य उपरि कूर्दन्ति, कोलाहलं च कुर्वन्ति। तेन करीमः उत्तिष्ठति। पेटिकां रिक्तां पश्यति इतस्ततः च अवलोकयति। सः वानरान् पश्यति इतस्ततः च अवलोकयति। सः वानरान् पश्यति टोपिकाः तु वानराः स्वीकृतवन्तः। अतः करीमः अतिक्रुद्धः भवति। दण्डं दर्शयित्वा वदति अहं सर्वान् ताडयिष्यामि। वानराः अपि तत्र कुप्यन्ति। ततः करीमः एकं पाषाणखण्डं स्वीकरोति। वानरान् प्रति क्षिपति। वानराः अपि वृक्षात् करीमं प्रति फलानि क्षिपन्ति। करीमः हताशः भवति। सः एकम् उपायं चिन्तयति। सः स्वटोपिकाम् भूमौ क्षिपति। वानराः अपि तथैव कुर्वन्ति। करीमः सर्वाः टोपिकाः चिनोति, पेटिकामध्ये स्थापयति, अनन्तरं शीघ्रं धावति स्वगृहं च आगच्छति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतसम्भाषणम्

परिचयः

शिक्षकः : नमो नमः। मम नाम शिवकुमारः। भवतः नाम किम्?
मोहनः : मम नाम मोहनः।
शिक्षकः : भवत्याः नाम् किम्?
राधा : मम नाम राधा।
शिक्षकः : मोहन! भवतः जनकस्य नाम किम्?
मोहनः : मम जनकस्य नाम दिवाकरः।
शिक्षकः : भवतः जनकः किं करोति?
मोहनः : मम जनकः चिकित्सकः अस्ति।
शिक्षकः : भवान् संस्कृतं जानाति वा?
मोहनः : आम्! अहं किंचित्–किंचित् संस्कृतं जानामि।
शिक्षकः : राधे! भवत्याः जननी कुत्र अस्ति?
राधा : मम जननी गृहे अस्ति।
शिक्षकः : भवत्याः जनन्याः नाम किम्?
राधा : मम जनन्याः नाम ऊर्मिला।
शिक्षकः : भवती गानं जानाति वा?
राधा : न, अहं गानं न जानामि।
शिक्षकः : भवत्याः गृहम् कुत्र अस्ति?
राधा : मम गृहं अरेरा गृहावल्याम् अस्ति।
शिक्षकः : अरेरा गृहावली कुत्र अस्ति?
राधा : अरेरा गृहावली भोपालनगरस्य दक्षिणभागे अस्ति।
शिक्षकः : मोहन! भवतः ग्रामः कुत्र अस्ति?
मोहनः : मम ग्रामः विदिशा जनपदे अस्ति।
शिक्षकः : विदिशा जनपदे कुत्र अस्ति?
मोहनः : विदिशा जनपदे सिरोंजतहसीलमध्ये अस्ति।
शिक्षकः : भवतः ग्रामस्य नाम किम्?
मोहनः : मम ग्रामस्य नाम लखनपुरम् अस्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शरीरावयवाः

शक्षकः : भो छात्राः ! भवन्तः शरीरस्य महत्त्वं जानन्ति वा ?

सर्वे छात्राः : आम् । जानीमः

शिक्षकः : यथा अहं प्रदर्शयामि तथा सर्वे प्रदर्शयन्तु।

सवे छात्राः : आम्! प्रदर्शयामः

शिक्षकः : एषः मम शिरः।

सर्वे छात्राः : एषः मम शिरः।

शिक्षकः : मोहन! भवतः कर्णौ कुत्र?

मोहनः : एतौ मम कर्णौ।

शिक्षकः : भवान् कर्णाभ्याम् किम् करोति?

मोहनः : अहं कर्णाभ्यां शृणोमि।

शिक्षकः : भवतः नेत्रे कुत्र?

मोहनः : एते मम नेत्रे।

शिक्षकः : भवान् नेत्राभ्यां किं करोति ?

मोहनः : अहं नेत्राभ्यां पश्यामि।

शिक्षकः : राधे! भवत्याः नासिका कुत्र ?

राधा : एषा मम नासिका ।

शिक्षकः : भवती नासिकया किं करोति ?

राधा : अहं नासिकया जिघ्रामि।

शिक्षकः : भवत्याः मुखे कति दन्ताः सन्ति?

राधा : मम मुख द्वात्रिंशत् दन्ताः सन्ति।

शिक्षकः : भवती दन्तेभ्यः किं करोति?

राधा : अहं दन्तेभ्यः भोजनस्य चर्वणं करोमि।

शिक्षकः : भवत्याः जिह्वा कुत्र?

राधा : एषा मम जिह्वा। अहं जिह्वया आस्वादयामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिक्षकः : भवन्तः सर्वे अंगानि प्रदर्शयन्तु कार्याणि च वदन्तु।

सुरेशः : एतौ मम हस्तौ। वयम् हस्ताभ्यां कार्यं कुर्मः।

रमेशः : एतौ मम पादौ। वयं पादाभ्यां चलामः।

दिनेशः : एतत् मम उदरम्। एषा ग्रीवा। एतौ ओष्ठौ। एषः ललाटः। एतौ स्कन्धौ। एतत् पृष्ठम्। एषः जानुः।

शिक्षकः : पर्याप्तम्। पर्याप्तम्। भो दिनेश! भो सुरेश! भवतः हस्ते कति अंगुलयः सन्ति। तासां नामानि जानाति वा?

सुरेशः : अङ्गुलीनामपि नामानि भवन्ति?

शिक्षकः : आम्! एषः अङ्गुष्ठ, एषा तर्जनी, एषा मध्यमा, एषा अनामिका, एषा च कनिष्ठा।

सन्दीपः : अहो! अहमपि वदामि अङ्गुष्ठः, तर्जनी, मध्यमा, अनामिका, कनिष्ठा च।

शिक्षकः : उत्तमम्! सर्वाणि अंगानि स्वस्थानि भवन्ति चेत् शरीरं स्वस्थं भवति। तथाचस्वस्थे शरीरे एव स्वस्थं मस्तिष्कं भवति।

दिनचर्या

शिक्षकः : भो सुरेश! अहं ह्यः गृहकार्यं दत्तवान्। कृतं वा?

सुरेशः : श्रीमन् कृपया क्षम्यताम्। गृहकार्यं न कृतम्। श्वः कृत्वा प्रदर्शयिष्यामि।

शिक्षकः : अन्ये के गृहकार्यं न कृतवन्तः। स्व–स्व हस्तम् उत्थापयन्तु।

(अनेके छात्राः स्व–स्व हस्तम् उत्थापयन्ति) भवतां दिनचर्या समीचीना नास्ति। अतः गृहकार्यस्य कृते समयः न लब्धः। भो सुरेश उत्तिष्ठतु। भवान् प्रातः कदा उत्तिष्ठति वदतु?

सुरेशः : अहं प्रातः सप्तवादने उत्तिष्ठामि।

शिक्षकः : ततः परं किं करोति?

सुरेशः : अहं सप्तवादनतः अष्टवादनपर्यन्तं नित्यकर्म करोमि। मुखं प्रक्षालयामि, दन्तधावनं करोमि, स्नानं च करोमि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिक्षकः : स्नानानन्तरं भवान् किं करोति?

सुरेशः : अहं स्नानानन्तरम् अष्टवादनतः सार्धअष्टवादनपर्यन्तं पूजनं करोमि। सार्ध अष्टवादनतः नववादनपर्यन्तं स्वल्पाहारं स्वीकरोमि। ततः परं विद्यालयस्य गणवेशं धरामि। विद्यालयं च आगच्छामि।

शिक्षकः : तर्हि भवान् प्रातः किमपि न पठति? भो दिनेश ! भवान् सायंकाले किं करोति वदतु ?

दिनेशः : अहं सायं काले पञ्चवादनतः षड्वादनपर्यन्तं क्रीडामि। षड्वादने आपणं गच्छामि। आपणतः गृहम् आगत्य सप्तवादनतः नववादनपर्यन्तं दूरदर्शने कार्यक्रमान् पश्यामि। नववादनतः सार्धनववादनपर्यन्तम् भोजनं करोमि। ततः परं सार्धदशवादनपर्यन्तम् अध्ययनं करोमि। ततः परं स्वपिमि (शयनं करोमि)।

शिक्षकः : भो भो छात्राः! एवं न कर्त्तव्यम्। प्रातः शीघ्रम् उत्थातव्यम्। प्रातःकाले अध्ययनं समीचीनं भवति। सायंकाले क्रीड़ानन्तरम् गृहकार्यं करणीयम्। अध्ययनं च करणीयम्। दूरदर्शनम् अधिकं मा पश्यन्तु। रात्रौ विलम्बेन अध्ययनं समीचीनं न भवति। विलम्बेन निद्रा अपि न समीचीना। सर्वं समयेन करणीयम्। तदैव भवन्तः स्वजीवने सफलाः भविष्यन्ति।

भोजनव्यवहारः

रमेशः : अम्ब ! अम्ब ! भवती किम् करोति?

अम्बा : वत्स ! किम् आवश्यकम्?

रमेशः : अरे ! महती बुभुक्षा अस्ति। शीघ्रं भोजनं ददातु।

अम्बा : भोजनं तु सिद्धम् अस्ति। सर्वान् शीघ्रम् आह्वयतु।

रमेशः : हे तात! शीघ्रम् आगच्छतु। भगिनि! भवती अपि आगच्छतु। अम्बा भोजनं परिवेषयति।

भगिनी : अम्ब! अद्य भोजने किं किम् अस्ति?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अम्बा : अद्य भोजने ओदनं, सूपः, शकं, रोटिका, पर्पटः, पायसं च अस्ति।

भगिनि : कस्य व्यंजनं अस्ति?

अम्बा : शाकम् आलुकं गोजिह्व्योः अस्ति।

रमेशः : अम्ब! अद्य कः विशेषः? किमर्थं पायसं कृतवती?

अम्बा : अद्य जन्माष्टमी अस्ति अतः पायसं कृतवती।

पिता : कथं भोजनसमये बहुभाषणं भवति? भोजनकाले भाषणं बिना भोजनं करणीयम्।

भगिनी : अम्ब! शाकं स्वादिष्टम् अस्ति।

रमेशः : अम्ब ! सूपे लवणमेव नास्ति।

अम्बा : अरे ! विस्मृतम्। लवणं स्वीकरोतु। चमसेन योजयतु।

पिता : मम कृते आमरसं, उपदंशं परिवेषयतु, हरितमरीचिकाम् अपि ददातु।

अम्ब : किं भो ! भवान् बहु कटुं खादति। अधिकं कटु खादनेन क्रोधः वर्धते। किंचिदेव स्वीकरोतु।

अम्बा : वत्स ! पायसं सम्यग् (समीचीनं) अस्ति।

रमेशः : अम्ब ! पायसं कथं अस्ति।

भगिनी : किंचित् तक्रं ददातु।

अम्बा : आम् ! आम् ! स्वीकरोतु।। सर्वे सावधानं भोजनं कुर्वन्तु।

पिता : भोजनं तु पर्याप्तम्। जलं ददातु।

अम्बा : जलं तु भवतां चषके अस्ति। जलपात्रमपि समीपे अस्ति। भोजनानन्तरं सर्वे स्थालीम् अत्रैव स्थापयन्तु।

गृहसामग्रीः

मोहनः : भो मित्र ! भवतः गृहं कुत्र अस्ति?

सोहनः : मम गृहं तु समीपे एव अस्ति। सर्वे आगच्छन्तु, चलामः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमेशः : भवतः गृहे कति प्रकोष्ठाः सन्ति?

सोहनः : केचन लघुः केचन दीर्घाः सर्वम् आहत्य पञ्च प्रकोष्ठाः सन्ति।

सुरेशः : तत्र शाकवाटिका अस्ति वा?

सोहनः : आम्! गृहस्य पृष्ठभागे शाकवाटिका अस्ति। अग्रे हरिताङ्गनं च अस्ति। आगताः वयम्। एतदेव अस्माकं गृहम्।

सर्वे : अहो ! बहुसुन्दरं गृहम्। रमणीयं गृहम्।

सोहनः : अम्ब ! अम्ब ! आगच्छतु। मया सह मम मित्राणि आगतानि। पश्यतु।

अम्बा : आम्। आगच्छामि।

सर्वे : नमो नमः।

अम्बा : किं सर्वे कुशलिनः? अरे सोहन! सर्वेषां परिचयं कारयतु।

सोहनः : अम्ब ! अवश्यं कारयामि। एषः मोहनः सर्वदा अस्मान् हासयति।

अम्बा : एषः रमेशः किल? पूर्वमपि आगतवान्। कथं मौनं तिष्ठति। किम् अभवत्?

रमेशः : किमपि न। मम स्वास्थ्यं किंचित् शिथिलम् अस्ति।

सोहनः : एषः सुरेशः। कक्षायां सर्वदा प्रथमस्थानं प्राप्नोति।

अम्ब : अस्तु ! सर्वे सुखेन उपविशन्तु। अहं किंचित् अल्पाहारं पानीयं च आनयामि।

सोहनः : आम्। भवती आनयतु तावत् अहं सर्वान् अस्माकं गृहं प्रदर्शयामि। अरे आच्छन्तु सर्वे।

मोहनः : भवतः प्रकोष्ठः कुत्र अस्ति?

सोहनः : तत्र कोणे मम प्रकोष्ठः अस्ति। तत्र लघु पर्यङ्कः अस्ति। शय्या अपि अस्ति। मम पठनार्थं एका आसन्दिका उत्पीटिका च स्तः।तस्य पार्श्वे दीर्घः शयनकक्षः अस्ति। तत्रैव कोणे भण्डारकक्षः अपि अस्ति अतः सः कक्षः दीर्घः। तत्र एका कपाटिका, एकः युगलपर्यङ्कः, दूरदर्शनम्, आकाशवाणी, ध्वनिमुद्रिका, लौहपेटिका च सन्ति।

रमेशः : अपरः लघुकक्षः!

सोहनः : स अतिथिकक्षः। अत्र आगच्छन्तु। एषः स्वागतकक्षः। अत्रैव अर्धभागे भोजनस्थलमपि अस्ति। तस्य निकटे पाकशाला अस्ति। पाकशालायाम् अनिलचुल्लिः, मिश्रकम्, शीतकम्, पेषकम् च अस्ति। अन्यत् लघु पूजागृहमपि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्ति। अपरस्मिन् भागे स्नानागारः, शौचालयश्च स्तः।

अम्बा : सर्वे आगच्छन्तु। स्वल्पाहारं स्वीकुर्वन्तु।

सर्वे : आम्। आगताः।

व्यवसायः

रमेशः : हे तात ! भवान् प्रतिदिनं प्रातः दशवादने बहिः गच्छति, पुनः सायंकाले षड्वादने गृहमागच्छति। तावत् पर्यन्तं भवान् कुत्र गच्छति? किं करोति?

पिता : अहं मध्यप्रदेशशासनस्य वित्त मंत्रालये सचिवः अस्मि। अतः प्रतिदिनं तत्रैव गच्छामि कार्यालयकार्यं च करोमि।

रमेशः : किं भवतः कार्यालये बहवः जनाः कार्यं कुर्वन्ति? किं सर्वे एकमेव कार्यं कुर्वन्ति?

पिता : नास्ति भोः। सर्वे भिन्न–भिन्न कार्याणि कुर्वन्ति। कश्चन अनुभागाधिकारी अस्ति, कश्चन लिपिकः कश्चन टयङ्कः, कश्चन कोषाधिकारी, कश्चन सहायकः, कश्चन सेवकः। समाजे सर्वे भिन्न–भिन्न व्यवसायं कुर्वन्ति। केचन सर्वकारीयं व्यवसायं कुर्वन्ति। केचन निजव्यवसायम्।

रमेशः : निजव्यवसायं के कुर्वन्ति?

पिता : ग्रामे कृषकाः, गोपालकाः, मेषपालकाः, कार्मिकाः, अर्चकाः, कुम्भकाराः, मालाकाराः इत्यादयः स्व स्व व्यवसायं कुर्वन्ति। नगरेषु अपि एते व्यवसायाः भवन्ति। अत्र कर्मागारेषु कार्मिकाः भवन्ति, प्रशासनिकाधिकारिणः भवन्ति।

रमेशः : आम्। इदानी अवगतम्। मम मित्रस्य पिता संगणकविशेषज्ञः अस्ति। अपरस्य पिता चिकित्सकः अस्ति।

वेशभूषा

रमेशः : अम्ब ! अम्ब ! अद्य सायंकाले वृन्दावनविवाहमण्डपे विवाहोत्सवे गन्तव्यं किल?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अम्बा : आम् ! आम् ! अहं तु विस्मृतवती। शीघ्रं सर्वाणि कार्याणि सम्पादनीयानि।

रमेशः : अहं नूतनवस्त्राणि धारयामि। अम्ब ! किं धरामि। नीलवर्ण दरुकं श्वेत वर्णत! वा?

अम्बा : मास्तु ! मास्तु ! श्वेतवर्णं मास्तु। शीघ्रं मलिनं भविष्यति।

रमेशः : अस्तु तर्हि नीलवर्णमेव भवतु। तस्यमेलकं युतकं कुत्र अस्ति? ददातु

अम्बा : तत्र पेटिकायाम् पश्यत,। मम तु बहूनिकार्याणि सन्ति।

रमा : अम्ब ! अम्ब ! ममापि वस्त्राणि ददातु।

अम्बा : भवती किं धर्तुम् इच्छति?

रमा : अहं पीतवर्ण पादांशुकं तस्योपरि विषमेन हरितवर्ण कंचुकं धर्तुम् इच्छामि। तदेव ददातु।

अम्बा : आम् ! तत् समीचीनं भवति। भवती अन्विष्य तत् स्वीकरोतु।

पिता : सर्वे स्व–स्व वस्त्राणि सज्जीकुर्वन्ति। ममं वस्त्राण्यपि सिद्धानि सन्ति वा न वा? अहं किं धरामि? धौतवस्त्रं वा प्रावारकं वा?

अम्बा : मास्तु ! मास्तु ! इदानीं कः धौतवस्त्रं धरति? भवताम् रक्तवर्ण प्रावारकं सिद्धं समीकृतं च अस्ति। भवान् तदेव धरतु। तस्य विषमेन श्यामवर्णस्य शीतकम् अपि अस्ति। अनयोः संयोगे भवान् बहु शोभते।

पिता : आम् ! आम् ! मम शोभां तत्र कः पश्यति।

अम्बा : कथं न। एतादृशेषु उत्सवेषु सर्वे आकर्षकाणि वस्त्राणि धरन्ति। अहं किं धरामि इत्येव मम चिन्ता। यदि शाटिका सिद्धा अस्ति तर्हि तस्याः मेलकं चोलं नास्ति। चोलं समीचीनम् अस्ति चेत् शाटिका नास्ति। कृपया भवान् एव सूचयतु।

रमेशः : सर्षपवर्णां शाटिकां धरतु।

अम्बा : तस्याः अंचलं सम्यक् नास्ति।

रमा : तर्हि नारंगवर्णां धरतु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अम्बा : तस्याः सीमाचित्रं समीचीनं नास्ति।

पिता : महिलानाम् अयमेव क्लेशः। शीघ्रं चयनं न कुर्वन्ति। भवती यत्किमपि धरतु सर्वं शोभते।

सम्बन्धः

पितामहः : अरे वत्स रमेश! अत्र आगच्छ। अस्मिन् कोलाहले मम वचनं न कोऽपि श्रुणोति। तव पिता तु क्रयणे एव व्यस्तः अस्ति। कन्या विवाहः किल? अन्ये किं कुर्वन्ति नाहं जाने। सर्वे बान्धवाः आहूताः वा न वा? के आगताः के न आगताः?

रमेशः : पितामह! परह्यः अग्रजः प्रजावती च देहलीतः आगतवन्तौ। ततः किंचित् अनन्तरमेव अग्रजा भावुकश्च आगतवन्तौ। ह्यः मुम्बईतः पितृव्यः सपरिवारं आगतः।

पितामहः : एतान् तु अहमपि दृष्टवान्। तव पितृष्वसा न आगता वा? सा तु भोपालनगरस्य समीपे एव अस्ति।

रमेशः : तां तु अहं न जानामि।

पितामहः : कथं न जानासि? सा तव पितुः भगिनी अस्ति। मम च पुत्री। तस्याः पतिः मम जामाता भवति। सर्वेषु शुभकार्येषु एते अवश्यम् आगच्छन्ति। तव माता किं करोति?

रमेशः : मुम्बईतः पितृव्या आगता किल तया सह वार्तां करोति।

पितामहः : तव सा पितृव्या। तव मातुः तु देवराणी अस्ति। बहुकालानन्तरं उभे मिलितवत्यौ अतः वार्तामेव करिष्यन्ति। महिलाः एवमेव कुर्वन्ति उत्सवेषु। सर्वं कार्यं त्यक्त्वा केवलं वार्तामेव कुर्वन्ति। तस्या देवरोऽपि तत्र अस्ति वा?

रमेशः : कः? पितृव्यः वा? सः तु पित्रा सह आपणं गतवान्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितामहः : अरे! तव मातुल गृहात् न कोऽपि दृश्यते? तत्र सूचना गता नवा? तव मातामहः मातामही च वृद्धौ परं मातुलः, मातुलानी मातुलेयः, मातुलेया सर्वे तु आगन्तुं शक्नुवन्ति।

रमेशः : आम्। सर्वे सूचिताः एव। ते श्वः आगमिष्यन्ति। परश्वः मम मित्राणि अपि आगमिष्यन्ति। मातृष्वसा तु अस्वस्था अस्ति इति दूरवाण्या संदेशः प्राप्तः।

पितामहः : अस्तु! तर्हि प्रायः सर्वे समयेन एव एकत्रिताः भविष्यन्ति।

रमेशः : भगिन्याः विवाहोत्सवः कीदृशः सुन्दरः। सर्वे बान्धवाः अत्र आगमिष्यन्ति। मिष्ठान्नं अपि बहु मिलति।

पितामहः : अस्तु। भो रमेश! भवान् गच्छतु। क्रीडतु। अहं तु श्रान्तः। तव पितामही कुत्र? सा अपि जन सम्मर्दे मग्ना अस्ति। तां प्रेषयतु।

पर्यावरणपरिचयः

रमा : अये ! उमे ! गीते ! राधे ! भवत्यः ह्यः रविवासरे क्रीडार्थं न आगतवत्यः।

सर्वाः : भवती न जानाति? वयं जन्तुशालां गतवत्यः।

रमा : अहं न ज्ञातवती। कुत्र अस्ति जन्तुशाला?

उमां : अत्रैव भोपालनगरे महासरोवरस्य निकटे वनविहार अस्ति खलु?

रमा : तत्र किं किं दृष्टवत्यः?

गीता : तत्र बहवः पशवः आसन्—सिंहः भयंकरः आसीत्। विशालः गजः आसीत्। चञ्चलः हरिणः आसीत्। रमणीयः भल्लूकः आसीत्। नानाप्रकारकाः वानराः आसन्। व्याघ्रः आसीत्। नीला गौः; चित्रगर्दभः, शृगालः, मार्जारः, जलाश्वः, मकरः एवं बहवः वन्य पशवः आसन्।

रमा : अश्वः, धेनुः, कुक्कुरः, अजः, महिषिः, एतेऽपि आसन् वा?

गीता : नहि ! नहि ! एते तु पाल्यपशवः सन्ति। एते अस्माकं गृहाणां समीपे भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राधा : तत्र वयं चित्र–विचित्र पक्षिणः अपि दृष्टवत्यः। श्येनः, कपोतः, शुकः, चिक्रोड़ः, काष्ठकृन्तकः इत्यादयः बहवः खगाः आसन्।

रमा : अन्यत् किं किम् आसीत्?

उमा : तत्र बहवः मत्स्याः आसन्। नानाविधाः सर्पाः आसन्।

गीता : वृक्षाणां पुष्पाणां विषये वदतु न।

रमा : किं किं पुष्पाण्यपि?

राधा : आम् ! पुष्पाणां तु रमाणीयम् उद्यानमेव आसीत्। तत्र पाटलं, चम्पकं, कमलं, मालती, सूर्यमुखी इत्यादीनि मनोहराणि पुष्पाण्यपि आसन्। पाटलानि तु रक्त, श्वेत, पीत, नील, वर्णान्यापि आसन्।

रमा : बहुरमणीयम् ! बहुरमणीयम् ! परं एतत् सर्वं वनविहारे किमर्थं अस्ति?

गीता : पशूणां, पक्षीणां, वृक्षाणां, पुष्पाणां, सर्वेषां प्राकृतिक पदार्थानां संरक्षणेनैव पर्यावरणस्य रक्षणं भवति। एतद् प्रदर्शनार्थमेव सर्वं तत्र संरक्षितम्।

रमा : अहमपि इदानीं पितरं वदामि यत् अहं वनविहारं द्रष्टुमिच्छामि।

विद्यालयपरिचयः

रमेशः : भो मित्र ! सुरेश। भवान् कस्मिन् विद्यालये पठति?

सुरेशः : भवान् न जानाति वा? अहं उत्कृष्टता विद्यालये पठामि।

रमेशः : न जानामि भो। अहं तु गतसप्ताहे एव भोपालनगरम् आगतवान्। अहं तु अत्र नूतनः। अतः कस्मिन् विद्यालये प्रविशामि इति चिन्तयन् अस्मि।

सुरेशः : तर्हि अस्माकं विद्यालये प्रविशतु। इतः सह एव गच्छावः।

रमेशः : भवतः विद्यालयः इतः कियत् दूरम् अस्ति। कथं गन्तव्यम्?

सुरेशः : अलं चिन्तया। समीपे एव अस्ति। इतः पदाभ्यां गन्तुं शक्यते। विद्यालयस्य वाहनान्यपि उपलब्धानि।

रमेशः : तत्र के के विषयाः पाठ्यन्ते?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरेशः : प्रायः सर्वे विषयाः पाठ्यन्ते। आंग्लं, हिन्दी, गणितं, विज्ञानं, पर्यावरण–अध्ययनं, संगणकविज्ञानं सर्वं तु अस्ति एव।

रमेशः : संस्कृतं नास्ति वा?

सुरेशः : अस्ति, अस्ति। अहं तु विस्मृतवान्। अस्माकं संस्कृत अध्यापिका बहु सम्यक् पाठयति। मधुरस्वरेण श्लोकान् गीतानि च श्रावयति।

रमेशः : विज्ञानविषयः पृथक्–पृथक् न पाठ्यन्ते वा?

सुरेशः : अवश्यं पाठ्यन्ते। एकादश द्वादश कक्षयोः पृथक् पृथक् जीवविज्ञानं भौतिकविज्ञानं रसायनविज्ञानं च पाठ्यन्ते। तेषां पृथक् पृथक् प्रयोगशालाः अपि सन्ति। अहं तु नवमी कक्षायां पठामि। अस्यां तु विज्ञानं मिश्रितम् अस्ति अतः एकमेव उक्तवान्।

रमेशः : अहमपि नवमी कक्षायामेव प्रविशामि। अन्यत् किं किं सौविध्यमस्ति?

सुरेशः : तत्र इतिहासकक्षः, भूगोलकक्षः संगणककक्षः, कार्यानुभवकक्षः, क्रीडा कक्षः, बालचरकक्षः, संगीतकक्षः, मनोरञ्जनकक्षश्च सन्ति। विशालः पुस्तकालयः अपि अस्ति।

रमेशः : कक्षायाम् किं किम् अस्ति?

सुरेशः : कक्षाप्रकोष्ठाः दीर्घाः सन्ति। तत्र सर्वेषां छात्राणां कृते पर्याप्ताः आसन्दाः उत्पीटिकाः च सन्ति। समीचीनाः श्यामपट्टाः सन्ति। प्रत्येकस्मिन् प्रकोष्ठे छायागृहकेन्द्रं अपि अस्ति।

रमेशः : तत् किमर्थम्?

सुरेशः : प्राचार्यः स्वकक्षतः एव छायाचित्रमाध्यमेन सर्वेषु प्रकोष्ठेषु किं किं प्रचलति इति ज्ञातुं शक्नोति।

रमेशः : अन्यत्! अन्यत् !

सुरेशः : अध्यापककक्षः, कार्यालयः, पुस्तकापणं, स्वल्पाहारकेन्द्रं, क्रीडाक्षेत्रं सर्वमस्ति। विद्यालये पूर्णमनुशासनं भवति। परिसरे सुरक्षा व्यवस्था अपि सुदृढ़ा अस्ति।

रमेशः : तर्हि अहमपि उत्कृष्टता विद्यालये प्रविशामि। उत्कृष्टशिक्षां च प्राप्नोमि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यातायातसाधनानि

रमा : किं भो सखी! भवती बहुदिनेभ्यः न दृष्टा। कुत्र आसीत्?

उमा : आम! अहम् अत्र न आसं भोः! अहं गतसप्ताहे उज्जयिनीम् अगच्छम्।

रमा : किं भवती एकाकिनी अगच्छः?

उमा : नहि! नहि! अहं, मम माता, पिता, भ्राता, भगिनी च सर्वे अगच्छाम।

रमा : भवन्तः सर्वे कथं अगच्छन्? कृपया वदतु।

उमा : मम भ्राता मित्रगृहं गतवान्। तं विहाय वयं सर्वे कारयानेन रेलस्थानकं यावत् अगच्छाम!

रमा : किं भवन्तः नूतनं कारयानं क्रीतवन्तः?

उमा : नहि ! नहि ! मम मातुलस्य कारयानम् आसीत्। सः अस्मान् रेलस्थानकं यावत् अनयत्।

रमा : तर्हि भवत्याः भ्राता न गतवान् वा?

उमा : सः मित्रस्यस्कूटरयानेन रेलस्थानकम् आगच्छत्।

रमा : ततः परं कुत्र गतवन्तः?

उमा : रेलस्थानके बहु सम्मर्दः आसीत्। भोपालतः उज्जयिनीं यावत् गच्छत् रेलयानम् अन्तिमनिस्थाने आसीत्। यात्रा चीटिकार्थं दीर्घा पङ्क्तिः आसीत्। रेलयानस्यप्रस्थानाय अल्पः एव कालः अवशिष्टः आसीत्। अतः रेलयात्रायाः विचारः निरस्तः।

रमा : अरे बहुखेदस्य विषयः। तर्हि गृहं पुनरागतवन्तः वा?

उमा : नहि ! नहि! ततः लोकयानस्थानकं यावत् आटोरिक्शा यानेन अगच्छाम। यतोहि भोपालनगरे पादरिक्शा तु न चलति।

रमा : तत्र लोकयानानि आसन् वा?

उमा : आम्! भोपालतः उज्जयिनीं यावत् साधारणलोकयानानि द्रुतलोकयानानि अपि सन्ति। वयं द्रुतलोकयानेन अगच्छाम। द्रुतलोकयाने बहुसौविध्यं भवति। यानं शीघ्रं चलति। मध्ये कुत्रापि न स्थगयति। सुखासनानि भवन्ति। चीटिकामूल्यं तु किंचित् अधिकं भवति। केचन वायुयानेनापि गच्छन्ति। परं तत्र चीटिकामूल्यं बहु अधिकं भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमा : ततः परं तु यात्रासुखपूर्णा आसीत् खलु?

उमा : आम्! आम्! यात्रा तु सुखपूर्णा आसीत् तत्र राष्ट्रीयराजमार्गे तु भारवाहनानि रात्रौ बहु वेगेन चलन्ति। तेषां दर्शनात् एव भीतिः भवति। ततः परं तु सर्वं सम्यक् जातम्। वयं सकुशलं उज्जयिनी भ्रमणं कृत्वा ह्यः एव प्रत्यागच्छाम।

रमा : अस्तु ! वयमपि कदाचित् द्रुतयानेनैव यात्रां करिष्यामः।

समयज्ञानम्

अम्बा : रमेश, सुरेश, रमे वादनं सर्वे शीघ्रं उत्तिष्ठन्तु इदानीं सप्तवादनं भवति।

रमेशः : किं अम्ब ! अद्य तु रविवासरः। अवकाशदिनम् अस्ति। इतोपि किंचित् स्वपिमः।

अम्बा : उत्तिष्ठन्तु ! उत्तिष्ठन्तु ! प्रतिदिनं षड्वादने उत्तिष्ठन्तु। अद्य एका घण्टा अधिकं सुप्तवन्तः एव।

रमा : अम्ब ! अम्ब ! कृपया दूरदर्शनं चालयतु। सपाद सप्तवादनतः (७.१५) स्त्रौलीकार्यक्रमः भविष्यति।

अम्बा : प्रथमं सर्वे उत्तिष्ठन्तु। दन्तधावनादिकं कुर्वन्तु। स्वल्पाहारः सिद्धः भवति।

सर्वे : अस्तु उत्तिष्ठामः। (सर्वे उत्थाय नित्यकर्म कृत्वा आगच्छन्ति) वयं सन्नद्धाः। अम्ब ! स्वल्पाहारः कुत्र?

पिता : अद्य प्रातः एव दूरदर्शनं चालितम्? सर्वदा गीतदृश्यानि, हास्यचित्राणि च पश्यन्ति। दूरदर्शनं स्थगयन्तु।

रमा : तात ! इदानीं पादोन नववादनं (८.४५) भवति। कृपया नववादन (९.००) पर्यन्तं दूरदर्शनं चालयन्तु। ततः परं बाल्यकार्यक्रमाः न सन्ति।

पिता : समाचारप्रसारः कदा भवति? सर्वदा अस्मिन् गृहे धारावाहिकमेव चलति।

सुरेशः : मुख्यसमाचारस्यकालः गतः। प्रातः सार्ध अष्टवादनतः (८.३०) भवति। पुनः रात्रौ सार्ध अष्टवादनतः भवन्ति तदा कृपया समाचारं श्रुण्वन्तु। अथवा संक्षिप्तसमाचारःप्रसारः पञ्चाधिकनववादनतः (९.०५) दशाधिकनववादन (९.१०) पर्यन्तं भविष्यति।

पिता : अद्य रविवासरः खलु। सायंकाले सर्वे कुत्रापि भ्रमणार्थं गच्छामः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमा : आम्! आम्! भोपालमहासरोवरं गच्छामः।

सुरेशः : नहि! नहि! रतनपुरे जलोद्यानं गच्छामः।

रमेशः : भारतभवने चत्वारिंशत् अधिक षड्वादनतः (६.४०) (विंशतिन्यून सप्तवादनतः) संस्कृतनृत्यनाटिका भविष्यति। पुनः विंशति अधिक सप्तवादनतः (७.२०) संस्कृतनाटकस्य मंचनं भविष्यति।

पिता : चिन्तामास्तु। सर्वत्र गच्छामः। अद्य अवकाशदिनम् अस्ति एव। भोजनानन्तरं प्रथमं जलोद्यानं गमिष्यामः। तत्र साक्षात् द्विवादने (२.००) उद्घाट्यते। अतः सर्वे दशोनद्विवादने (१.५०) एव सिद्धाः भवन्तु। समीपम् एव अस्ति। अतः पंचोनद्विवादने (१.५५) प्राप्स्यामः।

रमा : तर्हि भोपालमहासरोवरं कथं गमिष्यामः?

पिता : जलोद्याने घण्टाद्वयं (२ घण्टे) सार्धघण्टाद्वयं वा (२.३० घण्टे) यापयित्वा गमिष्यामः। पुनः सरोवरतः भारतभवनमपि समयेन गमिष्यामः।

दिशाज्ञानम्

अध्यापकः : किं भो छात्राः ! भवन्तः भारतदेशस्य भौगोलिक स्वरूपं जानन्ति वा?

सर्वे : आम् ! जानीमः। भूगोलकक्षायां पठितवन्तः।

अध्यापकः : तर्हि वदन्तु। भारतस्य उत्तरस्यां दिशि किम् अस्ति?

रमेशः : भारतस्य उत्तरस्यां दिशि हिमालयः अस्ति।

अध्यापकः : भारतस्य दक्षिणस्यां दिशि किम् अस्ति?

सुरेशः : भारतस्य दक्षिणस्यां दिशि हिन्दूमहासागरः अस्ति।

अध्यापकः : भारतस्य पूर्वस्यां दिशि किम् अस्ति?

मोहनः : भारतस्य पूर्वस्यां दिशि बर्यौलारनातः अस्ति।

अध्यापकः : भारतस्य पश्चिमायां दिशि किम् अस्ति?

हरिः : भारतस्य पश्चिमायां दिशि अरबसागरः अस्ति।

अध्यापकः : शोभनम्! शोभनम्! भवन्तस्तु भारतस्य भौगोलिक स्वरूपं सम्यक् जानन्ति। मध्यप्रदेशस्य उत्तरे कः प्रदेशः अस्ति?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमेशः : मध्यप्रदेशस्य उत्तरे उत्तरप्रदेशः अस्ति।

अध्यापकः : मध्यप्रदेशस्य दक्षिणे कः प्रदेशः अस्ति?

रमा : मध्यप्रदेशस्य दक्षिणे महाराष्ट्रप्रदेशः अस्ति।

अध्यापकः : मध्यप्रदेशस्य पूर्वे कः प्रदेशः अस्ति?

उमा : मध्यप्रदेशस्य पूर्वे छत्तीसगढ़प्रदेशः अस्ति।

अध्यापकः : मध्यप्रदेशस्य पश्चिमे कः प्रदेशः अस्ति?

गीता : मध्यप्रदेशस्य पश्चिमे राजस्थानप्रदेशः अस्ति।

अध्यापकः : शोभनम्! शोभनम्! भोपालनगरस्य उत्तरे किं नगरम् अस्ति?

सुरेशः : भोपालनगरस्य उत्तरे ग्वालियरनगरमस्ति।

अध्यापकः : भोपालनगरस्य दक्षिणे किं नगरम् अस्ति?

हरिः : भोपालनगरस्य दक्षिणे इटारसीनगरम् अस्ति।

अध्यापकः : भोपालनगरस्य पूर्वे किं नगरमस्ति?

सोहनः : भोपालनगरस्य पूर्वे जबलपुरनगरमस्ति।

अध्यापकः : भोपालनगरस्य पश्चिमे किं नगरमस्ति?

हरिः : भोपालनगरस्य पश्चिमे इन्दौरनगरमस्ति।

अध्यापकः : अस्माकम् उपरि किम् अस्ति?

राधा : उपरि आकाशः अस्ति।

अध्यापकः : अधः किम् अस्ति?

रमेशः : अधः भूमिः अस्ति।

अध्यापकः : एवमेव सर्वदा सम्यक् दिशा ज्ञानं भवेत्।

दिवस-मास-ऋतु-परिचयः

अध्यापकः : भो छात्राः! अद्य कः वासरः? वदन्तु।

मोहन : अद्य तु शुक्रवासरः।

अध्यापकः : कति वासराः भवन्ति इति जानन्ति वा?

हरिः : आं जानीमः। सप्तवासराः भवन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अध्यापकः : तेषां नामानि कानि?

मोहनः : रविवासरः, सोमवासरः, मर्यैलवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः, शनिवासरश्च।

अध्यापकः : यदि अद्य शुक्रवासरः अस्ति तर्हि कदा गुरुवासरः कदा वा बुधवासरः?

रामः : ह्यः गुरुवासरः परह्यः बुधवासरः।

अध्यापकः : एवं चेत् कदा शनिवासरः कदा वा रविवासरः।

रामः : श्वः शनिवासरः, परश्वश्च रविवासरः।

अध्यापकः : एवमेव कतिमासाः भवन्ति?

मोहनः : द्वादशमासाः भवन्ति।

अध्यापकः : तेषां नामानि कानि?

रमेशः : चैत्रः, वैशाखः, ज्येष्ठः, आषाढ़ः, श्रावणः, भाद्रपदः, आश्वयुजः, कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनं चेति।

अध्यापकः : एकस्मिन् मासे कति पक्षाः भवन्ति?

सोहनः : एकस्मिन् मासे द्वौ पक्षौ। कृष्णपक्षः शुक्लपक्षः च ।

अध्यापकः : एकस्मिन् पक्षे कति तिथयः भवन्ति?

रमा : पञ्चदशतिथयः।

अध्यापकः : पूर्णिमा अमावस्या च कदा भवतः?

उमा : शुक्लपक्षे प्रथमा, द्वितीया, तृतीया.....इतिक्रमेण चतुर्दशी पर्यन्तं तिथयः भवन्ति। अन्तिमायां तिथौ पूर्णिमा भवति। तथैव कृष्णपक्षे अन्तिमा तिथिः अमावस्या भवति।

अध्यापकः : एवमेव कति ऋतवः भवन्ति?

रमेशः : षट्ऋतवः भवन्ति। वसन्त–ग्रीष्म–वर्षा–शरद्–हेमन्त–शिशिरेति षड्ऋतवः।

अध्यापकः : विभिन्नेषु ऋतुषु भिन्नानि प्राकृतिकं–दृश्याणि मनोरम्याणि भवन्ति। तत्सर्वं कालिदासस्य ऋतुसंहारे काव्ये सम्यग्वर्णितम्। सर्वे अवश्यं पठन्तु। एतादृशेन वैविध्येनैव भारतवर्षस्य शोभा वर्धते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वार्षिकोत्सवः

सुरेशः : किं भो मित्र ! ह्यः सायंकाले भवान् क्रीडार्थं न आगतवान्?

रमेशः : नास्ति भो ! ह्यः मम विद्यालये वार्षिकोत्सवः आसीत् खलु। तदर्थं अस्माकं गृहे सर्वे विद्यालयं गतवन्तः।

सुरेशः : आम्! आम्! अद्य प्रातः समाचारपत्रेषु अपि छायाचित्रेण सह भवतः विद्यालयस्य वार्षिकोत्सववृत्तान्तः प्रकाशितः।

रमेशः : किं भवान् पठितवान्?

सुरेशः : आम्! तथापि भवान् विस्तरेण वदतु। किं किं जातम् इति?

रमेशः : तर्हि उपविशतु। श्रावयामि सर्वम्। साक्षात् पञ्चवादने वार्षिकोत्सवः प्रारब्धः।

सुरेशः : तथा वा? विलम्बः न जातः? कः मुख्यातिथिः आसीत्?

रमेशः : न! न! सर्वं समयेन जातम्। मुख्यातिथिः शिक्षामन्त्री आसीत्। अध्यक्षस्तु विश्वविद्यालयस्य कुलपतिः आसीत्। उभावपि समयेन आगतवन्तौ।

सुरेशः : कार्यक्रमः कथं प्रारब्धः?

रमेशः : अस्माकं प्राचार्यमहोदयः अध्यक्षमहोदयं मुख्यातिथिमहोदयं च मञ्चोपरि नीत्वा उपावेशयत्। आदौ मर्चैलाचरणं विहितम्। ततः परं दीपं प्रज्ज्वाल्य मुख्यातिथिमहोदयैः अध्यक्षमहोदयैश्य सरस्वत्याः पुष्पार्चनं कृतम्। ततः परं अस्माकं विद्यालये पठन्त्यः ज्येष्ठभगिन्यः मधुरस्वरेण स्वागतगीतं श्रावितवत्यः। अनन्तरं पुष्पगुच्छप्रदानेन माल्यार्पणेन च मंचस्थानाम् अतिथिनां स्वागतं विहितम्।

सुरेशः : पुरस्कारवितरणं न जातं वा?

रमेशः : तिष्ठतु भो ! भवान् कथं शीघ्रतां करोति? सावधानं शृणोतु। अतिथिनां स्वागतानन्तरम् अस्माकं प्राचार्यः स्वागतभाषणं प्रस्तुतवान्। तत्रैव वार्षिकगतिविधिनां विवरणमपि प्रस्तुतवान्। एतदनन्तरं मुख्यातिथिमहोदयः विविधपुरस्कारान् वितीर्णवान्। ततः परं मुख्यातिथिमहोदयः सर्वेभ्यः विजेतृभ्यः शुभकामनाः ददन् बहुप्रेरणादायकं भाषणं दत्तवान्। अध्यक्षमहोदयोऽपि संक्षिप्तेन आशीर्वचनेन सर्वान् अनुग्रहीतवान्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरेशः : सांस्कृतिककार्यक्रमः नासीत् वा?

रमेशः : आसीत्। अवश्यम् आसीत्। भाषणानन्तरम् अतिथयः मञ्चात् अधः उपविष्टवन्तः। ततः परं मञ्चोपरि सामूहिकगीतानि, नृत्यानि, नाटकानि च प्रस्तुतानि। शकुन्तलागमनम् इति नृत्यनाटिका बहुसमीचीना आसीत्। अन्ते उपप्राचार्यमहोदयः कृतज्ञताज्ञापनं कृतवान्। अस्माकं संस्कृताध्यापकः एव कार्यक्रमस्य संचालकः आसीत्। एवं प्रकारेण अष्टवादने सर्वं सम्पन्नम्।

आपणव्यवहारः

रमेशः : आगच्छ भो मित्र ! आपणं गच्छावः।

सुरेशः : किं अत्रैव विथ्यापणं गच्छावः वा?

रमेशः : न ! न ! तत्र सर्वाणि वस्तूनि न मिलन्ति।

सुरेशः : तर्हि समीपे आपणसंकुलः अस्ति, किं तत्र गच्छावः।

रमेशः : अरे भवान् बहु अलसः। समीपे एव सर्वं कार्यं साधयितुं इच्छसि? आपणसंकुले सर्वेषां वस्तूनां मूल्यानि अधिकानि भवन्ति न जानासि वा? अतः मुख्यापणमेव गच्छामि। यद्यपि किञ्चिद्दूरे अस्ति परं तत्र सर्वाणि वस्तूनि लभ्यन्ते। मूल्यमपि युक्तं भवति।

सुरेशः : अस्तु तर्हि तत्रैव चलावः।

(आपणक्षेत्रं प्रविशतः)

सुरेशः : किं भो मित्र ! आपणक्षेत्रं तु आगतवन्तौ। इतः परं कुत्र गच्छावः?

रमेशः : प्रथमं पुस्तकानां आपणं गच्छावः।

आपणिकाः : अत्र आगच्छन्तु भो ! समीचीनानि पुस्तकानि सन्ति। अत्र आगच्छन्तु भो ! सुन्दराणि वस्त्राणि सन्ति। अत्र पश्यन्तु। स्वच्छानि हरितानि शाकानि सन्ति। अत्र आगच्छन्तु स्वादिष्टं मिष्ठान्नम् अस्ति।

सुरेशः : अयं भो ! अत्र तु सर्वे आह्वयन्ति। किं सर्वाणि वस्तूनि निःशुल्कं दास्यन्ति वा?

रमेशः : न ! न ! एषा खलु कुशला विक्रयशैली। मधुरस्वरेण आह्वयन्ति। सम्मानेन उपावेशयन्ति। कदाचित् शीतपेयम् उष्णपेयं वा ददति। वस्तूनि च सावधानं प्रदर्शयन्ति। अत्र बहुवैविध्यमस्ति। सम्यक्चयनं करणीयम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरेशः : एवं तर्हि अधिकं मूल्यं न स्वीकुर्वन्ति वा?

रमेशः : नहि नहि ! बहूनि आपणानि सन्ति खलु अतः परस्परं स्पर्धा भवति। सर्वे अधिकाधिकानि वस्तूनि विक्रेतुम् इच्छन्ति अतः समुचितमूल्येनैव विक्रीणन्ति। कुत्रचित् मूल्यवादोऽपि करणीयः। केचन आपणिकाः सरलान् जनान् वञ्चयन्ति अपि। स्वकोषे धनं सुरक्षणीयम्। नो चेत् चोराः अपि अत्र परिभ्रमन्ति। स्वकीयं हस्तकौशलं प्रदर्शयन्ति।

सुरेशः : एवं चेत् अत्र एकाकी न आगन्तव्यम्। अस्तु ! अग्रे गच्छावः।

रमेशः : अत्र पश्यतु शाकापणः अस्ति। तत्र आलुकं, कुष्माण्डः, वृन्ताकम्, कावेविल्लम्, पटोलः, पलाण्डुः, लषुनं, सर्वमस्ति।

सुरेशः : आम् ! आम् ! पत्रशाकान्यपि सन्ति। अहं पृच्छामि। किं भो ! पालकस्य कियत् मूल्यम्?

आपणिकः : एककिलोपालकस्य अष्टरुप्यकाणि। अर्धकिलोचेत् चत्वारि रुप्यकाणि पादकिलो चेत् रुप्यकद्वयं स्वीकुर्वन्तु स्वच्छमस्ति।

सुरेशः : अस्तु प्रत्यागमनसमये स्वीकुर्वः।

दूरवाणी सम्भाषणम्

रमेशः : हरिओम्। हरिओम्।

सोहनः : हरिओम्। कः वदति?

रमेशः : अहं रमेशः वदामि। तत्र मोहनः अस्ति वा?

सोहनः : आम्। आम्। एतद् मोहनस्य गृहं परं सः कुत्रापि बहिर्गतवान्।

रमेशः : तर्हि अहं केन सह वार्तां कुर्वन् अस्मि? इति ज्ञातुं शक्नोमि वा?

सोहनः : आम्। आम्। अहं महोनस्य अनुजः सोहनः वदामि।

रमेशः : तथा वा। गृहे सर्वे कुशलिनः वा? सर्वे किं कुर्वन्ति ?

मोहनः : आम्। सर्वे कुशलिनः। पितृपादाः आपणं गतवन्तः माता भोजनं पचति। भगिनी कामपि वार्तापत्रिकां पठति।

रमेशः : भवान् किं कुर्वन् आसीत्? कदाचित् अहं व्यवधानं न कृतवान् किल?

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोहनः : न! न! अहं तु दूरदर्शने क्रिकेटक्रीडां पश्यन् आसम्।

रमेशः : एतत् तु रोचकं कार्यं। अस्तु अहम् अधिकं कालं न स्वीकरोमि। कृपया यदा मोहनः आगमिष्यति तदा मम सन्देशं सूचयिष्यति वा?

सोहनः : किम् इति?

रमेशः : अहं ह्यः विद्यालयं न गतवान् अतः तस्य गृहकार्यपुस्तिकां दृष्ट्वा गणिताभ्यासं कर्तुं इच्छामि इति।

सोहनः : परं मोहनोऽपि ह्यः विद्यालयं न गतवान्।

रमेशः : तथा वा? तर्हि किं करोमि?

सोहनः : एकः उपायः। भवान् अग्रजस्य मित्रं सुधीरं पृच्छतु।

रमेशः : सुधीरं वा? तस्य दूरवाणी संख्यां तु अहं न जानामि।

सोहनः : एक क्षणं तिष्ठतु। अहं दूरवाणीदर्शिकां दृष्टवा वदामि।.....आम्। लिखतु नव, चत्वारि, एकं, पञ्च, शून्यं,, एकं, द्वे, त्रीणि, अष्ट, षट् च।

रमेशः : अरे बहुदीर्घा संख्या अस्ति।

सोहनः : आम। तस्य पितुः चलवाणी अस्ति खलु?

रमेशः : अस्तु अहं तं पृच्छामि। परं कृपया भवान् मम वार्ता विषये मोहनं सूचयतु।

सोहनः : आम्। आम्। तत् तु अवश्यं सूचयिष्यामि। भवान् निश्चिन्तो भवतु न विस्मारामि।

रमेशः : अस्तु धन्यवादः इदानीम् स्थापयामि।

चिकित्सालय-व्यवहारः

रमेशः : अयि भो ! किमर्थं भवान् अलसः दृश्यते?

सुरेशः : किं वदामि भो मित्र ! महती उदरवेदना अस्ति। ह्यः रात्रौ शिरोवेदनाऽपि आसीत्। 'अमृताञ्जनं' लेपयित्वा कथंचित् सुप्तवान्। रात्रौ सम्यक् निद्रा अपि न आसीत्।

रमेशः : पूर्वं कथं नोक्तवान्? अस्वस्थः चेत् औषधालयं गच्छावः। अत्र समीपे एव सञ्जीवनी चिकित्सालयः अस्ति।

सुरेशः : आम्। अवश्यं गन्तव्यम्। कृपया मया सह भवानपि आगच्छतु। अहं किंचित् शैथिल्यं अनुभवामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमेशः : किं भो तथा वदसि। मित्रस्य कृते एतावदपि न करोमि वा? अवश्यं आगच्छामि।
(चिकित्सालयं आगत्य)

रमेशः : अत्रैव अस्ति चिकित्सालयः। भवान् अत्र दीर्घासन्दे उपविशतु। अत्र पुरतः एव स्वागतकार्यालयः अस्ति। अत्र स्वागतिकं पृच्छामि। अत्र का का चिकित्साव्यवस्था अस्ति इति।

सुरेशः : शीघ्रं पृच्छतु भो ! मम वेदना वर्धते।

रमेशः : (स्वागतिकं प्रति) किं भो श्रीमन् ! मम मित्रं रूग्णः अस्ति। अत्र भवतां चिकित्सालये रोग निवारणार्थं आनीतवान्। कृपया अस्मान् सहकरोतु।

स्वागतिकः : अवश्यं सहकरोमि। भवद्भिः चिन्ता न करणीया। अत्र चिकित्सालये समीचीना व्यवस्था अस्ति। सामान्यचिकित्सकाः सन्ति। विशेषज्ञाः अपि सन्ति। शल्यचिकित्सा व्यवस्था अपि अस्ति। आकस्मिकचिकित्सा, औषधालयः, परीक्षणकेन्द्रं च अस्ति। अत्र परिचारिकाः सेवाभवनया कर्म कुर्वन्ति। भवतः मित्रस्य का समस्या?

रमेशः : तस्य महती उदरवेदनास्ति।

स्वागतिकः : तर्हि इतः सोपानमार्गेण प्रथमतलं गच्छताम्। तत्र वामतः चिकित्सकस्य प्रकोष्ठः अस्ति तत्रैव दक्षिणतः परीक्षणकेन्द्रम् अस्ति।
(चिकित्सकस्य समीपं गत्वा)

रमेशः : भो भो महोदयः। कृपया मम मित्रस्य चिकित्सां कुर्वन्तु सः अस्वस्थः अस्ति।

चिकित्सकः : चिन्ता मास्तु, का समस्या?

सुरेशः प्रातः आरभ्य उदरवेदना अस्ति। बहु कष्टम् अस्ति। कृपया औषधं ददातु। सूच्यौषधं मास्तु।

चिकित्सक : ह्यः किं खादितवान्?

सुरेशः : ह्यः मित्रस्य जन्मदिवसः आसीत्। अतः समारोहे यथेष्टं मिष्ठान्नं खादितवान्। रात्रौ शिरोवेदनाऽपि आसीत्।

चिकित्सकः : अस्तु अहं गुलिक–औषधं निर्धारयन् अस्मि। प्रातः सायं च समयेन खादतु। त्रीणि दिनानि द्रवाहारमेव स्वीकरोतु। भवतः अजीर्णं जातम्। मध्ये ज्वरः भवति चेत् चिन्ता न करणीया। शैत्येन काशोऽपि भवेत्। औषधि सेवनानन्तरं सर्वं समीचीनं भविष्यति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतप्रदर्शनी

हरिः : किं भो रमेश ! नमो नमः। बहुदिनेभ्यः भवतः दर्शनमेव नाभवत् अतः अद्यगृहमेव आगतवान्।

रमेशः : आगच्छतु मित्र ! स्वागतम्। कृपया उपविशतु। किं पानीयं आवश्यकम्? उष्णं वा शीतं वा?

हरिः : तत्सर्वं त्यजत, प्रथमं भवान् उपविशतु। वार्तां कुर्मः। अरे किं भवतः गृहे बहुकोलाहलं श्रूयते?

रमेशः : किमपि नास्ति भो ! आगमिनि सप्ताहे श्रावणपूर्णिमायाः अवसरे संस्कृतदिवसः समायोज्यते खलु। तदर्थं सन्नाहः प्रचलति। मम प्रकोष्ठे मित्राणि सर्वे अस्मिन् समये संस्कृतप्रदर्शिन्याः आयोजनाय चर्चां कुर्वन्ति।

हरिः : तर्हि अहमपि सम्मिलितो भवामि।

रमेशः : अवश्यम् आगच्छतु।

हरिः : अरे! अत्र तु मोहनः, रमा, गीता, सोहनः, उपेन्द्रः, सर्वे सन्ति। भवन्तः सर्वे किं कुर्वन्ति?

सर्वे : वयं संस्कृतप्रदर्शिन्याः सन्नाहं कुर्मः।

हरिः : संस्कृतप्रर्दर्शिनी कदा आयोजयिष्यते? कति दिनानि प्रदर्शयिष्यसे? कथं सन्नाहं कुर्वन्ति। माम् अपि सूचयन्तु। अहमपि भागं गृहीतु इच्छामि।

मोहनः : यथा गतवर्षे श्रावणपूर्णिमायां संस्कृतप्रदर्शनी आयोजिता तथैव अस्मिन् वर्षेऽपि श्रावणपूर्णिमातः त्रीणि दिनानि यावत् प्रदर्शनी भविष्यति।

गीता : अहं प्रदर्शिन्याः कृते चित्राणि आलिखन्ती अस्मि।

उमा : अहं तत्र स्थापयितुं वस्त्राणि आनीतवती।

उपेन्द्रः : अहं गृहसामग्रयः स्थापयामि।

सोहनः : अहं संस्कृतसाहित्यस्य प्रमुखांशान् कवीनां जीवनवृत्तान्तश्च चित्रपटेषु आलिखामि।

हरिः : रमेश ! भवान् किमपि न करोति वा?

रमेशः : कथं न ? अहं सम्पूर्णायाः प्रदर्शिन्याः व्यवस्थां करोमि अथ च सर्वेषां वस्तूनां नामानि संस्कृतेन नामपट्टिकासु लिखित्वा स्थापयामि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरिः : तर्हि मम कृते न किमापि अवशिष्टं वा?

रमेशः : भवान् धान्यानि शाकानि च स्थापयतु।

हरिः : आम्! अवश्यम्। पुनश्च व्यवस्थायामपि पूर्णं सहयोगं करिष्यामि। अद्य तु गृहे उक्तवा न आगतवान्। श्वः आरभ्य नियमितरूपेण आगच्छामि।

सर्वे : अस्तु ! नमो नमः ! पुनर्मिलामः।

कार्यक्रम-संचालनम्

संचालकः : नमः सभायै। सर्वेभ्यो नमो नमः । जानन्ति एव भवन्तः यत्, प्रतिवर्षं अस्माभिः संस्कृतदिवसः महता उत्साहेन सम्मान्यते। तेनैव क्रमेण अस्मिन् वर्षे संस्कृतदिवसस्य सम्मानाय वयम् अत्र समवेताः। शीघ्रमेव अस्य कार्यक्रमस्य अध्यक्ष–महोदयः मुख्यातिथिमहोदयश्च समागमिष्यतः। अतः निवेदनम् अस्ति यत्, सर्वे जनाः सभामण्डपे आगत्य स्व–स्व स्थाने उपविशन्तु। कृपया अस्य कार्यक्रमस्य आयोजने सर्वे सहकुर्वन्तु।

(अतिथयः समागच्छन्ति सर्वे जनाः उत्थाय स्वागतं कुर्वन्ति) महत् सौभाग्यमिदं यत् अस्माकं मध्ये माननीयाः शिक्षामन्त्रिणः उपस्थिताः सन्ति। अद्यतन–कार्यक्रमस्य अध्यक्षपदं अलंकर्तुं तान् अहं सादरं निवेदये (करताड़नम्)। तथैव महतः हर्षस्य विषयः यत्, अस्माकं मध्ये विराजन्ते मुख्यमन्त्रिमहोदयाः। अद्यतन कार्यक्रमस्य मुख्यातिथिपदं अलंकर्तुं तान् अहं सादरं प्रार्थये। (करताड़नम्)

(मंगलाचरणम्) : सम्प्रति कार्यक्रमस्य शुभारम्भः मंगलाचरणेन भविष्यति। तदर्थं अहम् विद्यालयस्य छात्रान् आमन्त्रये।

(दीपप्रज्वालनम् सरस्वत्याः समर्चनं च) : इदानीम् अहं अध्यक्षमहोदयान् मुख्यातिथिमहोदयान् च (मंचस्थ अतिथिमहोदयान्) प्रार्थये यत् ते दीपं प्रज्वाल्य, सरस्वत्याः माल्यार्पणेन च कार्यक्रमस्य शुभारम्भं कुर्वन्तु इति।

(स्वागतगीतम्) : सर्वेषां समागतानां मधुरभावेन स्वागतं कर्तुं विद्यालयस्य छात्राः स्वागतगानं प्रस्तोष्यन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(स्वागतभाषणम्) : सर्वेषां समागतातिथीनां वाचिक–स्वागतार्थ शालीयशिक्षा विभागस्य प्रमुखसचिवमहोदयान् प्रार्थये। कृपया ते समागत्य स्वागतभाषणम् विधास्यन्तु इति।

(अतिथीनां स्वागतम्) : सम्प्रति वयं मंचस्थ–अतिथिमहोदयानाम् पुष्पगुच्छैः (माल्यार्पणेन) स्वागतम् व्यवहरामः। तदर्थं अहं आयुक्त महोदयान् निवेदये यत्, ते अध्यक्षमहोदयानां मुख्यातिथीनां अन्येषां च मंचस्थातिथीनाम् स्वागतं कुर्युः इति।

संचालकः : अस्मिन् शुभावसरे अस्माकं छात्राः सांस्कृतिक कार्यक्रमान् प्रदर्शयितुम् सन्नद्धाः सन्ति।

(संस्कृतगीतम्) सर्वप्रथमं एकं सामूहिक गीतं प्रस्तूयते। गीतं च प्रस्तुवन्ति नवमीकक्षायाः छात्राः।

(प्रहसनम्) : सम्प्रति संस्कृते लघु–प्रहसनम् प्रस्तूयते।

(नृत्यनाटिका) : इतः परम् कालिदासस्य अभिज्ञानशाकुन्तलस्य आधारेण एका नृत्यनाटिका प्रस्तूयते। कृपया सर्वे करतलध्वनिना छात्राणाम् उत्साहं वर्धयन्तु इति प्रार्थये।

संचालकः : सांस्कृतिक–कार्यक्रमानन्तरम् सम्प्रति पुरस्कारवितरणस्य अवसरः।

(पुरस्कारवितरणम्) : संस्कृतदिवसमुलक्ष्य छात्रेषु प्रश्नमंचः, अन्त्याक्षरी, वाद–विवादः, निबन्धलेखनम्, भाषणम् इत्येताः प्रतियोगिताः समायोजिताः। तासु प्रतियोगितासु विजेतृभ्यः (विजयं प्राप्तवद्भ्यः) छात्रेभ्यः पुरस्कारान् वितीर्य, तेषां उत्साहवर्धनार्थम् अहं मुख्यमन्त्रिमहोदयान् प्रार्थये।

(क्रमशः सर्वेषां छात्राणां नामानि उच्चार्यन्ते छात्राश्च आगत्य पुरस्कारान् स्वीकुर्वन्ति)

(मुख्यातिथेः उद्बोधनम्) : अस्माकं मुख्यातिथि–महोदयाः प्रतिभासम्पन्नाः लोकप्रसिद्धाश्च सन्ति। तान् अहं प्रार्थये यत् ते स्वकीयेन उद्बोधनेन अस्मान् अनुगृहणन्तु इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(प्रतीकचिन्ह–प्रदानम्) : अस्मिन् संस्कृतदिवसकार्यक्रमे समागत्य अस्माकं मनोबलं वर्धितवन्तः मुख्यातिथि–महोदयाः अध्यक्ष महोदयाश्च। अस्याः सभायाश्च शोभां वर्धितवन्तः। तस्य प्रतिरूपेण किमपि दातुं न वयम् समर्थाः, तथापि अस्माकं स्नेह सम्मानभावयोः प्रतीकरूपेण प्रतीकचिन्हम् अर्पयितुम् शिक्षाविभागस्य अपर–आयुक्त–महोदयान् आमन्त्रये।

(अध्यक्षीय–भाषणम्) : अस्माकं मध्ये विराजन्ते बहुगुणगणमण्डिताः सभापण्डिताः अध्यक्षमहोदयाः। तान् अहं सादरं प्रार्थये यत्, ते समागत्य स्वकीयेन अध्यक्षीय सम्बोधनेन, भाषणेन, आशीर्वचनेन च अस्मान् अनुगृहणन्तु इति।

(कृतज्ञताज्ञापनं– अध्यक्षमहोदयानां मुख्यातिथिमहोदयानां च उपस्थित्या वयं नितरामनुग्रहीताः। तेषाम् समागमनेन वयं सर्वे धन्याः जाताः। सम्प्रति औपचारिकरूपेण कृतज्ञता–ज्ञापनाय अहं लोकशिक्षण–संचालक–महोदयान् प्रार्थये.....।

अनेन कार्यक्रमः सम्पन्नः। अध्यक्षमहोदयानां अनुमत्या कार्यक्रमस्य समाप्तिं घोषयामि। सर्वेभ्यः धन्यवादः।

नमोनमः।

● ● ●

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वदतु संस्कृतम्

भोजनार्थम् आगच्छतु।	भोजन के लिए आइए।
परिवेषयतु / ददातु।	परोसिए/दीजिए।
पर्याप्तम् / माऽस्तु	बस/ नहीं चाहिए।
स्वल्पं स्वीकरोतु / खादतु	थोड़ा सा लीजिए/खाइए।
.... आवश्यकम् (लवणम्)	.... चाहिए। (नमक)
स्वल्पं ददातु।	थोड़ा दीजिए।
किं दधि अस्ति?	क्या दही है?
भोजनं बहु स्वादिष्टम्, अस्ति	भोजन बहुत स्वादिष्ट है।
इतोऽपि स्वीकरोतु।	और लीजिए।
उदरं पूर्णम्।	पेट भर गया।
रोटिका – रोटी	लवणम् – नमक
सूपः – दाल	दधि – दही
ओदनम् – चावल	मरीचिका – मिर्च
शाकम् – सब्जी	मिष्ठान्नम् – मीठा
पूरिका – पूरी	पायसम् – खीर
स्थालिका – थाली	चमसः – चम्मच
चषकः – गिलास	दर्वी – कड़छी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वदतु संस्कृतम्

मम नाम :।	मेरा नाम .....।
भवतः नाम किम्?	आप का नाम क्या है? (पुरुषों के लिए)
भवत्याः नाम किम्?	आप का नाम क्या है? (महिलाओं के लिए)
आगच्छतु। उपविशतु।	आईये। बैठिये।
किं सर्वं कुशलम्?	क्या सब कुशल / ठीक है?
स्वास्थ्यं कथम् अस्ति?	स्वास्थ्य कैसा है?
उत्तमम् अस्ति/नास्ति।	अच्छा है/ठीक नहीं।
कृपया ..... ददातु।	कृपया ..... दीजिये।
स्वीकरोतु।	लीजिए।
अहं स्वल्पं संस्कृतं जानामि।	मैं थोड़ी संस्कृत जानता हूं।
भयं मास्तु, धैर्येण वदतु।	डरिये मत, धैर्य से बोलिये।

मध्यप्रदेश माध्यम द्वारा आकल्पित एवं मुद्रित, २००४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection